कुमारदास ने एक ओर कलात्मक काव्य की ऊँचाइयों को भी छुआ है, पर दूसरी ओर उनकी कविता ने परम्पराओं को भग्न कर या उनसे आगे बढ़कर अपनी बिलकुल नयी राहें नहीं बनायीं। वे निश्चय ही कालिदास की कोटि में नहीं आ सकते, किन्तु उत्तरवर्ती भारवि, माघ और श्रीहर्ष जैसे महान् कवियों के साथ उनकी गणना अपरिहार्य रहेगी।

विषय सूची

परिशिष्ट

प्रथमः सर्गः

आसीदवन्यामतिभोगभाराद्दिवोऽवतीर्णा नगरीव दिव्या-
क्षत्रानलस्थानशमी समृद्ध्या पुरामयोध्येति पुरी परार्ध्या ॥१॥

यत्सौधशृङ्गाग्रसरोजरागरत्नप्रभाविच्छुरितः शशाङ्कः ।
पौराङ्गना वक्त्रकृतावमानो जगाम रोषादिव लोहितत्वम् ॥२॥

कृत्वापि सर्वस्य मुदं समृद्ध्या हर्षाय नाभूदभिसारिकाणाम् ।
निशासु या काञ्चनतोरणस्थरत्नांशुभिर्भिन्नतमिस्रराशिः ॥३॥

चीनांशुकैरभ्रलिहामुदग्रशृङ्गाग्रभागोपहितैर्गृहाणाम् ।
विटङ्ककोटिस्खलितेन्द्रसृष्टनिर्मोकपट्टैरिव या बभासे ॥४॥

दिदृक्षुरन्तः सरसीमलङ्घ्यं यत्खातहंसः समुदीक्ष्य वप्रम् ।
सस्मार नूनं दृढक्रौञ्चकुञ्ज-भागच्छिदो भार्गवमार्गणस्य ॥५॥

१. अयोध्या नाम की एक नगरी थी जो अतिशय समृद्धि के कारण नगरों में श्रेष्ठ थी। ऐसा लगता था जैसे यह नगरी स्वर्ग में रही हो और अपनी समृद्धि के बोझ के कारण पृथिवी पर चली आई और जो उस शमी वृक्ष की भाँति लगती थी जिसके भीतर क्षत्रिय कुल की अग्नि सन्निहित हो।

२. जहाँ प्रासादों के शिखर पर रखे हुए सुवर्ण कलशों पर खचित मणियों की प्रभा ने चन्द्रमा को योंही छाप लिया था, वह पौर जनों की सुन्दरी स्त्रियों के मुख-लावण्य से अपमानित हो कर क्रोध के मारे लाल हो गयी।

३. यद्यपि अपनी समृद्धि से उस नगरी ने सब लोगों को प्रसन्न कर दिया था, परन्तु अभि-सारिकाओं को कोई हर्ष नहीं हुआ। क्योंकि रात्रि के समय सुवर्ण के तोरणों पर जड़ी हुई मणियों की प्रभा अन्धकार के समूह को छिन्न-भिन्न कर देती थी।

४. बादलों को छूते हुए नगरी के प्रासाद अतीव शोभायमान हो रहे थे। इन प्रासादों के शृंगों पर चीन के बने हुए शुभ्र वस्त्र से मढ़ी हुई कबूतरों की 'काबुक' (कबूतरों के रहने का बक्स) रखा हुआ था। ऐसा लगता था जैसे इन काबुकों से टकराने के कारण चन्द्रमा की ऊपरी खाल उधर कर इन काबुकों में चपक गई हो।

५. नगरी के बाहर (जल से भरी) खाँई में तैरते हुए हंस ने भीतर के तालाब को देखने की इच्छा की, परन्तु उसकी चहारदीवारी इतनी सुदृढ़ थी कि वह हंस भीतर न घुस सका। तब उसने परशुराम के बाण का स्मरण किया जिसने 'क्रौञ्च' पर्वत की दृढ गुफाओं को काट डाला था।

स्वबिम्बमालोक्य ततं गृहाणामादर्शभित्तौ कृतवन्ध्यघाताः ।
रथ्यासु यस्यां रदिनः प्रमाणञ्चक्रुर्मदामोदमरिद्विपानाम् ॥६॥

लग्नैकभागं सितहर्म्यशृङ्गे विकृष्य मन्देन समीरणेन ।
दीर्घीकृतं बालमृणालशुभ्रं करोति यत्र ध्वजकृत्यमभ्रम् ॥७॥

प्रवालशीर्षा वदनं सुवर्णं मुक्तामयाङ्गावयवा वहन्त्यः ।
यस्यां युवत्यो विहिता विधात्रा रत्नैरिवापुर्वपुषः प्रकर्षम् ॥८॥

आलिङ्ग्य तुङ्गं वड़भीविटङ्कं विश्राणितात्मध्वनि पुष्करेषु ।
यत्सौधकान्तेरिव संविभागं वव्रे सितं शारदमभ्रवृन्दम् ॥९॥

आसन्नजीमूतघटासु यस्यां विद्युन्निभा काञ्चनपिञ्जरासु ।
मुहुः पताकासु तता वितृप्तिस्तताम तोषं शिखिनामुदग्रम् ॥१६॥

६. घरों के दर्पण की तरह चिकनी दीवारों पर अपना प्रतिबिम्ब देख कर हाथियों ने उन्हें असली हाथी समझ कर उन पर प्रहार किया, पर वह निष्फल रहा। उन प्रतिद्वंदी हाथियों में मद का अभाव देख कर उन्हें निश्चित हो गया कि वे असली नहीं हैं।

७. एक शुभ्र प्रासाद के शृंग के एक भाग पर लगा हुआ ताजे श्वेत कमल के समान सफ़ेद बादल का टुकड़ा मन्द समीर के कारण लम्बायमान हो कर ध्वजा का काम करता था।

८. प्रजापति की बनाई हुई वहाँ की सुन्दरवदना युवतियाँ जिनके सिर सुन्दर केशपाश से सुसज्जित थे और जो पूर्णतया स्वस्थ और नीरोग थीं, उनका शरीर लावण्य-रत्नों के सदृश था।

टिप्पणी—रत्नों से तुलना करने के कारण इस श्लोक में कुछ शब्द ऐसे हैं जो रत्नों पर लागू होते हैं, जैसे 'प्रवालशीर्षा'=प्रवाल मणि से विभूषित। 'वदनं सुवर्णं'=सुवर्ण की तरह दमकता चेहरा। 'मुक्तामयाङ्गावयवा'=जो सम्पूर्ण अंगों पर मोती के आभरण पहिने थी।

९. शरद् ऋतु के बादलों का समूह वहाँ के प्रासादों के सब से ऊँचे कमरों को आलिंगन कर वहाँ पर रखे हुए नगाड़ों को ध्वनित करते हुए उन प्रासादों के सौंदर्य के एक सुसज्जित अंग लगते थे।

१०. जहाँ पास में फैले हुए बादलों के आडम्बर के सन्निकट, बिजली के समान प्रभावान्, निरन्तर फहराते हुए झंडे मयूरों को अतीव आह्लादित करते हैं।

यत्र क्षतोद्वृहिततामसानि रक्ताश्मनीलोपलतोरणानि ।
क्रोधप्रमोदौ विदधुविभाभिर्नारीजनस्य भ्रमतो निशासु ॥११॥

तत्राभवत्पङ्क्तिरथाभिधानो भर्ता भुवो भानुनिभ. प्रभावै. ।
क्षत्रान्वयैर्विभ्रदलङ्‌घ्यमन्यक्ष्मानाथमानं जयमानमोज ॥१२॥

अखण्डमानो मनुजेश्वराणा मान्यो गुणज्ञो गुणजैर्मनोज्ञै. ।
दिशो यशोभि. शरदभ्रशुभ्रैश्चकार राजा रजतावदाता ॥१३॥

जिगीपुरभ्यस्तसमस्तशास्त्रज्ञानोपरुद्धेन्द्रियवाजिवेग ।
आजावजय्यानजनन्दनोऽन्त. स पड्‌द्विप. पूर्वमसौ विजिग्ये ॥१४॥

वलिप्रतापापहृविक्रमेण त्रैलोक्यदुर्लङ्‌घ्यसुदर्शनेन ।
नानन्तभोगाश्रयिणाऽपि तेने तेनालसत्व पुरुषोत्तमेन ॥१५॥

११ जहाँ लाल और श्वेत पत्थरो के बने हुए तोरण कभी अँधेरा और कभी उजाला बिखेरते रहते हैं, तदनुसार रात मे घूमने वाली अभिसारिकाओ के हृदय मे वे प्रसन्नता और क्रोध उत्पन्न करते रहते हैं ।

१२ वहाँ पृथ्वी के स्वामी, सूय के समान तेजस्वी, जिनका नाम दशरथ था, रहते थे । उनका अपराजित शौय ऐसा था कि दूसर के राज्यों को अपना समझना उनके लिये स्वाभाविक था, क्योकि उनकी सदा विजय ही होती थी ।

१३ निष्कलङ्क चरित्र वाले, राजाओ से सम्मानित, गुणग्राही महाराज दशरथ ने अपने गुणो स उत्पन्न, शरद ऋतु के समान स्वच्छ और सुन्दर यश-बाहुल्य से चारो दिशाओं को चाँदी के समान जगमगा दिया ।

१४ दिग्विजय के इच्छुक, अज के पुत्र (महाराज दशरथ) ने समस्त शास्त्रो के निरन्तर अभ्यास स उत्पन्न ज्ञान से इन्द्रिय रूपी घोडों के वेग का निग्रह कर सब के पहिले अपने भीतर स्थित उन छहो शत्रुओ (काम, क्रोध, लोभ, मोह, मद और मात्सर्य) को विजय किया जिनका लडाई के मैदान मे जीतना असम्भव था ।

टिप्पणी—(१) 'अजेष्ट पड्वर्गमरस्त नीतौ'—भट्टिकाव्य १–२। (२) कृतारि-पड्वर्ग जयेन'—भारवि १–९ (३) "काम क्रोधस्तथा लोभो हर्षो मानो मदस्तथा । पड्वर्ग मुत्सृजेदेनमस्मिन् त्यक्ते सुखी नृप ।" कामन्दक नीतिशास्त्र—१–५५ ।

१५ अनन्त सुख भोगते हुए पुरुषों मे श्रेष्ठ दशरथ में तनिक भी आलस्य छू नही गया था । उनमे कर एव उपहारो से जनित कष्ट के निवारण करने की शक्ति थी और उनक अस्तित्व की अवहेलना त्रैलोक्य में कोई भी नहीं कर सकता था ।

टिप्पणी—इस श्लोक मे कुछ शब्दो मे श्लेष है जो विष्णु और दशरथ दोनों ही पर लागू होता है, बलि=राजा बलि=कर एव उपहार । सुदर्शन=चक्र=देखने मे सुन्दर । अनन्त भोगाश्रयिणा=अनन्त-सर्पशायी=अनन्त सुख का भोगने वाला ।

परेषुवात्यापरिबृंहितोऽस्य क्रोधाभिधानो युधि चित्रभानुः ।
ग्राताम्रनेत्रच्युतवारिवर्षैरनायि शान्ति रिपुकामिनीनाम् ॥२१॥

तस्यैकबाणाशनभग्नशत्रोरालोकभूमौ चरणारविन्दे ।
ग्रासेदतुः सर्वनरेन्द्रमौलिरत्नप्रभालक्तकमण्डनानि ॥२२॥

लोकस्तदीये भुवि हारगौरे कीर्तिप्रताने प्रविजृम्भमाणे ।
ग्रभिन्नकोशं कुमुदं निरीक्ष्य मुमोचचन्द्रोदय शङ्कितानि ॥२३॥

समस्तसामन्तनृपोत्तमाङ्गान्यध्यास्य तस्योन्नतवृत्तितेजः ।
जज्वाल चूडागतपद्मरागरागच्छटाविस्फुरणच्छलेन ॥२४॥

नरेन्द्र चन्द्रस्य यशोवितानज्योत्स्ना महीमण्डल मण्डनस्य ।
तस्यारिनारी नयनेन्दुकान्तविष्यन्दहेतुर्भुवन ततान ॥२५॥

माता भवित्री भवतुल्यधाम्न इन्द्रद्विपद्भ्रातृनिषूदनस्य ।
तेनोपयेमे समयं विदित्वा वह्नेः समक्ष विधिवद्विधेया ॥२६॥

२१ दशरथ की क्रोधाग्नि शत्रुओ के बाणों की वर्षा से भभक उठी, परन्तु उन्ही शत्रुओ की स्त्रियो ने जिनकी आँखें (पतिशोक से) रोते रोते लाल हो गई थीं, अपने आसुओं की भडी से उस अग्नि को शान्त कर दिया।

२२ केवल एक ही बाण से शत्रुओ को पराजित करने वाले दशरथ के चरणो पर सभा मण्डप मे राजसमूह ने सर नवाया। उस समय ऐसा लगता था जैसे उन राजाओ के मुकुट मे जडे हुए रत्नो की प्रभा ने दशरथ के कमल के समान सुन्दर चरणो को महावर से अलङ्कृत कर दिया हो।

२३ पृथ्वी पर उनके यश की शुभ्र प्रभा फैली हुई देखकर लोगो को यह शका हुई कि कही चन्द्रोदय तो नही हो गया। परन्तु यह देखकर कि कुमुद तो अभी नही फूला उनकी शङ्का दूर हो गई।

२४ उनका उन्नतिशील तेज समस्त नृप मण्डल के सिर पर व्याप्त होकर उन नृपों के मुकुट के रत्नो की प्रभा से दहकता हुआ लगता था।

२५. सम्पूर्ण पृथ्वी मण्डल के अलङ्कार स्वरूप, राजाओ मे चन्द्रमा के समान, उनके विस्तृत यश की चाँदनी के कारण शत्रुओ की स्त्रियो की इन्दुकान्त मणि के सदृश आँखो से पानी बहने लगा।

२६. उचित समय देखकर दशरथ ने विधिवत् अग्नि के सामने एक ऐसी राजकन्या से विवाह किया जो विनयशीला थी और जो इन्द्र के शत्रु (मेघनाद) के भाई (रावण) को मारने वाले एव ईश्वर के तुल्य तेजस्वी (राम) की माता होगी।

महेन्द्रकल्पस्य महाय देव्याः स्फुरन्मयूखा सरणिर्नखानाम् ।
पादद्वयान्ते जितपद्मकोशे मुक्तेव मुक्तावितति‌र्विरेजे ॥२७॥

लीला गतेरत्र निसर्गसिद्धा मत्तो न दन्ती मुषितो न हंसः ।
इतीव जङ्घायुगलं तदीयं चक्रे तुलाकोट्यधिरोहणानि ॥२८॥

दृष्टौ हृतं मन्मथबाणपातैः शक्यं विधातुं न निमील्य चक्षुः ।
ऊरू विधात्रा नु कृतौ कथं तावित्यास तस्यां सुमतेर्वितर्कः ॥२९॥

तया हृतं तस्य तया पृथुत्वं यथाऽभवन्मध्यमतिक्षयिष्णु।
इतीव बद्धा रशनागुणेन श्रोणी पुनर्वृद्धिनिषेधहेतोः ॥३०॥

अस्योदरस्य प्रतितुल्यशोभं नास्तीति धात्रा भुवनत्रयेऽपि ।
संख्यानरेखा इव संप्रयुक्तास्तिस्रो विरेजुर्वलयः सुदत्याः ॥३१॥

वयःप्रकर्षादुपचीयमानस्तनद्वयस्योद्वहनश्रमेण ।
अत्यन्तकार्श्यं वनजायताक्ष्या मध्यं जगामेति ममैष तर्कः ॥३२॥

२७. इन्द्र के समान दशरथ की रानी (कौशल्या) के कमल को लजाने वाले दोनों पैरों के अन्त में नखों की पंक्ति से जो प्रभा निकल रही थी वह ऐसी लगती थी जैसे उनके पूजन के हेतु किसी ने बहुत से मोती बिखेर दिये हों ।

२८. उसकी (कौशल्या की) दोनों जांघें जैसे तराजू के किनारों पर लटकती हुई यह सिद्ध कर रही थीं कि वह न तो हाँथी और न हंस से चुराई गई हैं, उनकी बल्कि वह चाल स्वाभाविक है ।

२९. बुद्धिमान लोग इस चक्कर में थे कि आखिर ब्रह्मा ने इनकी (कौशल्या की) जांघों को बनाया तो कैसे बनाया । क्योंकि यदि वे आंख खोलकर बनाते तो उनकी आंखें कामदेव के बाण से विद्ध हो जातीं । और, फिर आंख मूंद कर वे बना ही कैसे सकते थे ?

३०. ऐसा लगता था जैसे उनकी (कौशल्या की) अतीव पतली कमर मोटी न होने पावे, इसलिये उसे करधनी से बांध दिया गया हो ।

टिप्पणी—गुण, वृद्धि, निषेध के प्रयोग को देखिये ।

३१. उन सुन्दर दांतों वाली (कौशल्या) के पेट के सौन्दर्य के अनुरूप तीनों भुवनों में कोई भी नहीं है । उनकी त्रिवली ऐसी शोभायमान थी जैसे (प्रत्येक भुवन में ढूंढ़ने पर निराश होकर) ब्रह्मा ने गणना की तीन रेखाएं बना दी हों ।

३२. मेरा तो ऐसा तर्क है कि कमल की पंखुरी के समान दीर्घ नेत्र वाली कौशल्या की कमर यौवन के उत्कर्ष से भरे दोनों स्तनों के भार ढोने के परिश्रम से अत्यन्त पतली हो गई ।

टिप्पणी—"आपीन भारोद्वहनश्रमेण"—रघुवंश–२–१८ । (कालिदास)

अरालकेश्या अलके विधात्रा विधीयमाने चलतूलिकाग्रात् ।
च्युतस्य विन्दोरसितस्य मार्गरेखेव रेजे नवरोमराजी ॥३३॥

नायं शशी तत्प्रतितुल्यमन्यद्यस्मान्न विश्लेपयति द्वय नौ ।
इति स्म तर्कादिव पश्यतस्तौ तस्या मुखेन्दु कुचचक्रवाकौ ॥३४॥

निर्जिग्यतुर्बालमृणालनालं सच्छिद्रवृत्त यदि दीर्घसूत्रम् ।
सुश्लिष्टसन्धी शुभविग्रहौ तौ तन्व्या भुजौ किं किल तत्र चित्रम् ॥३५॥

कान्तिप्रकर्षं दशनच्छदेन सन्ध्याघने वद्धपद हरन्त्या ।
तस्या गृहोद्यानसरोगतस्य हस्तस्थ एवाम्बुरुहस्य राग ॥३६॥

आसीदयं चन्द्रमसो विशेपस्तद्वक्त्रचन्द्रस्य च भासुरस्य ।
विभर्ति पूर्व. सकल कुरङ्ग तस्यैव नेत्रद्वितयं द्वितीय ॥३७॥

कान्तिश्रिया निर्जितपद्मराग मनोज्ञगन्धं द्वयमेव शस्तम् ।
नवप्रबुद्ध जलजं जलेपु स्थलेपु तस्या वदनारविन्दम् ॥३८॥

३३ उसकी (कौशल्या की) नाभि के ऊपर नये रोये की लकीर ऐसी सुन्दर लगती थी जैसे उसके घूँघर वाले बालो के बनाते समय, हाथ कँप जाने के कारण, विधाता की तूलिका के अग्रभाग से एक बूँद कृष्णराग नें पेट पर गिर कर लकीर खीच दी हो ।

टिप्पणी—'भित्वा निराकामदरालकेश्या'—रघुवश—६–८१ । (कालिदास)

३४. चक्रवाक मिथुन के समान कौशल्या के दोनो उन्नत स्तनो ने उसके मुखचद्र की ओर देखकर सोचा कि यह चन्द्रमा नही है बल्कि उसी की तरह कोई दूसरी चीज है, क्योंकि वह हम दोनो का विछोह नही कराती ।

३५. उसके दोनो बाहुओ के प्रत्येक जोड सुन्दर और अवयव पुष्ट और कमनीय थे । उन्होने नये कमल नाल को जो पोपले और तन्तु जाल से भरे थे जीत लिया तो इसमे कौन आश्चर्य है ?

३६. उसके होठो ने सध्याकालीन बादलो की लालिमा छीन ली थी और अन्त पुर के सरोवर मे फूले हुए लाल कमल की अरुणाई उसके हथेलियो मे आ गई थी ।

३७ कौशल्या के मुखचन्द्र मे और चन्द्रमा मे केवल एक ही अन्तर था । चन्द्रमा मे कुरग के सब अवयव अङ्कित थे ' परन्तु कौशल्या के मुखचन्द्र मे उस कुरङ्ग की केवल दो आँखें थी ।

३८. पृथ्वी पर दो ही वस्तुओ की प्रशसा की गई है जिन्होने अपनी कान्ति से माणिक्य को जीन लिया है और जिसमे बडी लुभावनी सुगध है । एक तो जल मे सद्य प्रफुल्लित कमल, दूसरे स्थल पर कौशल्या का मुखारविन्द ।

इन्दीवरस्यान्तरमेतदस्या नेत्रोत्पलस्यापि यतो हिमांशोः ।
त्विषोऽपि नैकं सहते मुखाख्यमाक्रम्य तस्थावपरं शशाङ्कम् ॥३९॥

युग्मं भ्रुवोश्चञ्चलजिह्मपक्ष्मसम्पर्कभीत्यासितलोचनायाः ।
प्रोन्नम्य दूरोत्सरणं विधित्सुर्मध्ये न तस्थाविति मे वितर्कः ॥४०॥

तत्केशपाशावजितात्मबर्हभारस्य वासः शिखिनो वनेषु ।
चक्रे जनस्य स्पृशतीतिशङ्कां चेतस्तिरश्चामपि जातु लज्जाम् ॥४१॥

अन्यापि कन्या जितसिद्धकन्या तादृग्गुणा तस्य बभूव देवी ।
दोषोऽपि यस्या भुवनत्रयस्य बभूव रक्षोभयनाशहेतुः ॥४२॥

सुमंन्त्रसूतस्य सुमित्रयाग्नौ पाणिग्रहं लम्भितया द्विजेन ।
पुण्यं भवान्या भवहस्तसक्तहस्ताम्बुजाया वपुराललम्बे ॥४३॥

तासु प्रजानामधिपः प्रजार्थी देवीसु चारित्रकुलोन्नतासु ।
अदृष्टपुत्राननवन्ध्यदृष्टिश्चिन्ताऽऽहृतात्मैव निनाय कालम् ॥४४॥

३९. नील कमल में और कौशल्या की उत्पल के सदृश कजरारी आँखों में इतना ही तो अन्तर था कि नील कमल चन्द्रमा की रश्मियों को नहीं सह सकता, परन्तु कौशल्या के नेत्रोत्पल उसके मुखचन्द्र को छाये हुए थे ।

४०. मैं समझता हूँ कि कौशल्या की दोनों भौंहें उसकी कजरारी आँखों की चंचल और कुटिल बरौनियों के सम्पर्क में आने से भयभीत होकर दूर ही दूर रहने की इच्छा से कमान की तरह होकर केवल बीच के सहारे टिकी थीं ।

४१. 'ऐसा लगता है कि पशु पक्षियों को भी लज्जा का अनुभव होता है ।' यह सन्देह उन्हें तब हुआ जब उन्होंने देखा कि मयूर नगर छोड़ कर वन में रहने लगे क्योंकि कौशल्या के केशकलाप ने उनके पूँछों को सौंदर्य में हरा दिया था ।

४२. एक दूसरी राजकन्या (कैकेयी) भी थी जो सिद्धों की कन्याओं से भी अधिक सुन्दरी थी, जो कौशल्या के समान गुणवती थी और जिसके अवगुण ने तीनों लोकों को राक्षसों के भय से मुक्त कर दिया, (ऐसी राजकन्या) दशरथ की रानी हुई ।

४३. अग्नि के सामने ब्राह्मण के द्वारा, सुमंत्र जिसके सारथी हैं ऐसे दशरथ के पाणिग्रहण से सुमित्रा के पवित्र शरीर की ऐसी शोभा हुई जैसे कमल के समान हाथ वाली पार्वती की शोभा शिव के पाणिग्रहण करने पर हुई थी ।

४४. अपनी प्रजा के स्वामी, सन्तति की कामना करने वाले, दशरथ की आँखों की ज्योति निष्फल हो गई, क्योंकि चरित्रवान् कुल में उत्पन्न उनकी रानियों के कोई पुत्र न था; और इसी चिन्ता में वे अपना समय काटने लगे ।

स्वरक्षितव्यं गहनं हिमस्य नगस्य गोप्ता श्वगणिप्रचारै.।
विशोधितं कुञ्जभुवः कदाचित् तस्मै जगत्या प्रभवे जगाद ॥४५॥

विधेयचित्तश्चलितव्यपेषु हलायुधाभ. स कुतूहलेन।
अन्येद्युरन्यायनिवृत्तवृत्तिर्मृगेन्द्रगामी मृगया जगाम ॥४६॥

पुत्रीकृतानीश्वरया शिशुत्वे स्नेहेन नप्तॄनिव वालवृक्षान्।
यश्चित्रपुष्पाभरणाभिरम्यानुत्संगदेशेन चिरं बभार ॥४७॥

वातेन कृष्टे पटले घनाना धातुप्रताना प्रतरन्ति दृष्ट्वा।
यस्य त्वचामुद्धरणाभिशङ्का मुग्धाय गन्धर्ववधूजनाय ॥४८॥

य. कृष्यमाणेषु मृगेषु नागैर्दरीमुखादर्धविनिर्गताङ्गै.।
प्रसारितास्य. स्वयमेव सत्वान् ग्रासीकरोतीव वितत्य जिह्वाम् ॥४९॥

नागाङ्गनारत्नमरीचिजालध्वस्तान्धकारप्रकरस्य यस्य।
निकुञ्जपद्माकरपद्मखण्डैर्विदन्ति रात्रिन्दिवसविभागम् ॥५०॥

४५. एक दिन जगल के रक्षक ने आकर जगत् के स्वामी दशरथ से कहा कि हिमाच्छादित पहाड की कुञ्जों (शिकारगाहो) को जो उसकी देख-रेख मे हैं, कुत्तो को साथ लिये परिचारको ने घूम घूम कर साफ कर दिया है।

४६. दूसरे ही दिन दशरथ, जिनकी कान्ति बलराम के सदृश है, जो अन्याय से सदा विमुख रहते हैं और जिनकी चाल सिंह की तरह है, भागते हुए जानवरो को मारने की ठान कर बडे कुतूहल से आखेट के लिए चले।

४७. उन छोटे छोटे वृक्षो को हिमालय बहुत दिनो से अपनी गोद मे बडे स्नेह से पौत्र की तरह पाल रहा था। इन वृक्षो को पार्वती ने अपने पुत्र की तरह माना था और वे इस समय रगविरगे पुष्पो से लदे हुए लहलहा रहे थे।

टिप्पणी—'पुत्री कृतोऽसौ वृषभध्वजेन'—रघुवश २-३६। (कालिदास)

४८. तेज हवा के कारण पहाड से हिम हट गया और उसकी धातुमयी भूमि दिखलाई पडने लगी। इससे भोली भाली गन्धर्व-वधुओ को यह शका हुई कि कहीं हिमालय की खाल तो नही उधड गई।

४९. गुफाओ से अपना आधा शरीर निकालकर जब अजगर मृगो को पकड कर खीच रहे थे तो ऐसा लगता था जैसे पहाड स्वय अपना मुँह खोल, जीभ लपलपाते हुए जानवरो को ग्रास बनाकर निगल रहा हो।

५०. हिमालय के निकुञ्जो मे, नागपत्नियो की मणियो की प्रभा से अन्धकार नष्ट हो जाने के कारण, रात और दिन का विभाजन, इन निकुञ्जो मे स्थित तडागो मे कमलो के फूलने से ही जाना जाता था।

धातुप्रभालोहितपक्षयुग्मः　　श्रीमद्गुहालंकृतचारुपृष्ठः ।
दिव्यस्य यश्चन्द्रकिणो बिभर्ति रूपश्रियं भासुरचन्द्रकान्तः ॥५१॥

तस्य　　क्वणन्निर्झररेणुविद्धैर्वर्तैर्विधूतागरुपादपान्ते ।
अधिज्यधन्वा　धनद प्रभावश्चचार मैनाकगुरोर्निकुञ्जे ॥५२॥

तूणीरतस्तूर्णमिषुं विकृष्य संधाय चापे चपलेतरात्मा ।
रङ्गत्तुरङ्गः क्वचिदाशु धन्वी मार्गं मृगाणां पुरतः स्म रुन्धे ॥५३॥

उत्कर्णमुत्पुच्छयमानमासे　विदर्शिताभ्याहतकन्दुकोत्थम् ।
पारिप्लवाक्षं मृगशाववृन्दमीषन्निपातेन शरेण राजा ॥५४॥

मध्यं त्वमुत्तुङ्गबलः करेण मा पीडयस्व प्रसभं ममेति ।
विवक्षुणेवाभिमुखं विकृष्टचापेन नेमे मनुवंशकेतोः ॥५५॥

खमुत्पपातैणवरो नृपेण विद्धोऽपि पूर्वाहितवेगवृत्त्या ।
स्वर्लोकमन्तःकरणस्य यातुः प्रीत्यानुयात्रामिव कर्तुकामः ॥५६॥

५१. वह पर्वत जिसके दोनों ओर के ढलवान धातुओं की प्रभा से लाल मालूम पड़ते थे, जिसके ऊपर का पृष्ठ भाग सुन्दर गुफाओं से अलंकृत और चन्द्रमा की तरह स्वच्छ था, स्कन्द के मयूर के समान शोभायमान हुआ।

५२. तब कुबेर के समान पराक्रमी दशरथ अपने धनुष पर प्रत्यंचा चढ़ा कर उसको टङ्कारते हुए मैनाक के गुरु (हिमालय) के उन निकुंजों में घूमने लगे जिनमें झरनों की फुहार से आर्द्र अगरु वृक्ष की फुनगियां हवा में झूम रही थीं।

५३. दौड़ते हुए घोड़े पर धनुष लिये हुए स्थिर बुद्धि दशरथ ने फुरती से तरकश से बाण निकाल, अपने धनुष पर साध कर मृगों के मार्ग को तुरन्त रोक दिया।

५४. जब शिकारियों ने उन्हें एक मृगशावकों के झुंड को जो गेंद फेंकने से कान और पूंछ उठाकर उठ खड़ा हुआ था और जिसकी आंखें पानी में तैरती मालूम पड़ती थीं, दिखलाया, तब राजा (दशरथ) ने एक हलका सा तीर फेंक कर उन्हें चौकन्ना कर दिया और वे भाग खड़े हुए।

५५. मनुवंश के यशस्वी राजा दशरथ ने जब अपने चाप को जोर से खींचा तो उसके दोनों सिरे उनके मुख के सामने जैसे यह कहने की इच्छा से झुक गये कि, "तुम अपनी बाहु के प्रचण्ड बल से बरबस मेरी कमर को पीड़ित न करो।"

५६. अपने झुंड का सरदार मृग, ऊँची-ऊँची छलांग मारते हुए जब मनुष्यों में श्रेष्ठ, दशरथ के बाण से विद्ध हुआ तब उसका प्राण शरीर से निकल कर स्वर्ग की ओर चला। उस समय ऐसा लगता था जैसे मृग का शरीर, जिसमें छलांग लेते ही गति आ चुकी थी, अपने प्राण के मोहवश उसका पीछा कर रहा हो।

अन्योन्यवक्त्रार्पितपल्लवाग्रग्रासं नृवीरस्य कुरङ्गयुग्मम्।
प्रियानुनीतौ भृशमिष्टचाटुचेष्टस्य घाताभिरतिं निरासे ॥५७॥

ऋज्वागता तस्य मुहुर्मृगाणां पङ्क्तिः शरेण ग्रथितेव रेजे।
मुक्तेन पूर्वस्य मुखे परेषां इष्टेन सद्य सममन्तरेषु ॥५८॥

आधावतस्तेन धनुर्धरेण मध्येललाटं महिषस्य मुक्तः।
अस्कन्नवेगो दृढदेहभेदे लाङ्गूलसारत्वमियाय बाणः ॥५९॥

स द्वीपिनोऽथ द्विपराजगामी हन्तुं तुरङ्गं रचितक्रमस्य।
जघान देहं प्रतिबिन्दु बाणैरेकेन दुर्लक्ष्यभुजः क्षणेन ॥६०॥

तस्मिन्नृपे पाटयति प्रसह्य शस्त्रेण गण्डं भिषजीव भीमम्।
तदीयनादप्रतिनिस्वनेन त्रासादिवाद्रिर्मुहुरुन्ननाद ॥६१॥

५७ हरिण के जोडे को एक दूसरे के मुख मे घास के कोमल अग्रभाग को प्रेम से देते हुए देखकर, नरो में वीर, दशरथ को, जो स्वभावत प्रेमियो के अनन्य प्रणय में दत्तचित्त रहते थे, जानवरो को मारने से विरक्ति हो गई।

५८. हरिणो का एक झुड रह-रहकर एक सीधी पंक्ति मे आ जाता था। सबके आगे नेता के मुख मे जब दशरथ ने बाण मारा तो वह एक के बाद दूसरे को छेदता हुआ क्षणभर मे निकल गया। वह बाण मृगो के बीच बीच मे समान अन्तर पर चमक जाता था। तब ऐसा लगता था जैसे वे सब हरिण एक सूत्र मे पिरो दिये गये हों।

५६ धनुर्धारी दशरथ ने, जिनके बाण का वेग अनिवार्य था, दौडते जंगली भैंसे के मस्तक के बीचो-बीच एक ऐसा बाण मारा जो कि उस भैंसे के दृढ चमडे के कटे हुए स्थान पर पूँछ की तरह लगता था।

६० हाथी के समान मस्त चाल वाले, जिनकी भुजाएं बाण चलाने के समय दिखलाई नहीं देती थी, ऐसे दशरथ ने, उनसे घोडे पर आक्रमण करने के हेतु छपकन्न तेंदुये के प्रत्येक कृष्णबिन्दु को क्षण भर मे बाणो से वेध दिया।

६१. जब राजा दशरथ शल्य-चिकित्सक की भाँति एक भीमकाय गैंडे को शस्त्र से बलपूर्वक दो टुकडे कर रहे थे उस समय के आर्तनाद की प्रतिध्वनि से ऐसा लगता था जैसे पहाड डर के मारे भयानक आर्तनाद कर रहा है।

टिप्पणी—'तदीयमाक्रन्दितमार्तसाधो गुहानिबद्ध प्रतिशब्द दीर्घम्'
—रघुवंश २—२८। (कालिदास)

युद्धाय यूथादभितो निवृत्तं क्रोडं मुहुः क्रोधविमुक्तनादम् ।
शरस्य लक्ष्यं शरजन्मतुल्यश्चकार चक्रीकृतचापदण्डः ॥६२॥

एवं मृगव्यश्रमसेवितः सन् विश्रामहेतोः स विहाय वाहम् ।
समीरणानर्तितवेतसाग्रं वीरस्सरस्तीरमलञ्चकार ॥६३॥

सुगन्धिसौगन्धिकगान्धहृद्यः सरोऽनिलः सारसनादकर्षी ।
आधूतराजीवरजीवितानैरङ्गं पिशङ्गं नृपतेश्चकार ॥६४॥

अथास्तकूटाहतमुग्ररागं समुल्लसद्दीधितिविस्फुलिङ्गम् ।
स्पृष्टं घनेन क्वचिदास लोहखण्डंबृहत्तप्तमिवार्कबिम्बम् ॥६५॥

बिम्बं पतङ्गस्य बबन्ध दृष्टिं दृष्टं प्रतीच्यामवनीश्वरेण ।
भित्तौ विनीलत्विषि लम्बमानमेकं यथा काञ्चनतालवृन्तम् ॥६६॥

राजा रजन्यामधिशय्य तस्मिन् शिलातलं शीतलमिन्दुपादैः ।
खेदं विनिन्ये मृदुभिः समीरैरासारसारैर्गिरिनिर्झराणाम् ॥६७॥

६२. एक जंगली सुअर मोर्चा लेने के लिये, क्रोध से बार-बार दहाड़ता हुआ अपने झुंड से बाहर निकल आया। तब कार्तिकेय के समान दशरथ ने जिनका धनुष ज़ोर से खींचने के कारण गोलाकार हो गया था, उस सुअर को अपने बाण का निशाना बना लिया।

६३. इस प्रकार उस वीर ने आखेट के परिश्रम से थककर, अपने घोड़े को छोड़, आराम करने के लिये एक सरोवर के तट को जिसमें बेंत के पेड़ के अग्रभाग हवा से हिल रहे थे, अलंकृत किया।

६४. सरोवर की हवा जो सुगंधिक (इत्रफ़रोश) की दूकान की सुगन्धि की भाँति हृदय-ग्राहिणी थी और जो सारस की बोली को आकृष्ट कर रही थी, उस वायु ने नील कमल से पराग उड़ाकर राजा के शरीर को पिङ्गल वर्ण कर दिया।

६५. उस समय चमचमाता हुआ सूर्य का बिम्ब, अस्ताचल के शृंग से टकराने के कारण रश्मि रूपी चिनगारियां छिटकाता हुआ, जो कहीं-कहीं बादलों से छिन्न हो गई थीं, एक दहकते हुए लोहे के बड़े गोले के समान लगता था।

६६. पृथ्वी के स्वामी दशरथ पश्चिम दिशा में सूर्य के बिम्ब को देखकर निहारते ही रह गये। वह बिम्ब काली दीवार पर लटकते हुए एक सुनहले ताल के पंखे की तरह लगता था।

६७. राजा ने उस झील के किनारे चन्द्र किरणों से शीतल एक पत्थर की चट्टान पर सोकर पहाड़ के झरनों की फुहार से ठंढी, मन्द-मन्द हवा से अपने श्रम को दूर किया।

पत्यौ पृथिव्या मृगयाभिलाषाज्जागर्यया नीतवति त्रियामाम् ।
क्वापि प्रपेदे मृगलाञ्छनेन नासादिवादाय निज कुरङ्गम् ॥६८॥

आरुह्य शृङ्ग मृगयाविहारे रागी विवस्वानुदयाचलस्य ।
पत्ये पृथिव्या रचयाम्बभूव मृगानिव प्रस्फुरता करेण ॥६९॥

प्रभु प्रजानामथ स प्रभाते हरिप्रभावो हरिमारुरोह ।
सज्जीकृत सज्जनगीतकीर्तिर्बद्धायुधो बन्धुरवर्मजालम् ॥७०॥

कश्चिन्मृग मार्गणगोचरेऽसौ दृष्ट्वा विकृष्टायतचापदण्ड ।
शरं मुमुक्षु शरभोरुवेग तमन्वयादन्वयकेतुभूत ॥७१॥

विलङ्घ्य मार्गं नृपमार्गणाना रेखायमाणो गगने रयेण ।
मृगोत्तमोऽसौ तमसातटस्थ वन तपस्विद्रुवन प्रपेदे ॥७२॥

धनु सहायोऽसमवति प्रदेशे विहाय वाह सहसा नृवीर ।
चचार पद्भ्या गहने तरूणामसो घने तत्पददत्तदृष्टि ॥७३॥

६८ जब पृथ्वीपति (दशरथ) मृगो का आखेट करने के लिये रात को जागते रहे तो चन्द्रमा, जैसे उर के मारे, अपने हिरण को लेकर कही चल दिया । (अर्थात् चन्द्रास्त हुआ) ।

६९ (जब सूर्योदय हुआ) तब प्रभावान् सूर्य उदयाचल के शृग पर चढकर अपनी प्रस्फुरित किरणो से जैसे शिकार खेलाने के लिये हरिणो को खदेडने लगे । (जैसा हाँका वाले करते हैं ।)

७० तब प्रात काल इन्द्र के समान प्रभावशाली, प्रजा के स्वामी जिनका सज्जन लोग यशोगान करते हैं, शिरहूबस्तर पहिन अस्त्र-शस्त्रों से लैस होकर सजे हुए घोडे पर चढे ।

टिप्पणी—'अथ प्रजानामधिपप्रभाते'—रघुवश—२-१० । (कालिदास)

७१ अपने वश के सिरमौर दशरथ ने अपने निशाने के भीतर आये हुए मृग को देखकर शरभ (एक कल्पित अष्टपाद मृग) के समान तेज बाण को छोडने की इच्छा से धनुष को खीचते हुए उसका पीछा किया ।

७२ वह मृग श्रेष्ठ इतना द्रुतगामी था कि अपनी चौकडी से आकाश मे एक लकीर सी खीचता हुआ राजा (दशरथ) के बाण के निशाने से बाहर निकलकर तमसा नदी के तट पर स्थित एक आश्रम मे जो तपस्वियो का स्थान था घुस गया ।

७३ तब पुरुषवीर दशरथ (उबड खाबड) पथरीली जमीन देखकर फुर्ती से घोडे से उतर, केवल धनुष लिये उसके पैर के चिह्नो को देखते हुए, वृक्षो से भरे हुए उस घने वन मे पैदल ही चलने लगे।

तटेऽपि तस्या घटपूरणस्य श्रुत्वा रवं वृंहितनादशङ्की ।
शरं शरण्योऽपि मुमोच बाले मुनेस्तनूजे मनुवंशकेतुः ।।७४।।

पुत्रो मुनेः पत्रिविभिन्नमर्मा शरानुसारेण नृपं प्रयातम् ।
नेत्राम्बुदिग्धेन विलापनाम्ना बाणेन भूयो हृदि तं जघान ।।७५।।

त्वया त्वनाथस्य विचक्षुषः किं भग्नोऽयमालम्बनदण्ड एकः ।
वने जरावेशजडीकृतस्य गुरुद्वयस्य व्रतजीर्णमूर्तेः ।।७६।।

एकं त्वया साधयताऽपि लक्ष्यं नीतं विनाशं त्रितयं निरागः ।
मच्चक्षुषा कल्पितदृष्टिकृत्यौ वृद्धौ वने मे पितरावहं च ।।७७।।

वनेषु वासो मृगयूथमध्ये क्रिया च वृद्धान्धजनस्य पोषः ।
वृत्तिश्च वन्यं फलमेषु दोषः संभावितः को मयि घातहेतुः ।।७८।।

७४. मनुवंश के केतु (दशरथ) ने नदी के तट पर घड़ा भरने की गड़गड़ाहट को हाथी की आवाज समझ कर, साधुओं को शरण देने वाले होते हुए भी, मुनि के बालक पुत्र पर बाण छोड़ दिया।

टिप्पणी—'वधायवध्यस्य शरं शरण्यः'—रघुवंश—२–३० । (कालिदास)

७५. मुनिपुत्र के मर्म भाग दशरथ के परदार बाण से विदीर्ण हो गये। और जब वे प्रयुक्त तीर के मार्ग से उस ओर जाने लगे तब आहत बालक के आँसुओं से सिक्त, विलापरूपी बाण ने उनके हृदय पर आघात किया।

७६. जो अंधे हैं, जिनका चित्त बुढ़ाई के कारण डाँवाडोल रहता है और तपस्या करते करते जिनका शरीर जीर्ण हो गया है, ऐसे निस्सहाय, वन में माता पिता के केवल एक अवलम्ब मुझे आपने क्यों भग्न कर दिया ?

७७. आपने एक ही निशाने से तीन निरपराध व्यक्तियों की जान ली। मेरे वृद्ध माता पिता की और मेरी, जिसकी आँखों ही के द्वारा वे इस वन में देखते थे।

टिप्पणी—'एकेन खलु बाणेन मर्मण्यभिहिते मयि।
द्वावन्धौ निहतौ वृद्धौ माता जनयिता च मे।
—अयोध्याकाण्ड —६३–४० । (वाल्मीकि)

७८. मैं मृगों के झुंड के बीच इस वन में रहता हूँ। मेरा काम केवल अपने वृद्ध और अन्धे माता पिता का भरण-पोषण है। हमारे भोजन का सहारा केवल ये वन के फल हैं। इनमें क्या दोष था जिसमें आपने मेरे विनाश का कारण देखा ?

टिप्पणी—जटाभार धरस्यैव वल्कलाजिनवाससः।
को वधेन ममार्थी स्यात् किं वास्यापकृतं मया ।।
—अयोध्याकाण्ड–६३–२९ । (वाल्मीकि)

व्रती विनाथो विगतापराध. स्मर्तव्यदृष्टे. पितुरन्धयष्टि ।
इत्येषु किं निष्करुणेन कश्चिदवध्यभावे गणितो न हेतु ॥७९॥

तरुत्वचोऽयं कठिना वसानो वनेषु शीतोष्णनिपीतसार. ।
अस्वादुवन्याशनजीर्णशक्ति पात्रं कृपायास्तव वध्यभूत. ॥८०॥

जीर्णो जतुन्यासनिरुद्धरन्ध्र कुम्भश्च मौञ्जी तरुवल्कलश्च ।
एतेषु यन्मा विनिहित्य गम्य तदगृह्यतामस्तु भवान्कृतार्थ. ॥८१॥

साधु. कृपामन्थर मक्षि शत्रौ प्रीत्यर्थसम्मीलित मादधाति ।
नीचस्तु निष्कारणवैरशीलस्तत्पूर्व संपादित दर्शनेऽपि ॥८२॥

स्व हेतवे हेतिबलोपनीतस्मय. किमप्युन्नतवृत्ति कस्मै ।
नीचस्य निष्ठामधिकर्म गच्छन् कुल कलङ्कै कलुषीकरोषि ॥८३॥

मैवं भवानेनमदुष्टभाव जुगुप्सता स्माक्षतसाधुवृत्तम् ।
इतीव वाचो निगृहीतकण्ठै. प्राणैररुध्यन्त महर्षिसूनो. ॥८४॥

७९ मैं एक तपस्वी हूँ, नितान्त निस्सहाय और निर्दोष । मैं ही, स्मृतिमात्रावशेष दृष्टि वाले अन्धे माता पिता की लकडी (सहारा) हूँ। आप कितने निर्दयी हैं ! क्या आपने इन सब मे न मारने का कोई कारण नही देखा ?

८० पेड की कडी छाल मेरा वसन है । वन मे कभी ठढा कभी गरम पानी पीने को मिलता है । वन मे पैदा हुए निस्वाद पत्तों को खाते खाते मैं शक्तिहीन हो गया हूँ । ऐसी परिस्थिति मे मैं आपकी दया का पात्र था । पर मैं आप ही के हाथो मारा गया !

८१. एक पुराना घडा जिसके छिद्र लाह से बद किये गये है, पेड की छाल का बना वसन और मूज की मेखला यही मेरी सम्पत्ति है । मुझे मार कर केवल इतना ही आप पा सकते हैं । इन्हे लेकर आप कृतार्थ हो ।

८२ साधु पुरुष, शत्रु को देख कर आनन्द अनुभव करने के हेतु आँख बद कर लेता है और फिर प्रेम से धीरे-धीरे आँखो को खोलता बन्द करता है । परन्तु नीच, चाहे उसके सर्वप्रथम ही दर्शन क्यो न किये जांय, अकारण वैर ठानता है ।

८३. अपने शस्त्रो के बल पर फूले हुए, अपने कर्मानुसार नीच कर्म मे निष्ठा कर तुम क्यो अपने अनिर्वचनीय ऊँचे कुल को कलङ्क से कलुषित कर रहे हो ?

८४. 'आप ऐसे अविच्छिन्न साधुवृत्ति वाले और जिसमे दुष्टता का नितान्त अभाव है, ऐसे व्यक्ति की निन्दा न करें ।' ऐसा लगता था कि ऋषिपुत्र के कण्ठ मे अटके हुए प्राण ने उपर्युक्त शब्दो से उसकी वाणी को रोक दिया ।

भोज्याः सुतश्चारुभुजद्वयेन घटं गृहीत्वा घटितारिनाशः ।
वाष्पायमाणो वहुमानपात्रं यमप्रभावो यमिनां ददर्श ॥८५॥

पापं विधायापि विधातृतुल्ये सत्यापयामास सतां पुरोगः ।
ततो यतिं घातयतो न सद्यः क्रोधानलेनास्य ददाह देहम् ॥८६॥

दयानुयातस्तनयस्य नाशं श्रुत्वा महर्षिर्मुहुरात्त शोकः ।
दिदेश देशस्तुत सद्गुणाय विशन् वशी विश्वभुजं स शापम् ॥८७॥

वनजकुसुमधारिणीमलङ्‌घ्यां हरिनखपातविदारितोरुगण्डाम्।
श्रियमिव नृपतिर्मृगव्यभूमिं चिरमनुभूय गृहोन्मुखो बभूव ॥८८॥

अथ स विषमपादगोपितार्थं जगदुपयोगवियुक्त भूरिधातुम् ।
वहुतुहिननिपातदोषदुष्टं गिरिमसृजत्कुकवेरिव प्रवन्धम् ॥८९॥

८५. भोजकन्या (इन्दुमती) के पुत्र, यमराज के सदृश वलवान्, शत्रुओं के नाश करने वाले, दशरथ ने, अपनी आँखों में आँसू भरे हुए, अपने दोनों सुन्दर हाथों में घड़ा लेकर उस असीम मान के पात्र और जितेन्द्रिय ऋषि को देखा ।

८६. विधाता के समान, साधुओं में अग्रगण्य दशरथ ने पाप कर्म करने पर भी सत्य वात कह दी । अतः तपस्वी के मारने वाले के शरीर को उस ऋषि ने क्रोध से तत्काल भस्म नहीं कर दिया ।

८७. दयावान् और जितेन्द्रिय उस महर्षि ने अपने पुत्र का विनाश सुनकर हृदय में वार-वार उभड़ते हुए शोक को वश में कर लिया और दशरथ को, जिनका गुण संसार में गाया जाता था, एक विश्व को निगल जाने वाला भयङ्कर शाप दिया ।

८८. उस मृगया भूमि में जो वन्य पुष्पों से लहलहा रही थी और जिसमें हाथियों के विशाल मस्तक को सिंह ने विदार दिया था, राजा (दशरथ) ने लक्ष्मी देवी की भाँति बहुत दिनों आनन्द उठाकर अपने घर की ओर प्रस्थान किया ।

टिप्पणी—लक्ष्मी के सम्बन्ध में—'वनजकुसुमानि'=कमलानि । 'हरि'=विष्णु, 'गण्ड' =ललाट ।

८९. तव कुकवि के प्रवन्ध के समान उस पर्वत को, जिसमें मणियाँ आस-पास की दुर्गम पहाड़ियों के कारण पहुँच के वाहर थीं, जिसके धातुओं की उपयोगिता से संसार वञ्चित था और जो बहुत वर्फ पड़ने के कारण त्याज्य थीं, उन्होंने छोड़ दिया ।

टिप्पणी—कुकवि के सन्दर्भमें—'विषम पाद गोपितार्थं'=न्यूनाधिक अक्षरों के कारण जिसका तात्पर्य समझ में नहीं आता । 'जगदुपयोग वियुक्तभूरिधातुं'=जिनमें धातुओं का प्रयोग, महाकवियों के प्रयोग से भिन्न है । 'तुहिन'='तु' 'हि' 'न' के अधिक प्रयोग से दूषित ।

सपदि दिशि निबद्धभूरिघोष परमविनीतमनोज्ञनागवृन्दम्।
जलधिमिव नृप पुर स्वकीय मणिगणमण्डितकान्तमाससाद ॥६०॥

इति प्रथम. सर्ग·

६०. चतुर्दिक व्यापी जयघोष से निनादित, खूब सिखाये हुए हाथियो से परिपूर्ण, ढेर की ढेर मणियों से अलङ्कृत होने के कारण सुन्दर, समुद्र के समान, अपनी राजधानी मे राजा दशरथ अविलम्ब पहुँच गये।

टिप्पणी—समुद्र के सदर्भ मे—

'दिशिनिबद्ध भूरिघोष'=जिसकी लहरो का गर्जन चतुर्दिक सुनाई पडता था।
'परमविनीत मनोज्ञ नागवृन्द'=दिव्य पक्षियो से लाये हुए सुन्दर सर्प समूह से परिपूर्ण।
'मणिगणकान्त'=विभिन्न प्रकार के रत्नो से विभूषित।

प्रथम सर्ग समाप्त

द्वितीयः सर्गः

रावणेन रणे भग्ना देवा दावाग्नितेजसा ।
द्रष्टुं जगत्पतिं जग्मुः पुरस्कृतपुरन्दराः ॥१॥

निजदेहभराक्रान्तनागनिश्वासरंहसा ।
गतागतपयोराशिं पातालतलमास्थितम् ॥२॥

आसीनं भोगिनि स्रस्तमौलिमाल्यविभूषणम् ।
तत्क्षणत्यक्तनिद्रातिबद्धरागायतेक्षणम् ॥३॥

भुजङ्गपृथुकारूढमातङ्गमकराश्रयम् ।
युद्धमम्भोनिधिच्छेदे पश्यन्तं नृपलीलया ॥४॥

भोगिभोगासनक्षोभो माभूदिति सुदूरतः ।
भक्त्यानतशरीरेण सेव्यमानं गरुत्मता ॥५॥

१. युद्ध में दावानल के समान रावण से पराजित होकर देवता लोग इन्द्र को आगे कर जगत के पति (विष्णु) से मिलने गये।

टिप्पणी—तस्मिन्विप्रकृताः काले तारकेण दिवौकसः ।
तुरासाहं पुरोधाय धाम स्वायंभुवं ययुः ॥

—कुमार सम्भव, २–१ (कालिदास)

२. जो उस समय समुद्र के नीचे स्थित थे, जिस समुद्र में उनके शरीर के बोझ से दबे हुए शेष नाग के उभर कर जोर से सांस लेने से ज्वार भाटा आता था।

३. जो शेषनाग पर बैठे हुए थे, जिनके सर से माला का अलङ्कार सरक गया था और जिनकी बड़ी-बड़ी आंखें तत्क्षण उठने के आलस्य के कारण लाल थीं।

४. जो राजाओं के स्वाभाविक कौतूहल से समुद्र के एक भाग की ओर देख रहे थे जहां बड़े-बड़े सर्पों के बच्चों ने युद्ध में भारी-भारी घड़ियालों के निवास स्थान पर धावा कर छाप लिया था।

५. जिनकी सेवा के लिये भक्ति से सर नीचा किये, गरुड़ दूर पर इसलिये खड़े थे कि उनके आसन में, जो शेषनाग का था, कोई हलचल न हो।

टिप्पणी—१–८ श्लोक 'कुलक' है। पहिले श्लोक के 'जगत्पतिं द्रष्टुं जग्मुः' के साथ अन्वय होगा।
'द्वाभ्यां युग्ममिति प्रोक्तं त्रिभिः श्लोकैर्विशेषकम् ।
कलापकं चतुर्भिः स्यात् तदूर्ध्वं कुलकं स्मृतम् ॥'

अर्करश्मिभयेनेव पातालतलमास्थितम् ।
लक्ष्मीमुखतुषाराशौ प्रीत्या व्यापारितेक्षणम् ॥६॥

स्वमुखे सचरद्दृष्टेरङ्कविन्यस्तपार्ष्णिना ।
स्पृशन्तं पादपद्मेन पद्मायाः नाभिमण्डलम् ॥७॥

सव्यापसव्यभागस्थपाञ्चजन्यसुदर्शनम् ।
तटद्वयस्थचन्द्रार्कविन्ध्यशैलमिवोच्छ्रितम् ॥८॥

पुरुष पुरुहूताद्या नत्वा गीर्वाणसंहतिः ।
सनातनं स्कन्नशक्तिरुचे नुतियुता गिरम् ॥९॥

समुद्रमथने यस्य भ्रमन्मन्दरखण्डिताः ।
तारा इव दिशो वत्रु. प्रदीप्ताङ्गदकोटय. ॥१०॥

येन दुर्वारवीर्येण सागराम्वरचन्द्रमा ।
शङ्ख पातालपालाना यश पिण्डमिवोद्धृतम् ॥११॥

यमशद्वयससक्तचन्द्रादित्याङ्गदश्रियम् ।
नेमुस्त्रिविक्रमे देवास्ताराहाराङ्कवक्षसम् ॥१२॥

६ जैसे सूर्य की उष्ण रश्मियो से डर कर, जो पाताल के निचले भाग मे विश्राम कर रहे थे और जो वडे चाव से लक्ष्मी के चन्द्रमा के समान मुख की ओर निहार रहे थे।

७. उनके मुख की ओर निहारती हुई लक्ष्मी के नाभि मण्डल को उनकी गोद में पडे हुए अपने कमल के सदृश पैर से जो सहला रहे थे।

८ जिनके उन्नत शरीर के दायें बायें पाञ्चजन्य शख और सुदर्शन चक्र रखा हुआ ऐसा लगता था जैसे विन्ध्य पर्वत के दोनो तट पर सूर्य और चन्द्र हो।

९ तब क्षीण शक्ति इन्द्रादिक देवताओ का वह समूह नतमस्तक होकर उस सनातन पुरुष (विष्णु) से प्रशसायुक्त वाणी बोला।

१० समुद्र मथन के समय जिसके चमकते हुए बाजूबन्द के मारे मन्दर पर्वत के चक्कर खाने से टूट कर दिशाओ मे तारागण की भाँति बिखर गये।

११ जिन्होने अपनी दुर्निवार वीरता से समुद्र को मथकर चन्द्रमा को निकाला जो सागर के समान आकाश मे, पाताल के रक्षको के पुञ्जीभूत यश के समान था।

टिप्पणी—समुद्र मथन के समय ये चीजें निकली थीं —लक्ष्मी कौस्तुभ पारिजातक सुरा धन्वन्तरिश्चन्द्रमा, गाव कामदुघा सुरेश्वर गजो रम्भादिदेवागना । अश्व सप्तमुखो विष हरिधनु शखोऽमृत चाम्बुध, रत्नानीह चतुर्दश प्रतिदिन कुर्यु सदा मगलम् ॥

१२ देवताओ ने त्रिविक्रम (विष्णु) को, जिनके बाहुबन्ध (बाजूबन्द) कन्धो के सन्निकट स्थित, सूर्य और चन्द्र के समान दमक रहे थे, और जिनका वक्ष तारों की बनी हुई माला से अङ्कित था झुककर प्रणाम किया।

मन्थवातभ्रमन्मेघनक्षत्रादित्यमण्डलम् ।
पुरा निर्मथितं येन व्योमापि सह सिन्धुना ॥१३॥

नाभिपद्मस्पृशौ भीमौ येन मायाशयालुना ।
पाणिभिः पाटितौ कामं कीटवन्मधुकैटभौ ॥१४॥

सर्वं लोकत्रयं यश्च संहृत्य शयनं गतः ।
दृश्यते सलिलस्कन्धः सान्द्रीभूत इवोदधौ ॥१५॥

तस्मै स्मरणमात्रेण तुभ्यं सद्यस्तमोनुदे ।
नमः सत्त्वमधिश्रित्य त्रैलोक्यं परिरक्षते ॥१६॥

स्थितिनिर्माणसंहारभेदयोगेन भेदितः ।
त्रिधा ते समभूद्योगः स्पृष्टसत्त्वरजस्तमाः ॥१७॥

कुक्षौ तव परिश्रम्य पश्यन्विश्वं विशां पतिः ।
विवेद त्वां विदामग्रयस्त्रैलोक्यभरसासहिम् ॥१८॥

एवं भक्त्या जगन्नेता नुतो नाकस्य भोक्तृभिः ।
हरिर्हारि हितं वाक्यं जगाद गदनाशनः ॥१९॥

१३. जिन्होंने प्राचीन समय में आकाश को भी जिसमें सूर्य, नक्षत्र मण्डल और मेघ तेजी से घूम रहे थे, मथ डाला था ।
१४. माया में निद्रालु, जिन्होंने पराक्रमी मधु और कैटभ दैत्यों को, इच्छानुसार अपने हाथों से छिन्न-भिन्न कर डाला जब उन राक्षसों ने उनके नाभिकमल को पकड़ने की चेष्टा की ।
१५. तीनों लोकों का विनाश कर सो गये थे और उस समय समुद्र में जमे हुए एक वृहदाकार जल खण्ड के सदृश दिखाई पड़ते थे ।
१६. आपको जो केवल स्मरण मात्र से तुरन्त अन्धकार को दूर करते हैं और जो अपने सतोगुण से तीनों लोकों की रक्षा करते हैं, नमस्कार है ।
१७. जीवन, निर्माण और संहार के विभाजन के अनुसार, आपका योग भी, उनके अनुकूल, सत्व, रजस और तमस में विभाजित है ।
१८. आपके उदर में बड़े परिश्रम से रहकर बुद्धिमानों में श्रेष्ठ, संसार के स्वामी ने इस विश्व को देखकर समझ लिया कि आप त्रैलोक्य का भार वाहन करने में समर्थ हैं ।
१९. स्वर्ग में रमण करने वाले देवताओं से भक्तिपूर्वक प्रशंसित होकर, कष्ट को निवारण करने वाले, संसार के स्वामी हरि ने उन देवताओं से हित और मनोहर वचन बोले ।

प्रबलारिबलप्राणविक्रियाहेतुहेतयः ।
किन्नु स्कन्नौजसो जाता देवा दैवक्षता इव ॥२०॥

हरेर्ध्यानारुणा शोकक्षामा नेत्रपरम्परा ।
बिभर्ति किं परिम्लानरक्तोत्पलवनश्रियम् ॥२१॥

पाशपाणिरसाविष्टविग्रहो वनगोचर ।
वीरोऽपि वरुण. केन क्षुद्र. पाशीव पीडित. ॥२२॥

किमय शोकसन्तापैर्मातरिश्वा कृशोऽपि सन् ।
भूरिभिर्निर्जनि.श्वासैः पुनरेवोपचीयते ॥२३॥

सपद्ध्रुव परावृत्तिरेव विधिनिबन्धना ।
शोकविश्वभुजा सोऽय दह्यते दहनोऽपि सन् ॥२४॥

सम्प्राप्तजडिमा भानुस्तीव्रतापश्च चन्द्रमा. ।
किमेतो वहतौ देवौ धामव्यत्ययविप्लवम् ॥२५॥

२० ये देवता लोग, जिनके शस्त्रो का काम बलवान् शत्रुओ की सेना का विनाश करना है क्यो निस्तेज हो गये हैं ? जैसे भाग्य के मारे हो ।

२१. इन्द्र की आंखो की लडी जो शोक से सूख गई है और चिन्ता के कारण लाल हो गई है क्यो उस वनलक्ष्मी के सदृश हो गई है जिसके लाल कमल मुरझा गये हैं ।

२२. किसने इन वरुण देव को, जो बडे शूरवीर हैं, जो अपने हाथो मे ऐसा पाश लिये रहते हैं जो उनकी इच्छानुसार अनेक रूप धारण करता है और जिनका निवास जल मे है, किसने एक बहेलिये की तरह पीडित कर दिया है ।

टिप्पणी—बहेलिये के सदर्भ मे—"पाश मणि =जिनके हाथ मे चिडियो के फँसाने का जाल है । 'इष्टविग्रह'=जिसको चिडिया का फँसाना अभीष्ट है । 'वनगोचर:=वन मे फिरने वाला ।

२३. पवनदेव जिनका बदन छरहरा है, शोक और सन्ताप से बराबर उभर-उभर कर श्वास लेने के कारण कैसे फूल गये हैं ।

२४. विधि का कुछ ऐसा विधान है कि सम्पत्ति का उलट फेर लगा रहता है । ये अग्निदेव जिनमे जला डालने की शक्ति है, विश्व को खा जाने वाले सन्ताप से स्वय जल रहे हैं ।

२५. सूर्य बरफ के समान ठंडे हो गये हैं और चन्द्रदेव भयङ्कर गरम हो गये हैं । कैसे इन दोनो देवताओ का सहज स्वभाव उलट गया है ।

शुचैव सगदः सोऽहं भूयः किं धृतयाऽनया।
इति त्यक्ता गदा नूनं मित्रेण गिरिधन्वनः ॥२६॥

लाघवं केन कीनाशे कृतं सायुधवाहने।
रक्षके महिषस्यैवं दण्डहस्ते शिशाविव ॥२७॥

कल्पानिल इवावार्यः स्कन्दो दैन्यं किमास्थितः।
प्रेरकः शिखिनो भीमः शक्त्या पातिततारकः ॥२८॥

आहत्य हृतसर्वास्त्रा भ्रूधनुर्मात्रधारिणी।
कटाक्षशरशेषेयं चण्डी केन कृता रणे ॥२९॥

प्रमथानामधीशस्य माथकस्यासुरद्विषाम्।
कूटस्थोऽपि मदः शोषवैकृतं किं नु सेवते ॥३०॥

२६. 'मैं तो सगद (शोकयुक्त) हो गया हूं तो मैं अब क्यों गदा धारण करूं' मालूम होता है अवश्य ही यह सोचकर गिरिधन्वा (इन्द्र) के मित्र कुबेर ने अपनी गदा का परित्याग कर दिया है।

२७. यमराज को जो शस्त्र और वाहन से युक्त हैं, जो हाथ में दंड लिये हुए हैं, और जो अपने भैंसे के रक्षक हैं, उनको किसने शिशु से समान तुच्छ समझ लिया है।

२८. अपने मयूर को प्रेरणा देने वाले, भयङ्कर वीर, अपने पराक्रम से तारकासुर को पराजित करने वाले प्रलय के समय बहने वाले वायु के समान दुर्निवार, ये स्कन्द क्यों दीन हो गये हैं।

२९. किसने चण्डिका देवी को युद्ध में परास्त कर इनके सब अस्त्र छीन लिये हैं और अब इनके पास केवल इनके भौहों का धनुष और कटाक्षों के बाण बच रहे हैं।

३०. शिव गणों के स्वामी असुरों के शत्रुओं के नेता इन गणेश के मस्तक पर से बहने वाला मद क्यों सूख कर विकृत हो गया है।

टिप्पणी—प्रमथाः शिवगणाः।

नानारूपधरा ये वै जटा चन्द्रार्धमण्डिताः।
ते सर्वे सकलैश्वर्ययुक्ता ध्यानपरायणाः॥
संसारविमुखाः सर्वे यतयो योगतत्पराः।
सिंहव्याघ्रादिसारूप्या अणिमादिसमायुताः॥
अपरे कामिनः शम्भोः सुनर्मसचिवाः स्मृताः।
विचित्ररूपाभरणा जटाचन्द्रार्धमण्डिताः॥
आकाशमार्गं गच्छन्तमनुगच्छन्ति नित्यशः।
ध्यानस्थं परिचर्यन्ति सलिलादिभिरीश्वरम्॥
नानाशस्त्रधराः शम्भोर्गणास्तु प्रमथाः स्मृताः।
अपरे गायनास्तालमृदंगपणवादिभिः॥
नृत्यन्ति वाद्यं कुर्वन्तो गायन्ति मधुरस्वरम्।
षट्त्रिंशत्कोटयश्चैते हरस्य सकलागणाः॥ —कालिका पुराण

वक्त्रश्वासाग्निपिङ्गाङ्गकर्कोटाबद्धकन्धर. ।
नागशोणितदिग्धास्यस्तार्क्ष्यो राजशुकायते ॥३१॥

साग्निजिह्वातडिज्जालनद्धा चास्य फणावली ।
किं नु म्लायति वर्षान्ते घनश्रेणीव वासुके. ॥३२॥

पृष्टवन्तमिति प्रष्ठ' प्राज्ञ. प्राञ्जलिरव्ययम् ।
धिपणो धिषणागम्य जगाद जगदीश्वरम् ॥३३॥

त्वया विज्ञातमेवेदं सर्वज्ञ पुनरुच्यते ।
असौहित्य हि भृत्याना स्वामिनि स्वातिजल्पने ॥३४॥

मानिनामग्रणीरस्ति पुलस्तिसुतसम्भव. ।
दर्पोद्धृतजगद्रक्षो रक्षोनाथो दशानन. ॥३५॥

स महौजा जगन्नाशफलाय फलसाधन ।
निर्विकारश्चिर चीरी चचार च महत्तप. ॥३६॥

३१ ये गरुड जिनका मुख सर्पों के रुधिर से सिक्त रहता है, पालतू राजशुक के समान पालतू लग रहे हैं। इनकी गर्दन को कर्कोटक नाग ने, जिसका शरीर अग्नि के समान फुफकार से पीला पड गया है, बाँध लिया है।

३२ वासुकी, फणो की पक्ति, जिनमे अग्नि के समान लपलपाती जिह्वा, जो बिजली के जाल से परिवेष्टित सी लगती है, क्यों वर्षा के अन्त की मेघमाला के समान मुरझाई हुई मालूम पडती है।

३३ जब अनश्वर और ज्ञान द्वारा समझे जाने वाले जगदीश्वर ने सब देवताओ के सम्बन्ध मे इस प्रकार पूछताछ की तब देवताओ के अगुआ, बुद्धिमान वृहस्पति जी हाथ जोडकर बोले।

३४. हे सर्वज्ञ ! आपने हमारे हृदय की बात तो जान ही ली है तथापि मैं फिर से उसे कहता हूँ। क्योकि स्वामी से अपने दु ख की गाथा कहने मे भृत्य की कभी तृप्ति नहीं होती।

३५. पुलस्त्य के पुत्र (विश्रवा) से उत्पन्न, घमन्डियो मे सब से आगे बढा हुआ, राक्षसो के स्वामी, रावण ने अपने दर्प से विश्व की शान्ति भग कर दी है।

३६. उस महाबली (रावण) ने चीर धारण कर जगत के नाश करने का मनोरथ सिद्ध करने के लिये एकाग्रचित होकर बहुत काल तक घोर तप किया।

मातङ्गमकरक्रूरदन्तोल्लिखितवक्षसा ।
तेनव्रतयताहारं तपस्तप्तमुदन्वति ॥३७॥

तत्तपस्तोषितस्तस्मै चतुराय चतुर्मुखः ।
वरं वीराय विश्वेशः प्रादाज्जेतुं जगद्द्वयम् ॥३८॥

स कदाचिद्रटन्नागं नगं नाकौकसामरिः ।
हारगौरं हरस्थानं पटुनादं व्यपाटयत् ॥३९॥

स्फुरन्नगशिरस्त्यक्तैरुन्नदन्नदनिर्झरैः ।
स्पृष्टे पूषणि झङ्कारं घोरमातन्वति क्षणात् ॥४०॥

वाजिनः प्रग्रहाकृष्टखलीनावक्रकन्धरान् ।
एकतो जवयत्यद्रिपातभीत्यार्कसारथौ ॥४१॥

घूर्णमानमहाशैलतटभ्रष्टे मुहुर्मुहुः ।
मत्तस्येवोत्तरीये स्वस्थानं त्यजति निर्झरे ॥४२॥

३७. समुद्र के भीतर भीमकाय जलजन्तुओं ने पैने दांतों से उसका वक्ष क्षत-विक्षत कर दिया। फिर भी उसने व्रत से अपने भोजन का संयमन कर वह तपस्या की।

३८. तब संसार के स्वामी, चतुर्मुख ब्रह्मा जी ने उसकी तपस्या से सन्तुष्ट होकर उस चतुर वीर को दोनों लोकों के विजय करने का वर दिया।

३९. एक समय स्वर्ग के रहने वाले देवताओं के शत्रु (रावण) ने शिव के निवास स्थान (कैलाश) को जो हार के समान शुभ्र है और जहां हाथी चिंघाड़ते रहते हैं, भयङ्कर गर्जन करते हुए चीर डाला।

४०. जिस समय हिलते हुए पर्वत से हहराती हुई बड़े वेग से गिरती नदियों के प्रपात से छू जाने के कारण सूर्य भयङ्कर झंकृत हो उठा था।

टिप्पणी—शिशुपाल वध—४–६६ की टीका करते हुए मल्लिनाथ 'नद' और 'नदी' का भेद इस प्रकार बताते हैं :—'प्राक् स्रोतसो नद्यः प्रत्यक् स्रोतसोनदाः। नर्मदां विनेत्याहुः॥'

४१. जब सूर्य के सारथी ने इस डर से कि कहीं पर्वत गिर न पड़े, एक ओर भाग रहा था, रास को ऐसी जोर से खींचा कि घोड़ों की गर्दन टेढ़ी हो गई।

४२. जब शराबी के कपड़े की तरह, झरने बारम्बार लड़खड़ाते हुए, भारी भरकम पर्वत से अपना स्थान छोड़ रहे थे।

गौरीभयपरिष्वङ्गस्पर्शलब्धमहोत्सवे ।
सक्रुद्धधूर्जटिक्रोधप्रतिलोमप्रवर्तिनि ॥४३॥

कपालनयच्छिद्र जटाबद्धफणावति ।
संकोचितफणाचक्र विशत्युत्त्रासविह्वले ॥४४॥

परित्रस्ते गोपयति कृकवाकुध्वजे सति ।
कार्तस्वरमय मेष मातुरुत्सङ्गसङ्गिनि ॥४५॥

उत्पश्यति चिर धीर क्रोधरोधार्तचेतसि ।
भर्तुर्भ्रूभागभङ्गस्य प्रादुर्भाव ककुद्मनि ॥४६॥

रूढमूलमिव श्वेतैरधोलग्नैर्भुजङ्गमै. ।
प्रौढपुष्पमिवाग्रस्थस्फुरन्नक्षत्रमण्डलै· ॥४७॥

चरणेन रणत्सिहकुलाकुलगुहामुखम् ।
गिरिं गौरीपति· कुञ्ज-गुञ्जत्सिन्धु न्यपीडयत् ॥४८॥

धराधरभराक्रान्ते बाहौ बहुभिराननै. ।
दिक्षु दीर्घप्रतिक्रोशो रावणेन कृतो रव. ॥४९॥

४३ (कैलाश के हिलने से) पार्वती डर के मारे शङ्कर से लपट गई इससे उन्हे बडा आनन्द आया और क्रोधयुक्त शिव के रोष की विपरीत अवस्था हो गई।

टिप्पणी—योगाग्नि दग्धदेहा सा पुनर्जाता हिमालये ।
शशेन्द कुन्द धवला ततो गौरी तु सा स्मृता ॥
तुलना कीजिये "समुत्क्षिप्य पृथिवी भृतांवरे" माघ—१-५० ।

४४. उनके जटाजूट मे लपटा हुआ सर्प भयभीत होकर अपने फणो को समेटता हुआ उनके मस्तक की आँख के छिद्र मे घुसने लगा।

४५. भयभीत मयूरध्वज कार्तिकेय जो अपनी माता के गोद मे बैठे हुए थे अपने सुवर्ण के बने हुए मेढे को छिपाने लगे।

४६. जब (शिव का) वृषभ, जिसका चित्त क्रोध के रोक लेने से क्षुब्ध हो गया था, अपने स्वामी की भृकुटी तन जाने के परिणाम को बहुत देर से ध्यानपूर्वक देख रहा था।

४७-४८. तब गौरीपति ने उस पर्वत को पैर से दबाया, जिसके तल मे श्वेत सर्प, उसके जड के समान घुसे हुए लगते थे, जिसके सर मे ऊपर चमचमाता हुआ नक्षत्र-मण्डल खिले हुए फूलो के समान लगता था और जिसके निकुंजो से कलकल निनाद करती हुई नदियाँ बह रही थीं।

४९. जब पर्वत के भार से रावण के बाहुओ मे अत्यधिक पीडा होने लगी तो वह अपने अनेक मुखो से इतनी जोर से गरजा कि दिशायें दूर तक प्रतिध्वनित हो उठी।

तं देवं स शिरश्छेदव्रणचक्रैरपूजयत् ।
नीलकुट्टिमविन्यस्तैर्मण्डलैरिव कौङ्कुमैः ॥५०॥

आज्ञापयितुमेतस्य राक्षसस्य दिशो दश ।
वक्त्राणि पङ्क्तिसंख्यानि पुनः सृष्टानि शूलिना ॥५१॥

तमःस्थानं तमासाद्य बालिशं कुलिशं रणे ।
अजहादज धाम स्वं वैकुण्ठस्य विकुण्ठितम् ॥५२॥

तमद्याप्यनवद्येन वसुना वासवः स्वयम् ।
अजय्यं पूजयत्येकवीरं वैरस्य शान्तये ॥५३॥

बलिं वज्राय पौलोमी सस्मितं विगतादरा ।
कुर्वती कुरुते शक्रं व्रीणासन्नमितानतम् ॥५४॥

यक्षनाथो दिशंस्तस्मै केवलं धनदो धनम् ।
सर्वस्वहरणप्रीतो रावणस्तु धनेश्वरः ॥५५॥

५०. तब उसने अपने कटे हुए सरों के गोलाकार घावों से शिव की पूजा की। (उस समय) ऐसा लगता था जैसे नील वर्ण चिकने फ़र्श पर कुंकुम से बहुत से मण्डल बना दिये गये हों।

५१. तब त्रिशूल धर शिव ने उस राक्षस (रावण) के दस सिर, दसों दिशाओं में हुकुम चलाने के लिये पुनः पैदा कर दिये।

५२. हे अज! (विष्णु) अन्धकार के केन्द्र उस मूर्ख रावण से युद्ध में भिड़ कर इन्द्र के वज्र ने अपने तेज को छोड़ दिया। (अर्थात् निस्तेज हो गया)।

५३. अजेय और अद्वितीय वीर उस रावण की शत्रुता को शान्त करने के लिये स्वयं इन्द्र उसे अब भी धन देकर पूजते हैं।

टिप्पणी—श्लेष—वसु=धन=पानी।

५४. शची जिनके हृदय से (अपने पति के प्रति) आदर निकला गया है वे उस वज्र (भीषण राक्षस) को मुसकरा कर नैवेद्य अर्पण करती हैं, जिससे इन्द्र का सर लज्जा से नत हो गया है।

५५. यक्षों के स्वामी (कुबेर) अपना धन (रावण को) दे डालने के कारण केवल धनद (धन के देने वाले) रह गये हैं। परन्तु रावण उनके धन के अपहरण करने की प्रसन्नता से धनेश्वर (धन का स्वामी) हो गया है।

टिप्पणी—श्लेष—धनद=कुबेर का नाम=धन का देने वाला।

धर्म्यं कर्म परित्यज्य प्रीणाति पिशित प्रियम् ।
प्रेतराजोऽप्यभिप्रेतभक्ष्यदानेन दानवम् ॥५६॥

दूरत. सेवते भानुरादित्यमणितोरणात् ।
च्युते तन्मन्दिरद्वारदाहभीतो हुताशने ॥५७॥

निवृत्ततत्सर.पद्मस्वापकारणतेजसा ।
बोधनीय किलाशेषमिन्दुना कौमुद वनम् ॥५८॥

यथा न कज्जलस्पर्शचित्रवैवर्ण्यसभव. ।
तथा ज्वलितुमादिष्टो दीपकृत्यो वृषाकपि. ॥५९॥

लब्धसेवावकाश सन् सेवते त समीरण. ।
रतिक्लमथुमद्दे ह तरङ्गान्तरगोचर. ॥६०॥

पातालहृदयान्त स्थ पद्मराग पयोनिधि. ।
अग्रमासमिवोद्धृत्य ददाति पिशिताशिने ॥६१॥

काले कालाभ्रगर्भेऽपि निर्मदा नर्मदादय. ।
नन्दयन्ति सदा नद्यो वज्रैर्वज्रायुधद्विषम् ॥६२॥

५६. प्रेतो के राजा यम भी अपना कामधाम छोडकर, मास के बने स्वादु व्यजन, उस आमिषप्रिय दानव को देकर उसे प्रसन्न करने मे लगे रहते हैं।

५७. इस डर से कि कहीं (उनकी आँच से) उसके (रावण के) महल के दर्वाजे जल न जाँय सूर्य देव उसके आदित्य मणि से जडे हुए तोरण से बहुत दूर होकर उसकी सेवा करते हैं।

५८. चन्द्रमा ने अपनी प्रभा से उसके सरोवर के कमलो को नहीं सुलाया (रावण के डर से उन्हें खिले रहने दिया)। (अब तो) उसका काम केवल वन के कुमुदो को फुलाना ही रह गया।

५९. अग्निदेव को जिनसे दीपक का काम लिया जाता था, यह आदेश मिला कि उनमे धुआ का जल (धुआ) न निकले जिससे वहाँ के चित्रो के बदरग हो जाने की सम्भावना हो।

६० तरङ्गो के भीतर रहने वाला वायु, उसकी (रावण की) सेवा करने का मौका पाकर रति से क्लान्त उसके शरीर की परिचर्या करता है।

६१. पाताल के अन्तस्तल मे रखी हुई मणियों को निकालकर समुद्र, उस मासभक्षी राक्षस को इस प्रकार देता है जैसे वह अपने हृदय का मास दे रहा हो।

६२. काले-काले बादलो से व्याप्त वर्षा ऋतु मे भी नर्मदा आदि शान्त नदियाँ उस वज्रपाणि (इन्द्र) के शत्रु (रावण) को मणि (वज्र) देकर सदा प्रसन्न करती रहती हैं।

टिप्पणी—श्लेष—वज्र = इन्द्र का शस्त्र = मणि।

प्रियाजनपरिष्वङ्गप्रीतिं कर्तुं निरन्तराम्।
निशि ज्ञातमनोवृत्तिस्तमुपैति हिमागमः ॥६३॥

तस्योद्यानवनं विश्वं दिवः प्रवसता सता।
सर्वर्तुषु निजैः पुष्पैर्भूष्यते मधुनाऽधुना ॥६४॥

दुराराध्यस्वभावस्य समालम्ब्य सिषेविषाम्।
जलक्रीडादिनं तस्य ग्रीष्मश्चिरमुदीक्षते ॥६५॥

त्रासकण्ठग्रहव्यग्रांस्तस्मिन्निच्छति मानिनः।
धीरं गर्जन्ति लङ्कायामकाले वारिदा अपि ॥६६॥

अश्रान्ता वीजयत्यष्टहस्तपर्याय संपदा।
इति चण्डीमभिप्रेप्सुः कर्तुं चामरधारिणीम् ॥६७॥

स्तब्धकर्णो नमत्येनं श्रवणाक्षेपमारुतैः।
भूभक्तिकुसुमक्षेपदोषभीतो गणाधिपः ॥६८॥

स्मरश्च संसदं तस्य विशति स्रस्तवाससा।
प्रतीहार्या स्मिताकूतविभ्रमैः कठिनागमः ॥६९॥

६३. जाड़े की ऋतु ने जैसे उसके (रावण के) मन की बात जान ली हो, वह रात्रि में उपस्थित हो जाती है ताकि वह (रावण) अपने प्रेमियों के आलिङ्गन का आनन्द निरन्तर उठाता रहे।

६४. यद्यपि वसन्त ऋतु स्वर्ग में रहता है फिर भी अब वह उसके वन के सब उद्यानों को हर ऋतु में पुष्पों से विभूषित रखता है।

६५. ग्रीष्म ऋतु उस रावण की, जिसका स्वभाव ऐसा है कि वह बड़ी कठिनता से प्रसन्न किया जा सके, सेवा करने की इच्छा से उसके जलक्रीड़ा की बाट बहुत पहिले से जोहता रहता है।

६६. जब वह (रावण) इच्छा करता है अभिमानी गदनी लगने के भय से थर्रा जाय तब बादल भी डर के मारे कुसमय ही धीरे-धीरे गड़गड़ाने लगता है।

६७. यह समझ कर कि चंडी अपने आठों हाथों के सञ्चालन की कुशलता से निरन्तर पंखा हाँकती रहेगी, वह (रावण) उसे पंखा झलने वाली बनाने की इच्छा करता है।

६८. गणों के स्वामी (गणेश) इस डर से कि कहीं उनके कान हिलाने से निकली हुई हवा से पृथ्वी पर सजाये पुष्प तितर-बितर न हो जायें, (वे) अपने कानों को निश्चल कर उसे प्रणाम करते हैं।

६९. जब प्रतिहारी कामदेव के आगमन की सूचना, मुसकराते हुए इशारा कर देती है, तब वह (कामदेव) अपने वस्त्रों को उतार कर उसके (रावण के) महल में प्रवेश करता है।

शुद्धान्तमन्त शुद्धं सन् स्त्रीजनस्य तदाज्ञया ।
लीलोपदेश दानैकव्यग्रो विशति मन्मथ ॥७०॥

त्वयि रक्षाकृति स्वर्गसद्मनामपि दैवते ।
कथं नक्तचरेणैव दिवस्त्रासो वितन्यते ॥७१॥

भ्रातरि द्विपतौ बाहुभग्नौजसि विडौजसि ।
भोगिभोगे चिर तावत्केय देवस्य शायिका ॥७२॥

आत्मस्वनुगुण दैव दृष्ट्या मन्यामहे तव ।
न हि त्व दैवहीनस्य जनस्य तु सुदर्शन ॥७३॥

इत्थ वाचस्पतौ वाच व्याहृत्य विरते क्षणम् ।
स्वर्गं च स्वप्रतिजल्पस्पृहानि स्पन्दवर्तिनि ॥७४॥

कुक्षिस्थनि शेषलोकत्रयभारोद्वहोऽप्यहम् ।
विधाय मानुषीकुक्षिवास शोकक्षयाय व ॥७५॥

भूत्वा राम इति स्यात कुर्या भर्तु सुरद्विषाम् ।
एकबाणकृताशेषशिरश्छेदपराभवम् ॥७६॥

७०. तब अपने अत करण को शुद्ध कर, स्त्रियों को काम लीला के उपदेश देने के लिये उत्सुक (वह) कामदेव उसकी आज्ञा से अन्त पुर मे जाता है।

७१ हे भगवन् ! जब आप स्वर्ग मे रहने वालों के रक्षक है तब कैसे इस निशाचर ने स्वर्ग मे इतना आतङ्क फैला रखा है !

७२. आप तो इन्द्र के भाई हैं। जब इन्द्र ने अपने बाहुबल से शत्रुओ की शक्ति को नष्ट कर दिया तब आप क्यो ऐसी परिस्थिति मे देर से शेषशैया पर अलसाये हुए लेटे हैं !

७३ आपका दर्शन हो जाने से हम समझते है कि दैव हम लोगो के अनुकूल है। क्योकि भाग्यहीन पुरुष को आपका दर्शन सरलता से नही होता।

७४ इस प्रकार स्वर्ग मे वृहस्पति अपना कथन समाप्त कर प्रत्युत्तर पाने की लालसा से क्षणभर बिना हिले-डुले चुप हो गये।

७५-७६ यद्यपि मैं अपने उदर मे तीनो लोकों का सम्पूर्ण भार वहन कर रहा हूँ, (फिर भी) मैं मर्त्यलोक मे एक स्त्री के गर्भ से जन्म लेकर और राम के नाम से विख्यात होकर उस देवताओ के शत्रु राक्षसो के स्वामी (रावण) के सिरों को एक ही बाण से काट कर उसे पराजित कर दूंगा।

इत्युदारमुदाहृत्य वचो वाचामगोचरः ।
तत्याज वेदविद्वेद्यो वर्षातल्पं वृषानुजः ॥७७॥

चिरशयनगुरुं स्वभोगभारं भुजगपतिः शनकैर्वितत्य खेदात् ।
शिथिलितफणपङ्क्तिमुक्तदीर्घश्वसितविधूतमहार्णवोऽवतस्थे ॥७८॥

भूमिस्पर्शभयादुपेत्य तरसा लक्ष्म्या करेणोद्धृतं
व्यालम्बैकपटान्तमङ्गशिखरे क्षिप्त्वोत्तरीयं तत. ।

निद्रामन्थरताम्रलोचनयुगो लीलालसन्यासया
गत्या निर्जितवारणेन्द्रगमनः क्वापि प्रतस्थे हरिः ॥७९॥

इति द्वितीयः सर्गः ।

७७. ऐसे उदार वचन कहकर इन्द्र के छोटे भाई (विष्णु) ने जो वेद को जानने वाले हैं, जो वर्णनातीत हैं और जो जानने के योग्य हैं, अपनी जल शैय्या को छोड़ दिया ।

७८. तब सर्पराज ने अपने विस्तृत शरीर को, जो विष्णु के देर तक सोने के कारण गड़गया गया था, थकान के कारण धीरे-धीरे फैलाया और अपने शिथिलित फणों की पंक्ति के दीर्घनिश्वास से उस महासागर को क्षुब्ध करता हुआ वहीं पड़ा रहा ।

७९. अपने उत्तरीय को जिसका एक छोर लटक रहा था और जमीन पर लथर जाने के डर से लक्ष्मी ने दौड़कर अपने हाथों से उठा लिया था, अपने कंधों पर डाल कर, विष्णु, जिन्होंने अपनी चाल से गजराज को हरा दिया था और जिनकी दोनों आँखें सोने के कारण लाल और अलसाई हुई थीं, उठकर मस्त चाल से कहीं चले गये ।

द्वितीय सर्ग समाप्त

तृतीय: सर्ग:

अथ श्रिय प्राणसमस्य तस्य ज्ञात्वा विविक्षामिव मर्त्यधाम ।
पूर्वावतीर्णं सुमन समृद्धया सम्यग्वसन्तो भुवन ततान ॥१॥

भ्रान्त्वा विवस्वानथ दक्षिणाशामालम्ब्य सर्वत्र करप्रसारी ।
ऋत्विक् ततो नि स्व इव प्रतस्थे वसूपलब्धो धनदस्य वास. ॥२॥

वृक्षा मनोज्ञद्युति चम्पकाख्या रूप वितेनुर्नवकुड्मलाढ्या ।
न्यस्ता वसन्तस्य वनस्थलीभि सहस्रदीपा इव दीपवृक्षा ॥३॥

सम्पिण्डितात्मावयवा उदीयु पद्मा नवा कण्टकितोर्ध्वदण्डा. ।
अन्तर्जलावासविरूढशीतनस्ता वसन्तातपकाम्ययेव ॥४॥

कर्णे कृतो दीर्घविलोचनानामालोलदृष्टिद्युतिभिन्नराग ।
बालोऽप्यशोकप्रभव प्रवाल कान्ति प्रपेदे परिणामगम्याम् ॥५॥

१ जैसे वसन्त यह जान गया हो कि लक्ष्मी को प्राण से अधिक प्रिय, भगवान् की इच्छा मनुष्य के चोले म प्रवेश करने की इच्छा है, तब उसने पहिले ही से आकर पृथ्वी को पुष्पो के सौंदय से भर दिया ।

२ अब सूर्य अपनी किरणो को सब ओर बिखेर कर दक्षिण दिशा मे गया और वहाँ एक दरिद्र पुरोहित (ऋत्विक) की भाँति कुबेर क घर (उत्तर मे) रश्मि लेने के हेतु पहुँचा ।

टिप्पणी—श्लेष —(१) दक्षिणाशा=दक्षिण दिशा=दक्षिणा मिलने की आशा । (२) करप्रसारी=किरणों को बिखेरने वाला=हाथ फैलाने वाला । (३) वसूपलब्धं=रश्मि लेने के लिये—धन पाने के लिये ।

३ नई कलियो से लदे हुए मनोहर चम्पक वृक्ष ऐसे लगते थे जैसे वसन्त की वनस्थली ने हजारो बत्तियो के दीपक वृक्ष लगा दिये हों ।

४ कटक से भरी हुई, खडी नाल के ऊपर अपनी पखडियो को समेटे हुए नव कमल ऐसा उठ खडा हुआ जैसे जल के भीतर रहने के कारण शीत से भयभीत होकर वसन्त की गरमाहट पाने की इच्छा से बाहर निकल आया हो ।

५ बडी बडी आँखो वाली स्त्रियों के कान मे खोसी हुई अशोक की पत्तियाँ यद्यपि नई थी, उनमे उन स्त्रियो की चञ्चल आखों की प्रभा से थोडी पत्तियो का सा रग आ गया ।

प्रादुर्बभूवुर्नवकुड्मलानि स्फुरन्ति कान्त्या करवीरजानि ।
प्रवासिनां शोणितपाटलानि तीरीफलानीव मनोभवस्य ॥६॥

वन्ध्योऽपि सालक्तकपादघातं लब्ध्वा रणन्नूपुरमङ्गनानाम् ।
उद्भूतरोमाञ्च इवातिहर्षात् पुष्पाङ्कुरैरास नवैरशोकः ॥७॥

महीध्रमूर्ध्नि भ्रमरेन्द्रनीलैर्विभक्तशोभः शिखिकण्ठनीलैः ।
गृहीतभास्वन्मुकुटानुकारस्ततान कान्तिं नवकर्णिकारः ॥८॥

वासन्तिकस्यांशुचयेन भानोर्हेमन्तमालोक्य हृतप्रभातम् ।
सरोरुहामुद्धृतकण्टकेन प्रीत्येव रम्यं जहसे वनेन ॥९॥

समीरणानर्तितमञ्जरीके चूते निसर्गेण निषक्तभावाः ।
पुष्पावतंसेषु पदं न चक्रुर्दीप्तेष्विवाशोकवनेषु भृङ्गाः ॥१०॥

विनिद्रपुष्पाभरणः पलाशः समुल्लसत्कुन्दलतावनद्धः ।
उद्भूतभस्मा मधुनेव रेजे राशीकृतो मन्मथदाहवह्निः ॥११॥

६. करवीर की नई-नई रक्त वर्ण कलियां ऐसी फूट निकलीं जैसे वे पथिकों के मन में स्थित मनोभव (कामदेव) के तीखे बाण निकल रहे हों।

७. अशोक वृक्ष यद्यपि बोझ था फिर भी मारे प्रसन्नता के उसके तने से नये-नये अकुंर फूट निकले जैसे उसे रोमाञ्च हो आया हो, जब उन्हें सुन्दरी युवतियों ने महावर से रञ्जित और नूपुरों से झङ्कृत पैरों से मारा।

८. पर्वत के शिखर पर एक नया कर्णिकार का वृक्ष अपना सौंदर्य बिखेर रहा था। उसकी प्रभा इन्द्रनीलमणि के समान भौंरों से विभक्त हो गई थी और उस पर नीले कण्ठ वाले मयूर, चमचमाते मुकुट का अनुकरण कर रहे थे।

९. कमलों के वन ने जब यह देखा कि उसके शत्रु, हेमन्त के प्रभाव को वसन्त के सूर्य की रश्मियों ने नष्ट कर दिया तो वह प्रेम से दिल खोल कर हंसने लगा जैसे उसका कांटा निकल गया हो।

१०. भौंरे जो स्वभाव से आम्र के वृक्षों पर जिनकी मञ्जरी हवा से नाच रही थीं, मँडरा रहे थे, उन्होंने अशोक के वन में पैर नहीं रखा जहाँ उनके (अशोक के) सर पर फूल ऐसे सजे थे जैसे उसमें आग लगी हो।

११. खिले हुए पुष्पों से विभूषित पलाश का वृक्ष जिसमें पुष्पों से लहलहाती कुन्द लता लपटी हुई थी, ऐसा चमचमा उठा जैसे वसन्त ने कामदेव को जलाने वाली अग्नि के ढेर से भस्म को उखेड़ते हुए कुरेद दिया हो।

वसन्तदीप्तातप खेदिताना महीरुहा वातचला प्रवाला.।
जिह्वा यथा विद्रुमभङ्गताम्रा निष्कासिता रेजुरतिश्रमेण ॥१२॥

प्रालेयकालप्रियविप्रयोग–ग्लानेव रात्रि क्षयमाससाद।
जगाम मन्द दिवसो वसन्तक्रूरातपश्रान्त इव क्रमेण ॥१३॥

तत. स्मरस्याहवधामकल्पं क्षोणीपतिभ्रान्तशिलीमुखाङ्कम्।
उद्यानमासेवत रक्तदीप्ति सतानभास्वत्करवीरकीर्णम् ॥१४॥

रम्याणि रामानुगतो विहङ्गपक्षानिलानर्तितपल्लवानि।
उद्भ्रान्तभृङ्गाणि लतागृहाणि सम्भावयामास रहोविहारै. ॥१५॥

त्वमप्रमाद कुरु नूपुराङ्घ्रौ भर क्षण काञ्चि नितम्बभारम्।
इतीव तस्मिन्विहरन्नृपस्त्रीकक्ष्यातुलाकोटिपुटैर्निनेदे ॥१६॥

१२ वसन्त की झुलसाती हुई गरमी से खिन्न, और हवा से सञ्चालित वृक्षो के नव प्ररोह ऐसे शोभायमान हुए जैसे बडे श्रम से उन्होने अपनी, टूटे हुए मूँगे के समान ताम्रवर्ण जिह्वा बाहर निकाल दी हो।

१३. अपने प्रियतम हेमन्त से विछोह हो जाने से रात्रि जैसे म्लान हो जाने के कारण क्षय होने लगी और दिन भी वसन्त की कडी धूप से जैसे थक कर क्रमश मन्द गति से चलने लगा।

१४ तब पृथ्वी के स्वामी (दशरथ) उस उद्यान मे चले गये जिसमे भ्रमण करते हुए भौंरे झुड के झुड विचर रहे थे, जहाँ फूले हुए रक्त वर्ण करवीर के वृक्ष कतार की कतार लगे थे और जो (उद्यान) कामदेव की समर भूमि की तरह लग रहा था।

टिप्पणी—श्लेष: आहव धाम के सम्बन्ध मे (१) भ्रान्त=भ्रमण करते हुए=चलते हुए। (२) शिलीमुखा —भ्रमर=बाण (३) भास्वत् करवीर = फूले हुए करवीर-वृक्ष=चमकते हुए हाथों के वीर। (४) रक्तदीप्ति=ताम्रवर्ण=रुधिर से चमकते हुए।

१५ स्त्रियो के साथ वे (दशरथ) उन लताकुञ्जो मे एकान्त विहार करने लगे जहाँ भौंरे उड रहे थे और जहाँ पक्षियो के पखो के फडफडाने से निकली हुई हवा से पेडो की नन्ही डालियाँ नाच रही थीं।

१६ उस लतागृह मे विहार करती हुई स्त्रियों के नूपुर और करधनी यह कह कर एक दूसरे का मजाक उडा रहे थे—'हे नूपुर, तुम पैरो मे तनिक भी प्रमाद न करना (अर्थात् अच्छी तरह बजना)। आर्य मेखले! तुम जरा नितम्बो के बोझ को क्षण भर के लिये उठाये रहना।

चिक्षेप बाला मुहुरर्धदृष्टि पत्यावनङ्गक्षतधैर्यवृत्तिः ।
दूरस्थपुष्पस्तवकावभङ्गव्याजेन संदर्शितबाहुमूला ॥१७॥

पत्या परस्या नु विधीयमाने विलासवत्याश्चरणान्तरागे ।
अन्यत्र युक्तोऽपि बबन्ध रागं लाक्षारसस्तत्प्रतिपक्षनेत्रे ॥१८॥

पातुं सुदत्या वदनारविन्दमादाय दृष्टो ललनाभिरीशः ।
अपुष्परेणु व्यथितेऽपि तस्याश्चिक्षेप नेत्रे मुखगन्धवाहम् ॥१९॥

पुष्पावभङ्गे निजहस्तकान्त्या विन्यस्तरागं कठिनं पलाशम् ।
प्रवालकृत्ये विनियोजयन्ती भर्त्रा परा सस्मितमालिलिङ्गे ॥२०॥

१७. किसी बाला ने जिसका मन कामदेव ने चञ्चल कर दिया था, बहुत ऊँचे पर फूले हुए पुष्पों के गुच्छे को तोड़ने के बहाने अपने कंधे को उघार दिया और अपने पति की ओर बार-बार तिरछी चितवन से देखने लगी।

यथा—कयाचिदाविष्कृत बाहु मूलया
तरुप्रसूना व्यपदिश्य सादरम् ।
—किरातार्जुनीयम्—८–१८ (भारविः)

जय देव कहते है—
आ षोडशाभवेद् बाला तरुणी त्रिंशका मता ।
पञ्चपञ्चाशका प्रौढा भवेद् वृद्धा ततः परम् ॥

१८. जब एक हावभाव करने वाली स्त्री के पति (दशरथ) उसके पैरों में महावर लगा रहे थे तो उस महावर ने अपनी ललाई को उसकी सौत के आँखों में उतार दिया।

भावार्थ—दशरथ के इस कृत्य से उस स्त्री की सौत की आखें लाल हो गयीं।

१९. राजा ने एक सुन्दर दाँतों वाली स्त्री का मुखपान करने के लिए उसके मुखारविन्द को उठाया तो, पर चूंकि अन्य ललनाएं देख रही थीं अतः वह अपने मुख की सुरभित साँस उसकी आँखों में जो अभी तक पुष्पों के पराग से क्लान्त नही हुई थीं, केवल फूंक कर रह गये।

विशेष—जानकीहरण की एक हस्तलिखित प्रति के हाशिये पर लिखा है—
'सादरं चुम्बनं पानमुच्यते'

देखिये—"पपौ निमेषालसपक्ष्मपंक्ति
रुपोषिताभ्यामिव लोचनाभ्याम् ।"—रघुवंश, २–१९। (कालिदास)

२०. एक सुन्दर कामिनी जब कठिन पलाश के वृक्ष से गुलदस्ता बनाने के लिये फूल तोड़ रही थी तो उसकी रुचिर हथेलियों की ललाई पलाश में आ गई। उस समय उसके पति (दशरथ) ने उसे मुसकरा कर लपटा लिया।

स्निग्धद्विजालीरुचिर प्रियङ्गुश्यामद्युतिश्चारुतमालकान्ता ।
बिर्भषि गन्धाहृतभृङ्गचक्र सन्माधवीमण्डपमेतदास्यम् ॥२१॥

मध्येललाट तिलकस्य वृत्तिरोष्ठद्युतिर्भाति च पाटलेयम् ।
पुन्नागसयोगविभूषितायाश्चेतश्च ते यातमशोकभावम् ॥२२॥

कि कौतुकेन श्रमकारिणा ते सृज त्वमुद्यानविहाररागम् ।
वाले त्वमस्योपवनस्य लक्ष्मीरित्येवमूचे ललना सखीभि ॥२३॥

प्रियेण कर्णे विनिवेशितस्य तन्व्या नवाशोकदलस्य राग ।
आनीलया नेत्ररुचा निरस्तस्तस्या जगामेव विपक्षचक्षु. ॥२४॥

२१ तुम्हारे अतीव रुचिर केश के अन्तभाग, प्रियगुलता के समान श्यामल तुम्हारा लावण्य, सुन्दर दन्तपक्ति-युक्त तुम्हारा मुखड़ा जिसका सुरभि निश्वसन कामीजनों को अपनी ओर आकृष्ट करता है—इन सब के कारण तुम माधवी लता के एक ललित निकुञ्ज के समान लगती हो।

टिप्पणी—माधवी लता मण्डप के सदर्भ मे—(१) चारुतमालकान्ता=तमाल मे लपटने के कारण सुन्दर । (२) स्निग्धद्विजालीरुचिर=पक्षियों के समूह के कारण मनोहर (३) प्रियगुश्यामद्युति=प्रियगु लता के ससर्ग से श्याम कान्ति (४) गन्धाहृतभृगचक्र जिसकी सुगध भृगों के समूह को आकृष्ट करती है।

२२ तुम्हारे माथे के बीचोबीच तिलक का चिह्न है। तुम्हारे अधरो पर ललाई सोह रही है और तुम्हारा हृदय पुरुष श्रेष्ठ (दशरथ) के सयोग से विभूषित होने के कारण शोक-रहित हो गया है।

२३ "हे वाले ! खेल कूद मे परिश्रम करने से तुम्हें क्या लाभ ? उद्यान मे विहार करने की अभिलाषा छोड दो। तुम तो स्वय उपवन की लक्ष्मी हो।' ऐसा उसकी सुन्दरी सखियो ने उससे कहा।

टिप्पणी—इस बाला के सौंदर्य वर्णन मे कवि ने श्लोक २१-२२ मे 'प्रियगुलता', 'माधवी', 'मण्डप', 'पाटल', 'पुन्नाग' एव अशोक का प्रयोग किया है। यह कह कर २३वें श्लोक मे उस बाला को 'उपवनस्य लक्ष्मी' कहते हैं।

२४ अशोक की एक कोमल पत्ती जिसे उसके प्रियतम ने उस कोमलाङ्गी के कान मे खोस दिया था उसका रग उसके आनील नेत्रो से तिरस्कृत होकर उसकी सौत की आखो मे चला गया।

टिप्पणी—यही भाव इस सर्ग के १८ व श्लोक का भी है।

हारिप्रलापोऽथ निधिर्गुणानां निधाय चक्षुर्मदमन्दपातम् ।
पर्यन्तभूमौ निकटोपयातामुवाच वाचं प्रतिहाररक्षीम् ॥२५॥

कुर्वन्ति लोभेन विलोकयन्त्यः कुरङ्गनेत्रा विलसत्प्रसूनम् ।
शुभाभिरेनं नयनप्रभाभिः शारत्विषं पुष्पतरुं तरुण्यः ॥२६॥

विभाति भृङ्गीसरणी सरन्ती गन्धाहृता चम्पककुड्मलाग्रे ।
अन्तं प्रदीपस्य निषेवमाणा धूमावली कज्जलरेखिणीव ॥२७॥

विलोकयाक्ष्णोः शितिकान्तिजालैरुदन्यया वारिविगाहितायाः ।
रक्तोत्पलं तन्निकटप्ररूढमिन्दीवरत्वं गमितं हरिण्याः ॥२८॥

सञ्छादिते पद्मरजोवितानैः परिभ्रमन् वारिणि राजहंसः ।
स्ववर्त्मरेखाभिरसौ विभज्य प्रयच्छतीवाब्जवनं खगेभ्यः ॥२९॥

इयत्प्रमाणोऽपि सरःप्रदेशस्तव प्रसादेन ममास्तु भोग्यः ।
इत्येष सन्दर्शयतीव मद्गुर्हंसाय शोषाय विसारितांसः ॥३०॥

२५. तब मनोहारी वचन बोलने वाले, गुणों के भाण्डार (दशरथ) प्रसन्नता से आस पास की भूमि पर मधुर दृष्टिपात करते हुये, उस स्थान की देख रेख करने वाली परिचारिका से, जो उनके निकट चली आ रही थी, बोले । (उससे भी सौजन्यवश दो-दो बातें कीं, यह भाव है ।)

२६. हरिणी की सी आँखों वाली युवतियों ने इस फूल से लदे हुए वृक्ष को अपनी सुन्दर आँखों की ज्योति से बड़े चाव से देखकर रंग-विरंगा कर दिया ।

२७. चम्पा की कलियों की सुगंध से आकृष्ट हो कर उसके ऊपर एक अविच्छिन्न पंक्ति में मँडराती हुई भ्रमरों की परम्परा ऐसी शोभायमान हुई जैसे प्रदीप की लौ के ऊपर घूमती हुई कज्जल रेखा युक्त धुंए की पंक्ति ।

२८. देखो जब पानी पीने की इच्छा से वह हरिणी पानी (झील) में घुसी तो उसकी आँखों की नीली प्रभा-जाल पड़ने से पास में उगे हुए लाल कमल (रक्तोत्पल) नीले कमल (इन्दीवर) से लगने लगे ।

२९. कमल-पराग के जाल से ढँके हुए जल पर तैरता हुआ यह राजहंस अपनी मार्ग-रेखा से कमलों के समूह का विभाजन कर जैसे पक्षियों को दे रहा हो ।

३०. वह मद्गु (एक जल पक्षी विशेष) अपने पंखों को सुखाने के लिये फैला कर जैसे हंस को दिखाता रहा हो कि 'सरोवर का इतना भाग हमारे उपभोग के लिये, कृपया छोड़ दीजिये ।'

पद्म सितोऽयं पवनावधूतैर्निर्धोतरागो नु तरङ्गलेशैः ।
सम्भावितो नु द्रुहिणेन तावत् कृतादिकर्मापि न यावकेन ॥३१॥

ततः सलीलं सलिलं विभिन्दन्नेवं वदन्नेव वराङ्गनाभिः ।
वृतो वृषेन्द्रोपमखेलगामी स दीर्घिका दीर्घभुजो जगाहे ॥३२॥

तस्योरसि क्षत्रकुलैककेतोस्तरङ्गदोषा कमलाकरेण ।
न्यस्ता मुहुः पङ्कजरेणुपङ्क्तिः सौवर्णं सूत्रश्रियमाततान ॥३३॥

पद्माकरो वारि विगाहमान कामीव रामाजनमूरुदघ्नम् ।
वीचीकराग्रेण नितम्बभागे व्यास्फालयामास शनैः सशब्दम् ॥३४॥

तस्यावगाहे वनिताजनस्य दूरीकृतः पीननितम्बचक्रै ।
लब्धप्रवेशस्तनुपूदरेपु स्तनैरुदासेऽथ सरस्तरङ्गः ॥३५॥

क्रीडापरिक्षोभरयेण तासामुत्सारिते पङ्कजरेणुजाले ।
कुसुम्भरक्तादिव कञ्चुकात्तत् कृष्टं बभासेऽम्बुरुहाकराम्भः ॥३६॥

३१. यह कमल क्या इस कारण सफेद हो गया है कि इसके रंग को वायु सञ्चालित लहरियो के जलकणो ने धो डाला है। अथवा क्या ब्रह्मा ने इसको अपनी सब से पहिली कृति होते हुए भी उसका लाक्षा रस से आदर नही किया।

३२ इस प्रकार बातचीत करते हुए, एक श्रेष्ठ बैल के समान खेलते हुए चलने वाले, दीर्घ बाहु, दशरथ, वराङ्गनाओ से घिरे हुए, खेलते-कूदते, पानी को चीरते हुए उस सरोवर मे पैठे।

३३ कमलो के भाण्डार उस सरोवर ने, अपने तरग रूपी हाथो से, क्षत्रिय कुल के एक मात्र केतु, दशरथ के वक्षस्थल पर, कमलो के पराग की एक पंक्ति खींच दी जो सोने की डोरी के लावण्य का रह रह कर विस्तार कर रही थी।

३४ कमलो से भरा वह सरोवर, जाँघ तक जल मे घुसी हुई युवतियो के नितम्ब भाग को, लहरियों की अगुलियो से, कामी पुरुष की तरह शब्द करता हुआ, धीरे-धीरे थपथपा रहा था।

३५ जब युवतियाँ जल मे घुसीं तो उनके मासल नितम्ब के चक्र से खदेडी हुई एक लहर उन युवतियो पतले उदर मे पहुँच गई पर वहाँ से भी स्तनो ने उसे बाहर ढकेल दिया।

३६ कमलो का पराग-जाल उनकी (युवतियो की) क्रीडा से आलोडित होने के कारण बहुत क्षुब्ध हो गया। तब कमलो से भरा हुआ उस सरोवर का जल ऐसा चमकने लगा जैसे वह उनकी (युवतियो की) कुसुम्बी कञ्चुकी से निचोड कर निकाला गया हो।

रामाभिरुत्कण्टकदण्डमग्रे सम्भावितं न च्छिदया सरोजम् ।
इन्दीवराणामुदहारि पङ्क्तिर्दीना मृदुष्वेव जनस्य शक्तिः ॥३७॥

बालापरिष्वङ्गसुखाय पत्युरन्तर्जलावारितमूर्ति यातुः ।
विघ्नाय वैमल्यमपां बभूव व्यर्थः प्रसादो हि जलाशयानाम् ॥३८॥

भृङ्गा निलीनेन सरोजखण्डे योषिद्द्वितीयेन नराधिपेन ।
उत्सारिता वक्तुमिवापरासां कर्णान्तमीयुर्निहितावतंसम् ॥३९॥

नृपेण केलीकलहेऽपरस्याश्छिन्नच्युतस्याम्बुजिनीपलाशे ।
हारस्य वीचीकणिकाः समीपे पूर्वस्थिताः संवरणान्यभूवन् ॥४०॥

क्रीडाविमर्दे वलयस्य भिन्नभ्रष्टस्य चिक्षेप विकृस्य खण्डम् ।
स्वच्छे जले बालमृणालभङ्गशङ्काहृतः शङ्खमयस्य हंसः ॥४१॥

३७. सामने फूले हुए कमल को, जिसके नाल में काँटे थे, उसे तोड़कर उसका आदर नहीं किया । (परन्तु) उन्होंने नील कमल की पंक्ति उखाड़ डाली (क्योंकि उनमें काँटा नहीं था) । मनुष्य की क्रूर शक्ति का उपयोग निर्बल ही पर होता है ।

३८. एक बाला के आलिङ्गन का सुख उठाने के लिये, जल के भीतर डुबकी लगा कर अपने शरीर को छिपाये हुए तैरने में निर्मल जल ने पति के सामने विघ्न उपस्थित कर दिया । जलाशय की स्वच्छता भी कभी-कभी व्यर्थ हो जाती है ।

विशेष--जल की निर्मलता के कारण जल के भीतर उनका शरीर दिखलाई पड़ता था, अतः छिप कर आलिंगन करने जाना व्यर्थ हो गया । यह भाव है ।

३९. एक युवती के साथ छिपे हुए राजा से भगाये हुए भृङ्ग एक दूसरी युवती के गहने से विभूषित कान के पास जैसे कुछ कहने चले गये ।

विशेष—यह कहने के लिये कि राजा एक दूसरी युवती के स्थान अमुक साथ में छिपे हैं । यह भाव है ।

४०. जल-विहार के समय, लपटा-झपटी में राजा से किसी युवती का (मोती का) हार टूट कर कमल दल पर बिखर गया । उस दल पर पहिले ही से, समीप में पड़े हुए, लहरियों के जलबिन्दुओं ने उसे (हार को) अपने में छिपा लिया ।

विशेष—जलबिन्दुओं के साथ जो स्वयं मोती के समान थे, मिलजुल जाने से यह पता नहीं चलता था कि कौन जलबिन्दु है और कौन मोती है । यह भाव है ।

४१. जल-क्रीड़ा में परस्पर संघर्ष के कारण एक युवती का शंखों से बना कंकण जल में गिर पड़ा । हंस ने उसे स्वच्छ जल में पड़ा हुआ छोटे कमल के टुकड़े की शंका से खींच कर निकाल लिया और फिर फेंक दिया ।

विशेष—जब यह देख लिया कि वह कमल का टुकड़ा नहीं है तो उसे तुरन्त फेंक दिया । यह भाव है ।

रोधोलतामण्डपयातकान्तासम्भोगतः सर्पति काञ्चिनादे।
ररक्ष राजानमथ व्यलीकादुत्रासमुक्तः कलहसनादः ॥४२॥

निरुद्धहासस्फुरिताधरोष्ठः सद्यः समाविष्कृतरोमहर्षः।
जलावमग्नप्रमदोपगूढेरुद्भासकस्तस्य बभूव गण्डः ॥४३॥

फुल्लं यदीदं कमलं किमेवमत्रैव नीलोत्पलयोर्विकासः।
इत्यात्तशङ्को वदनं सुदत्या हंसः सिषेवे न सरस्तरन्त्याः ॥४४॥

सुगन्धिनिश्वासगुणावकृष्टं मुखे पतन्तं करपल्लवेन।
दुर्वारमन्तःसलिलप्रवेशात् तत्याज काचिद् भ्रमरीसमूहम् ॥४५॥

मत्स्येन चीनांशुकपृष्ठलक्ष्यकाञ्चीमणिग्रासकुतूहलेन।
आघ्राय मुक्तोपनितम्बमेका सत्रासभुग्नभ्रु चिरं चकम्पे ॥४६॥

तत्याज नो सव्यपदेशमन्या व्युदस्तवासाः सलिलं नृपेण।
स्थानप्रयुक्तः कपटप्रयोगः कंचिद्विपत्तेर्हि जनं भुनक्ति ॥४७॥

४२. क्रीडा सर के तट पर गई हुई रमणी के साथ सम्भोग के समय, मेखला की झनझनाहट से डरे हुए हंस के कलरव ने दशरथ की अप्रिय बात के कष्ट से रक्षा की। अर्थात् सम्भोग का भेद न खुल पाया।

४३. हँसी रोकने के कारण फडकते हुए ओठ और सहसा रोमाञ्च हो आने से उनके (दशरथ के) चेहरे ने स्पष्ट कर दिया कि उन्होंने जल के भीतर एक युवती का गाढ आलिङ्गन किया है।

४४. "यदि यह श्वेत कमल है तो इसमे दो नीलोत्पल क्यों खिले हैं"—इस प्रकार जब हंस की शंका का समाधान हो गया तो वह सुन्दर दाँतो वाली, तैरती हुई युवती के फेर मे नहीं पडा।

४५. एक लडकी जब अपने सुकोमल हाथो से, उसके सुरभिनिश्वसन से आकृष्ट होकर भ्रमरियो के एक झुंड को जो उसके मुख पर टूटा पडता था, नहीं भगा सकी तो उसने गहरे पानी के भीतर पैठ कर उनसे अपना पिंड छोडाया।

४६. एक दूसरी स्त्री जिसकी भौंहें डर से सकुचित हो गई थीं, बहुत देर तक काँपती रही, जब एक मछली, उसकी चीन के रेशमी कपडे की बनी हुई कुरती के भीतर से दिखलाई पडने वाले गहने को खाने के लिये आई और उसके नितम्बों के पास सुंघ-साथ कर चली गई।

४७. जब राजा ने एक स्त्री को नग्न कर दिया तब वह बहाने से जल के बाहर नहीं निकली। ठीक समय पर किया गया बहाना, आई हुई विपत्ति से मनुष्य की रक्षा करता है।

हृतान्तरीया हृदयेश्वरेण व्रीडोपतप्ता पयसः प्रसादात् ।
व्यर्थप्रणामाश्रुनिपातवृत्तिः काचिज्जलं सम्भ्रमयाञ्चकार ॥४८॥

सामि प्रबुद्धस्य कुशेशयस्य कोशे मुखन्यासविरुद्धदृष्टिम् ।
स्प्रष्टुं प्रयेते कलहंसशावं निःशब्दमुत्खण्डित वीचिकाचित् ॥४६॥

सङ्क्षोभितोद्दामसरस्तरङ्गक्षिप्ता किलैका नृपतिं कुचाभ्याम् ।
आहत्य धृष्टत्वकृतापवादव्यपायरम्यं मुहुराललम्बे ॥५०॥

अन्या पुराणं निजमेव वीचिविक्षालिताङ्गेऽधिपतेः पृथिव्याः ।
पदं नखस्य स्फुटकुङ्कुमाङ्कं दृष्ट्वा परं संशयमाललम्बे ॥५१॥

किं राजहंसस्य शशाङ्कबिम्बच्छायामुपश्चञ्चुरियं प्रवालैः ।
बद्धा नु गन्धोज्ज्वलकेशराग्रच्छेदेषु दिग्धा नु सरोजकान्त्या ॥५२॥

भृङ्गोऽयमिन्दीवरमध्यपातसञ्चारितैस्तद्द्युतिरञ्जितो नु ।
निधाय वायं निजपक्षशोभामादत्त नु स्वादुमतः परागम् ॥५३॥

४८. एक दूसरी बाला जिसे उसके हृदयेश्वर ने नग्न कर दिया था, वह जल के पारदर्शक होने के कारण लज्जा से घबरा कर इधर-उधर जल में चक्कर काटने लगी, जब रोने पर भी उन्होंने उसके अनुनय विनय को नहीं माना ।

४६. एक हंस के बच्चे को जो एक अधखिले कमल में चोंच डुबो देने के कारण बाहर नहीं देख सकता था, एक रमणी ने चुपके-चुपके लहरियों को चीरते हुए पकड़ना चाहा ।

५०. क्षुब्ध होने कारण एक दीर्घ तरंग से आगे ढकेली जाकर, एक स्त्री ने अवश्य ही राजा को अपने स्तनों से धक्का दे दिया । उसका यह व्यापार इस कारण और सुखद हो गया क्योंकि ऐसी परिस्थिति में उस पर धृष्टता का दोष नहीं लगाया जा सकता था ।

५१. पृथ्वीपति (दशरथ) के शरीर पर, जो लहरों से धुलकर स्वच्छ हो गया था, अपने ही किये हुए पुराने नखक्षतों को, जिनमें कुंकुम लक्षित था, देख कर एक स्त्री को बड़ी शंका हुई ।

५२. चन्द्रबिम्ब की चोरी करने वाले (अर्थात् चन्द्रबिम्ब के समान उज्ज्वल) इस राजहंस की चोंच क्या प्रवाल से बंधी हुई है ? अथवा सुगंधित केसर वृक्ष के अग्रभाग के ये टुकड़े कमल की कान्ति से लपेटे हुए हैं ?

५३. क्या यह भृंग, नीलकमलों पर मँडराते हुए बैठकर उनकी कान्ति से रंग गया है ? अथवा इसने उन्हें अपने परों की शोभा दे कर उसके बदले में उनसे स्वादिष्ट पराग ले लिया है ?

पद्मा पदं पद्मवने विभिन्नवीणीकणार्द्रद्रुतयावकाङ्कम्।
चक्रे चिरं चारुतया नु लोभादित्यास कासामपि तत्र तर्कः ॥५४॥

यातो नु भृङ्गः पतितः पुरास्मिन् बीजत्वमेवं नु विरिञ्चिसृष्टिः।
विपाकनीलद्युति पद्मबीजं कोशादुदस्येति कयाचिदूचे ॥५५॥

प्रियोऽपरस्या गलितान्तरीये व्यापारयामास दृशौ नितम्बे।
तद्धस्तयन्त्रच्युतवारिधारा नालं बभूवास्य मुखारविन्दे ॥५६॥

सायं समादाय निकामपीतसुप्तद्विरेफं मुकुलं सरोजम्।
काचित्करास्फालितदीर्घदण्डं भर्तुर्भुवं कूजयति स्म कर्णे ॥५७॥

सा पद्मिनी पद्मविलोचनेभ्यो याते पतङ्गे विससर्ज भृङ्गान्।
समुच्छ्वसत्कौमुदगन्धलुब्धान् स्थूलानिवोढाञ्जनवाष्पबिन्दून् ॥५८॥

नूनं पती स्थावरजङ्गमानां पर्यायविश्रामपरार्थतन्त्री।
एकत्र मज्जत्यधिवारि सिन्धोरन्यो जहौ तत्कमलाकराम्भः ॥५९॥

५४. "क्या कमल वन के सौंदर्य से प्रलुब्ध होकर लक्ष्मी उसमें अपना चरण बहुत देर तक रख थी ? जिस कारण उनके महावर का रग लहरियो की फुहार से घुल कर उनमे (कमलो मे) आ गया ?" इस सम्बन्ध म ऐसा तर्क कुछ स्त्रियो का था।

५५ किसी (भोली भाली) स्त्री ने गहरे नीले रग के कमलगट्टे (बीज) को भीतर से निकाल कर कहा "क्या यह कोई भृङ्ग है जो पहिले किसी समय इसमे गिर गया था और बीज हो गया ? अथवा ब्रह्मा की सृष्टि इसी रूप म हुई थी।"

५६ प्रिय राजा ने अपनी आखो को एक दूसरी रमणी के नितम्ब की ओर फेरा जिस पर से वस्त्र सरक गया था। उस स्त्री के यत्रवत हाथ से फेंकी हुई धारा राजा के कमल सदृश मुख मे कमल नाल के समान हो गई।

५७ एक स्त्री, सन्ध्या के समय, एक लम्बे नाल-दण्ड मे लगे हुए कमल को तोड कर जिसकी कली के भीतर, भृङ्ग उसके रस को मनमाना पीकर सो रहे थे, उसे हाथ में लेकर पृथ्वी के स्वामी (दशरथ) के कान मे कुछ कहने लगी।

५८ सूर्य के चले जाने पर (अर्थात् सूर्यास्त होने पर) सरसी के कमल रूपी नेत्रों से, खिलते हुए कुमुद के सुगन्ध से प्रलुब्ध होकर भौंरे ऐसे निकलने लगे जैसे नवोढा के नेत्रो से कज्जल मिश्रित अश्रुबिन्दु निकल रहे हो।

५९ स्थावर और जङ्गम सृष्टि मात्र के स्वामियो ने एक दूसरे को विश्राम देने के लिये अवश्य ही एक अविच्छिन्न कार्यक्रम बना रखा है। (देखो) जब सूर्य, समुद्र मे डूबता है (अर्थात् जब सूर्यास्त होता है) तब उसके स्थान पर चन्द्रमा कमलो से भरे सरोवर को छोडता है। (अर्थात् चन्द्रोदय होता है।)

सरोजिनी तत्परिभुक्तमुक्ता मूर्च्छातुरेव स्तिमिता विरेजे ।
निद्राहृताम्भोजनिमीलिताक्षी रुग्णं मृणालीवलयं दधाना ॥६०॥

कृतोपकारस्य निधाय जग्मुर्द्वयं द्वयोरम्बुरुहाकरस्य ।
भृङ्गावलीष्वञ्जनमायताक्ष्यः पद्मेषु दन्तच्छदयावकं च ॥६१॥

सरः सहंसं सह कामिनीभिर्विहाय तुल्यो वृषवाहनस्य ।
विभूषितो लम्भितभूषजानिरध्यास्त सौधं वसुधाधिनाथः ॥६२॥

आकृष्टदृष्टिर्गगनस्य लक्ष्म्या लक्ष्मीभुजा वासरसन्धिभाजः ।
काचित्कुचानम्रतनुर्बभासे बाला सबालव्यजनैकपाणिः ॥६३॥

सकुङ्कुमस्त्रीकुचमण्डलद्युतिः प्रवासिनां चेतसि चिन्तयातुरे ।
निधाय तापं तपनः पतत्यसौ विलोलवीचावपरान्तसागरे ॥६४॥

इयं तनुर्वासरसन्धिचारिणी जगत्सृजो विद्रुमभङ्गलोहिनी ।
समं विधत्ते मुकुलं सरोरुहैर्हिरण्य बाहोरपि हस्तपङ्कजम् ॥६५॥

६०. जब राजा ने केलि के अनन्तर सरसी का परित्याग किया तो वह सरसी जिसकी कलाइयों में मृणालतन्तुओं का घुमावदार कड़ा पड़ा था और जिसकी कमल रूपी आँखें नींद से भारी हो गई थीं, चुपचाप पड़ी हुई ऐसी शोभायमान हो रही थी जैसे वह मूर्छा में हो ।

६१. तब वे बड़ी-बड़ी आँखों वाली रमणियाँ, वहाँ दो चीजें देकर चली गईं । उपकार करने वाले सरोवर के भृङ्ग समूह को अपनी आँखों का कज्जल, और कमलों को अपने होठों पर लगे, लाल रंग ।

६२. पृथ्वी के स्वामी (दशरथ) जिनकी पत्नी आभरणों से अलङ्कृत थीं, और जो स्वयं शिव के समान थे, उस सरोवर को अपनी प्रमदाओं सहित अपने महल में रहने लगे ।

६३. एक कामिनी से जिसके हाथ में बाल का बना पंखा था, जो सन्ध्याकालीन आकाश के सौंदर्य को निहार रही थी और जिसका शरीर कुचों के भार से नत था, उससे लक्ष्मीवान् (दशरथ) बोले ।

६४. (देखो) यह सूर्य जो स्त्रियों के, केसर से रञ्जित गोल स्तन के सदृश शोभायमान है, परदेसियों के चित्त में तपन छोड़ कर, तरङ्गों से आन्दोलित पश्चिमी समुद्रान्त में डूब रहा है ।

६५. वह देखो संसार का सृजन करने वाला (सूर्य), जिसकी सोने की तरह तमतमाती हुई रश्मियाँ, सन्ध्या में फैल रही हैं और जो फूटे हुए मूँगे के सदृश लाल है, ऐसा शरीरधारी वह सूर्य, कमल (की पंखुटियों) की तरह, अपने कमल के समान हाथ (हाथों की अंगुलियों को) सिकोड़ रहा है ।

अथ प्रमाणं पयस पयोनिधौ निमज्य संदर्शयतीव भानुमान् ।
करेण वीचीवलयस्य मस्तके विभाव्यमानस्फुरिनाग्रकोटिना ॥६६॥

विकीर्णं सन्ध्यारुणित शतक्रतोर्दिश' प्रदेशादभिनिष्पतत्तम ।
पतङ्गतेज' परिताप लोहितं जगत्क्रमेण व्रजतीव निर्वृतिम् ॥६७॥

हिमांशु विम्बे पुरुहूतदिङ्मुखेस्मितश्रिय बिभ्रति कोमलद्युतौ ।
विसृज्यमान तमसा नभस्तल जहाति निर्मोकमिवाञ्जनत्विषा ॥६८॥

अथैवमस्यावसरे वच'श्रिय समीक्ष्य निधामुपनीतमास्थया ।
अपाययन्त प्रमदा मदालसा. स्खलद्गिरास्त मधु लम्भितादरा. ॥६६॥

प्रियोपनीत पिबतोऽधिवासितं नृपस्य गण्डूषमधु प्रकामत. ।
बभूव दन्तच्छदपल्लवस्तदा निपीतपानावसरोपदशक. ॥७०॥

प्रियेण वध्वा मधुलासितोत्पलं विपक्षगोत्रेण निगद्य लम्भितम्।
अपीतमप्यक्षि विधाय रागवत् ततान सद्य. श्रमवारि गण्डयो ॥७१॥

६६. (देखो) यह सूर्य, तरङ्गों के कंकण पहिने हुए समुद्र मे डूब कर, उसके मस्तक के ऊपर स्पष्टतया छिटकी हुई अपनी किरणो के अग्रभाग से यह दिखला रहा है कि जल की इतनी गहराई है।

६७ पश्चिम दिशा जिसका अन्धकार दूर हो गया था और जो सन्ध्या की आभा फैल जाने से लाल हो गई थी वह, सूर्य के तेज से सन्तापित जगत को जैसे क्रमश मोक्ष की ओर ले जा रही हो।

६८. जब कोमल कान्ति वाले चन्द्रबिम्ब ने पश्चिम दिशा के मुख पर अपना मुसक्राता हुआ सौंदर्य प्रदान किया तब आकाश ने अपने ऊपर से चमकते हुए कज्जल के आवरण को केंचुली की तरह छोड़ दिया।

६९. उनके (राजा के) उत्तम कथन के बाद जब युवतियो ने समझ लिया कि इस समय उनकी (राजा की) मनोवृत्ति बहुत अच्छी है (अर्थात् उनकी तबीयत मौजूं है) तब काम के मद से अलसायी और उसके कारण रुक-रुक कर बोलने वाली, राजा के प्रति आदर युक्त उन युवतियो ने एक परिचारिका की लाई हुइ मदिरा को उन्हें पिलाया।

७०. जब राजा अपनी प्रिया के मुंह से मुंह मे मुंह लगा कर उसकी दी हुई सुवासित मदिरा जी भर पी रहे थे, तब उसके किसलय के समान ओठो ने उस अवसर पर राजा के छक कर पिये होने पर भी, उत्तेजक द्रव्य का काम किया।

७१. जब प्रियतम (राजा) ने एक तरुणी को उसकी सौत का नाम लेकर कमलो से सुवासित मदिरा दी तो यद्यपि उसने नहीं पी फिर भी उसकी आँखें तुरन्त लाल हो गईं और उसकी कनपटी पसीने से भर गई। (ईर्ष्या और अपमान के कारण।)

त्विषा मुखेन्दोर्मुकुलत्वमम्बुजे करेण नीते सति शर्वरीकृतः ।
प्रियेक्षणस्य प्रतिबिम्बमाचरत् सरोजकृत्यं मधुभाजि भाजने ॥७२॥

यियासुना पङ्कजगर्भसौरभं मुखं तदीयं प्रतिबिम्बमूर्तिना ।
समन्मथेनेव तरङ्गितासवे मुहुश्चकम्पे चषके हिमांशुना ॥७३॥

विलासवत्यो मदघूर्णलोचना निरूपयन्त्यः शुचिरूप्यभाजने ।
स्थितस्य मुग्धा मधुनो न जज्ञिरे स्वरूपमिन्दुप्रतिरूपगोपितम् ॥७४॥

विधूय मानादपि पूर्वमासवः प्रवृद्धवामत्वमनन्यसाधितम् ।
स्मर नु तासां हृदये विलोचने वबन्ध रागं नु मुखे नु सौरभम् ॥७५॥

इति प्रवन्धाहितपानकातरं प्रियाङ्कतल्पे शयितं निशात्यये ।
व्यवोधयन्मङ्गलवन्ति वन्दिनो विधाय वाक्यानि विधातृतेजसम् ॥७६॥

जहिहि शयनमुद्गमस्य कालः समुपनमत्यनुरक्तमण्डलस्य ।
भुवनशिरसि कीर्णपादवाप्नो भवत इव क्षततामसस्य भानोः ॥७७॥

७२. जब मदिरा के प्याले में पड़े हुए कमल ने चन्द्र के समान मुख वाली स्त्रियों की मुख-श्री एवं चन्द्र की रश्मियों के कारण अपनी पंखुड़ियों को बन्द कर लिया तो चषक में उसकी प्रिया की आंखों के प्रतिबिम्ब ने कमल का काम कर दिया।

७३. चन्द्रमा का प्रतिबिम्ब, हलकी उफनाती हुई मदिरा से भरे चषक में कुछ ऐसा कांप उठता था जैसे वह काम-विह्वल होकर उस सुन्दरी के कमलगर्भ के समान सुवासित मुख में घुसना चाहता हो।

७४. इठलाती हुई भोली-भाली युवतियां, जिनकी आंखें मद से घूम रही थीं और चांदी के चषक के भीतर ध्यान से देख रही थीं, वे मदिरा के रंग को, चन्द्रमा के प्रतिबिम्ब से छिप जाने के कारण पहिचान नहीं सकीं।

७५. अभिमानिनी होते हुए भी, अन्य स्त्रियों से बढ़ी-चढ़ी, उस स्त्री की कुटिलता को दूर कर मदिरा ने अवश्य ही उसके हृदय में काम, आंखों में ललाई और मुख में सौरभ का सञ्चार किया।

७६. रात्रि बीतने पर चारणों ने मङ्गलाचरणों से, प्रजापति के समान तेजस्वी राजा को जो, मदिरा के निरन्तर पान से अशक्त होकर अपनी प्रिया की गोद रूपी शय्या पर सो रहे थे, जगाया।

७७. "कृपया शय्या को छोड़िये, देखिये सूर्य, जिनका मण्डल रक्त वर्ण है, जो अपने किरणों की प्रभा बाहर छिटका रहे हैं और जिन्होंने अन्धकार का नाश कर दिया है, उनका आपकी तरह पृथ्वी पर उठने का समय निकट पहुँच रहा है।"

विराम शर्वर्या हिमरुचिरवामोऽस्तशिखर
किमद्यापि स्वापस्तव मुकुलिताम्भोरुहदृश. ।
इतीवाय भानु प्रमदवनपर्यन्तसरसी
करेणाताम्रेण प्रहरति विबोधाय तरुण ॥७८।

समुत्तिष्ठन्त्येते निगडकृतझङ्कारमपर
शनैराकर्पन्त करटतटलीनालिवितती ।
निरस्यन्तो हेलाविधुतपृथुकर्णान्तपवनै-
र्द्विपास्ते दन्ताग्रस्थितकरमुदस्याननतटम् ॥७९॥

पादेनैकेन तिष्ठन् पटुपटहरवैर्बोधितस्ते मयूर
पश्चात्पक्षेण सार्धं चिरशयनगुरु पादमन्य वितत्य ।
उत्फुल्लोद्धूतपक्षच्युतहिमकणिकावृष्टिरावासयष्ट्या ।
दृष्ट्वा मार्तण्डधामोदयमुदितमुदोज्जृम्भते ताण्डवार्थी ॥८०॥

७८. "रात्रि समाप्त हो चुकी, चन्द्रदेव अस्ताचल को चले गये। हे मुकुलित कमलाक्षी ! तू क्या अब तक सो रही है !" यह कह कर क्रीडोद्यान तक फैली हुई सरसी को जगाने के लिये यह तरुण सूर्य अपने आताम्रकरो से थपकियाँ दे रहा है।

विशेष—श्लेष—कर=हाथ=रश्मि ।

७९ देखिये, यह आपके हाथी, अपनी अद्वितीय झंकार करती हुई जजीरो को धीरे धीरे खीच रहे हैं, अपनी कनपटी पर बैठी हुई मक्खियो के समूह को, इतमीनान से, अपने स्थूल कानो के अग्रभाग के फटफटाने से निकली हुई हवा से उडाते हुए, और अपने मुंह के किनारो से निकले हुए दाँतो के अग्रभाग पर जिनके सूंड पर पडे थे, उनको ऊपर करते हुए, उठ रहे हैं।

८० अपने अड्डे पर एक टाँग पर बैठा हुआ यह आपका मयूर, जो देर तक सोने के कारण गरुवाय गया था, उसने नगाडे की गम्भीर ध्वनि से जाग कर, दूसरे पैर को, अपनी पूंछ के साथ फैला कर, अपने फडफडाते हुए पखो से हिमकणो की फुहार गिराता हुआ, सूर्य की उदयश्री मे हर्षोत्फुल्ल, ताण्डव नृत्य करने की इच्छा से उठ खडा हुआ है।

पूर्वाद्रौ सूर्यपादे चरति विसृजता चन्द्रपादावदातं
तल्पं तेनानुचक्रे मलयतरुरसामोदितांसद्वयेन ।
उन्निद्रश्वेतपद्मप्रकरपरिकरच्छन्नवीचीवितानात्
दुद्यन्मन्दं सरस्तः सलिलगुरुबृहत्पक्षतिर्मल्लिकाक्षः ॥८१॥

इति तृतीयः सर्गः

८१. जब सूर्य अपनी प्रभा पूर्व के पर्वत पर बिखेर रहे थे, तब राजा दशरथ, जिनके कंधे मलय (नन्दन वन) क वृक्षों के रस से सुरभित थे, अपनी चाँदनी के समान उज्ज्वल शय्या से उठते हुए ऐसे लगते थे जैसे मल्लिकाक्ष हंस, जिसके बड़े-बड़े डैनों के नीचे के कुहर पानी के कारण भारी पड़ गये थे, वह धीरे-धीरे सरोवर के भीतर से, उठ रहा है, जिस सरोवर के चारों ओर फैले हुए लहरों के वितान को फूले हुए श्वेत कमल की परम्परा ने छिन्न-भिन्न कर दिया ।

तृतीय सर्ग समाप्त

चतुर्थः सर्गः

अथ स प्रविजृम्भिते शुचौ विधुरश्चेतसि पुत्रकाम्यया ।
सुबहुद्विजसात्कृताखिलद्रविण' स्तोममयष्ट भूपति ॥१॥

बहुशो विफले तदध्वरे सति पुत्रीयमनन्तर क्रतुम् ।
निखर्तयदृष्यश्रृङ्ग इत्यभिधानप्रथितस्तपोनिधि ॥२॥

उदियाय ततोऽस्य कश्चन श्रितचामीकरभाजन चरुम् ।
परिगृह्य रुचा परिज्वलन् ज्वलतो रोहितवाजिन पुमान् ॥३॥

प्रविवेश विशाम्पतिश्चरु चतुरंशीकृततेजसात्मना ।
प्रविधातुमरातितापितत्रिदशाश्रुस्रववृष्ट्यवग्रहम् ॥४॥

दयिताभिरनन्ततेजसा मुनिनासौ परिकल्पलम्भित ।
अशित प्रविभज्य भूपतेस्तिसृभिर्गर्भमबीभवच्चरु. ॥५॥

सुतयोर्भवत. स्म बालिजिद्भरतौ कोशलकेकयेन्द्रयो' ।
यमजौ यमतुल्यतेजसौ सुषुवाते समये सुमित्रया ॥६॥

१. तब चिन्ता-उद्विग्नचित्त पृथ्वीपति (दशरथ) ने पुत्र की कामना से, प्रज्ज्वलित अग्नि के सामने, अपने अखण्ड धन से बहुत से ब्राह्मणों का सत्कार कर अनेको यज्ञ किये।

२ जब बहुत से यज्ञ करने पर भी राजा विफल हो गये तब, अपने नाम से सुप्रसिद्ध, तपस्या के भाण्डार ऋष्यश्रृङ्ग ने पुत्रेष्टि यज्ञ किया।

३ (तब) प्रभा से देदीप्यमान एक पुरुष उस धधकती हुई अग्नि के भीतर से सुवर्ण पात्र मे 'चरु' लिये हुए निकला।

विशेष—'चरु'=हव्यान्न ।

४. तब देवताओ के स्वामी (दशरथ) जिनके तेज को उनकी आत्मा ने चार भागो में विभक्त कर दिया था, शत्रुओं से सतप्त देवताओ के बहते हुए आँसुओ के सुखाने के हेतु उस चरु (हव्यान्न का बर्तन) मे प्रविष्ट हुए।

५. उस असीम बलधारी तपस्वी द्वारा नियमित उस चरु को जब भूपति की तीनो रानियो ने विभक्त कर खाया तो उस चरु ने तीनों के भीतर गर्भ उत्पन्न कर दिया।

६. कौसलाधिपति और केकय राज की पुत्रियो (कौशल्या और कैकेयी) से क्रमानुसार बलि के जीतने वाले (राम) और भरत पैदा हुए और समय से सुमित्रा ने यमराज के समान तेजस्वी जुड़ौरा पुत्र (लक्ष्मण और शत्रुघ्न) पैदा किये।

अथ दिव्यमुनिप्रवर्तितप्रसवानन्तरजातकर्मणाम् ।
रुरुचे चरुजन्मनां दशा तनुसंदिशतदन्तकुड्मला ॥७॥

न स राम इह क यात इत्यनुयुक्तो वनिताभिरग्रतः ।
निजहस्तपुटावृताननो विदधेऽलीकनिलीनमर्भकः ॥८॥

मुखमाहृतधूलि गण्डयोः करघृष्टाञ्जनदानमस्य तत् ।
विबभौ सुरदन्तिनो यथा वदनं दन्तचतुष्टयोज्ज्वलम् ॥९॥

कतरस्तव तात उच्यतामिति धात्रीवचनप्रचोदितः ।
रुचिरेण करेण निर्दिशन् जगदीशं प्रमदेन सन्दधौ ॥१०॥

अयि दर्शय तत्किमुन्दुराद् भवतो पात्तमिति प्रचोदितः ।
प्रविदर्शयति स्म शिक्षया नवकं दन्तचतुष्टयं शिशुः ॥११॥

इतरेऽपि सरोजशीतलैर्मृदुभिः साञ्जनराजिभिः करैः ।
शयने समवाहयन् पितुश्चरणौ मातृजनेन चोदिताः ॥१२॥

७. प्रसव के अनन्तर जब स्वर्ग के ऋषि ने उनका जातकर्म संस्कार कर दिया तब चारु से उत्पन्न उन चारों बालकों का शरीर छोटे-छोटे दांतों के निकल आने पर बड़ा शोभायमान हुआ।

८. 'राम यहां नहीं हैं। कहां चले गये' ऐसा जब स्त्रियां (खेलवाड़ में) कहने लगीं तो उनके सामने ही उस बालक (राम) ने बहाने से हाथों से अपना मुंह ढक लिया जैसे वहां हैही नहीं।

९. धूल से भरा हुआ उनका शरीर जिसमें चार दांत झलक रहे थे, और हाथों की रगड़ से काजल से पुते हुए दोनों गाल से वे (राम) उज्ज्वल चार दांत वाले ऐरावत की तरह शोभायमान लगते थे।

१०. 'बताओ हे पुत्र, इन दोनों में कौन तुम्हारा पिता है, इस तरह से धाय से पूछे जाने पर वह (राम) जगदीश की ओर सुन्दर हाथ से इशारा कर, बड़े हर्ष से उनसे जाकर लिपट गया।

११. "अरे, बताओ तो तुमने चूहे से क्या लिया है?" ऐसा पूछे जाने पर पहिले ही से सिखाया-पढ़ाया वह बच्चा (राम) अपना नये-नये चार दांत दिखा देता था।

१२. अपनी माताओं से सिखाये जाने पर और दूसरे बच्चे भी (लक्ष्मण, भरत, शत्रुघ्न) शय्या पर लेटे हुए पिता के पैर, कज्जल से शोभायमान, मुलायम हाथों से दबाने लगते थे।

शयनीयगतस्य भूपतेः शिशवः क्रोडनिवेशवाञ्छया ।
निशि वर्धितमातृसपदं कलहं कोमलजल्पितं दधुः ॥१३॥

क्रमशश्चरुजन्मनो वपुः परिवृद्धिर्महिता महीयसः ।
प्रतिवासरमायुषः क्षयस्त्रिदशारेरपि तुल्यमासतुः ॥१४॥

धनुषि प्रतिलब्धपाटवे नृपतेरन्यतरेद्युरात्मजे ।
भवनं भुवनस्य शासितुः प्रतिपेदे मुषितक्रतुर्मुनिः ॥१५॥

स्वकिरीटमणिप्रभाम्बुभिः प्रथमक्षालितपादपङ्कजम् ।
नृपतिः समवीभवन्मुनिं पुनरुक्तैरिव पाद्यवारिभिः ॥१६॥

कुशलं परिपृच्छ्य सर्वगं मुनिरध्यासितरत्नविष्टरः ।
उपविष्टमसौ भुवस्तले विरतं राजमुनिं जगौ गिरम् ॥१७॥

स्वजनादपि लब्धवैशसे नृपतित्वे शठभृत्यसंपदि ।
प्रियवादिरिपावपि स्थितो नृप दिष्ट्या कुशलेन वर्तसे ॥१८॥

१३ रात्रि के समय, सोने के हेतु शय्या पर पड़े हुए, भूपति के वक्ष पर लेटने के लिये, वे बच्चे, बड़ी प्यारी बोलियो से आपस मे लड़ते-भगड़ते थे, जिससे उनकी माताओ का वात्सल्य स्नेह उमड़ पड़ता था ।

१४ चरु से उत्पन्न उस ऐश्वर्यशाली (राम) की अभिलषित शरीरोत्कर्ष दिन पर दिन बढ़ता जाता था और उसी प्रकार देवताओ के शत्रु (रावण) की आयु प्रति दिन घटती जाती थी ।

१५ जब महाराज के पुत्र धनुर्विद्या मे पारङ्गत हो गये तो एक दिन उस भुवन के शासन-कर्ता (दशरथ) के घर पर एक तपस्वी आये जिनका यज्ञ विध्वस कर दिया गया था । (अर्थात् जिनका यज्ञ राक्षसो ने विध्वस कर दिया था ।)

१६ राजा ने ऋषि के चरणकमलो पर नत होने के समय, पहिले अपने मुकुट से निकलती हुई किरण रूपी जल से उन चरणो का प्रक्षालन किया, फिर उन्हें धोने के लिये अर्घ्य का जल समर्पित किया । जैसे पुनरुक्ति की भाँति एक ही काम दोहारा दिया गया हो ।

१७ जब मणियो के आसन पर बैठे हुए मुनि से भूमि पर बैठे हुए राजर्षि (दशरथ) चारो ओर का कुशल वृतान्त पूछ कर चुप हो गये, तब (आगन्तुक) मुनि राजा से बोले ।

१८ हे राजन्, आप कैसे भाग्यवान् हैं कि यद्यपि आप के राज्य मे अपने ही सम्बन्धियो से घात का भय बना रहता है, जो बदमाश नौकरो से भरा है और जहाँ शत्रु भी मिठबोलने हैं, वहाँ आप बड़ी कुशलता से शासन कर रहे हैं ।

द्विपतो भवबन्ध भेदिना दहतश्चेतसि योगवह्निना ।
न जहाति विपत्तिरद्य नः परसंपत्तिषु निःस्पृहानपि ॥१९॥

अनुयान्ति समन्ततो मखे निपतच्छोणितवृष्टयो दिशः ।
पवनाहतवृंतविच्युतप्रसवाः किंशुककाननश्रियः ॥२०॥

मृषतामपि नस्तपस्यतां धृतवैकङ्कतसाधनस्रुचाम् ।
स्फुरदर्चिषि देवतामुखे हुतमद्यश्व उदस्यतेऽरिभिः ॥२१॥

सदसः समयेषु वृत्तये विधिनाऽऽहूत हुतांशभाजिनः ।
युधि तं जहि पश्यतोहरं गुरुणा रामशरेण राक्षसम् ॥२२॥

क्षमते न जनं त्वदर्पितं यमिनामिन्द्ररिपुस्तु हिंसितुम् ।
शशिनं मृगशत्रुराश्रितं न मृगं प्रार्थयते हि जातुचित् ॥२३॥

उरगा इव धर्मपीडिताः क्रतुशत्रुव्यथितास्तपस्विनः ।
उपयान्त्युपतापनाशनं विपुलं त्वद्भुजचन्दनद्रुमम् ॥२४॥

१९. यद्यपि हम लोगों ने योग की अग्नि से, जो संसार के बन्धनों को तोड़ने वाली है, मन में रहने वाले शत्रुओं को (काम-क्रोध इत्यादि को) जला डाला है और यद्यपि दूसरों की सम्पत्ति के प्रति हम उदासीन हैं, फिर भी संसारिक दुख आजकल हमें नहीं छोड़ता।

२०. यज्ञ के चारों ओर रुधिर-वृष्टि होने से दिशायें, किंशुक वन के समान लगती हैं जहाँ हवा के झपेटे से डालियों से गिरे हुए पुष्प बिखरे पड़े हों।

२१. (अब ऐसी परिस्थिति आ गई है कि) चाहे आज चाहे कल, यह होने ही वाला है कि हम तपस्वी लोग, जो हाथ में विकंकत (पलाश) की लकड़ी के बने हुए स्रुवा से, प्रज्वलित अग्नि में हव्य डालते हैं, उसे शत्रु लोग निकाल कर फेंक देंगे।

२२. कृपया राम के तीखे बाणों से युद्ध में उस राक्षस को मार कर उन मुनियों का कल्याण कीजिये जो यज्ञ में नियमानुसार बुलाये जाते हैं और जिनके देखते वह राक्षस उनके यज्ञ का भाग चुरा ले जाता है।

२३. उस इन्द्र के शत्रु (रावण) में यह क्षमता नहीं है कि वह आपकी शरण में आये हुए संयमी ऋषियों का नाश कर सके। मृगों का शत्रु (सिंह), उस मृग के मारने की कभी भी इच्छा नहीं करता जिसने अपने को चन्द्रमा को अर्पित कर दिया है।

२४. यज्ञ के शत्रुओं (राक्षसों) से पीड़ित तपस्वी लोग आपकी दीर्घभुजाओं की शरण में ऐसे आते हैं जैसे धूप से व्यथित सर्प, तपन को शान्त करने वाले चन्दन के वृक्ष के पास जाते हैं।

वयमर्ककुलैककाश्रया न परं भूपतिमाश्रयामहे ।
न हि जातु पतन्ति पल्वले जलदा वारिधिपानलम्पटा. ॥२५॥

त्वदणुप्रियमाश्रयामहे न परस्मादतिविस्तराण्यपि ।
पयस. कणमेव चातको जलदादत्ति बहूनि नान्यत. ॥२६॥

नृपताविति वेदितापदा मुनिना जोषमभूयत क्षणम् ।
महता न कदाचिदर्थना गुरुनिर्बन्धविनष्टसौष्ठवा ॥२७॥

परिपूततनुर्द्विजाशिषा शुभया त्वत्प्रियताऽऽवृत. स्वयम् ।
पृथुक पृथुकीर्तिरर्पितो भवति श्व. समराय यास्यति ॥२८॥

इति वस्तुमवस्तुकाङ्क्षिणे स मुदाऽस्मै समुदाहृतप्रिय ।
शरण शरणार्थिनेददावृषये विश्वभुजो नरेश्वर ॥२९॥

चलिते च सुत तपस्यति प्रथमाहूतमृषेर्नमस्यया ।
उपनीय चिराय वर्जित स्वयमङ्क प्रियमाददे वच. ॥३०॥

२५ हम लोग, जिनका सूर्यवश ही केवल आश्रय है, किसी दूसरे नृपति की शरण नही लेते । समुद्र में जल पीने के इच्छुक बादल, कभी गढैया पर नही गिरते ।

२६ हम लोग आप ही की कृपा का आसरा करेंगे चाहे वह अणु ही के समान छोटी क्यों न हो, पर किसी दूसरे से बहुत बडी कृपा हमें स्वीकार नही है । चातक, बादल ही से जल लेता है चाहे वह कण भर ही क्यो न हो, पर अन्यत्र कहीं से बहुत अधिक जल मिले भी तो वह नही लेता ।

विशेष—देखिये—
"याञ्चा मोघा वरमधिगुणे नाधमे लब्धकामा"—मेघदूत १–६ (कालिदास)

२७ अपने कष्ट को नृपति से इतना निवेदन कर मुनि (विश्वामित्र) क्षण भर के लिए चुप हो गये । महान् व्यक्ति से अपना अभिलषित बहुत भी कहा जा कर अपना सौष्ठव नही खोता ।

२८ 'कल मेरा यशस्वी पुत्र ब्राह्मणो के आशीर्वाद से शरीर पवित्र कर और आपके स्नेह का भाजन होकर, आपको अर्पित हो युद्ध के लिये जायगा ।'

२९. बडी प्रसन्नता से इतनी बात कहकर नृपति ने उन ऋषि (विश्वामित्र) को जो उस स्थान (महल) मे नही ठहरना चाहते थे, यज्ञशाला मे ठहराया ।

३०. जब मुनि तपस्या के हेतु चलने के लिये उद्यत हुए तो राजा ने अपने पुत्र (राम) को जिसे उन्होने मुनि को प्रणाम करने के लिये बुलाया था, अपनी गोद मे, जिसका वह बहुत दिनों से अनभ्यस्त था, बैठा कर प्रिय वचन बोले ।

समवेदि यतस्त्वदर्थिना कथितं यद्दुरितक्रमं त्वया ।
अवधूय ततस्तदापदं चिनु बाणेन कुलोचितं यशः ॥३१॥

अविजित्य जयैषिणां सदा न भुवः शक्यतयाऽनुरक्षितुम् ।
ननु दिग्जयसंभृतो महाविभवोऽयं भवतः प्रसंगतः ॥३२॥

भुवनानि बिभर्ति कश्चन स्वजनानेव परः प्रयत्नतः ।
इतरस्तनुमेव केवलं प्रभुरन्यो भरणेऽपि नात्मनः ॥३३॥

इति पक्षचतुष्टये स्थिते रघवः पूर्वमुदस्य मानिनः ।
क्षपयन्ति यशः क्रमागतं न हि पक्षान्तरसंपरिग्रहात् ॥३४॥

जनमन्यहितप्रवर्तनं स्वयमेवाभिसरन्ति सम्पदः ।
नियतं निजकृत्य लम्पटः पुरुषः स्वार्थत एव हीयते ॥३५॥

पुरुषस्य कृतं भुजद्वयं प्रविधातुं द्वयमेव वेधसा ।
सुहृदामुदयं च विद्विषामवलेपप्रतिघातमेव च ॥३६॥

३१. तुम्हें ले जाने की इच्छा से आए हुए मुनि ने तुम्हें उस कठिनता से होने वाले कार्य को बता दिया है । अतः तुम उनका सङ्कट दूर कर, बाणों के बल से अपने कुल के उपयुक्त यश का अर्जन करो ।

३२. चूंकि जय की इच्छा करने वाले के लिये, पृथ्वी की हर समय रक्षा करना बिना दिग्विजय के सम्भव नहीं है, अतः महाशक्ति के सञ्चय करने का यह अवसर आ गया है ।

३३. कोई भुवन भर का पालन करता है । कोई अपने ही कुटुम्ब का भरण पोषण बड़े यत्न से कर पाता है । कोई केवल अपने तन ही का पालन करने में समर्थ होता है और कोई अपना पेट भी नहीं भर पाता ।

३४. इन चारों अवस्थाओं में रघुकुल के स्वाभिमानी राजे पहिली अवस्था को छोड़कर अन्य तीन अवस्थाओं को अङ्गीकार कर कभी भी अपनी वंश-परम्परा से आये हुए यश को कलुषित न करेंगे ।

३५. जो दूसरे का हित करने में प्रवृत्त रहता है, उसके पास सम्पदायें स्वयं आती हैं । (परन्तु) जो पुरुष अपने ही स्वार्थ-साधन में रत रहता है उसका स्वार्थ भी सिद्ध नहीं होता ।

३६. ब्रह्मा ने मनुष्य के दो हाथ; दो कामों के करने के लिये बनाये हैं । एक से अपने मित्रों का अभ्युदय करने के लिए और दूसरे से शत्रुओं का दर्प चूर्ण करने के लिये ।

शरणोपगत न पाति यो न भिनत्ति द्विपता समुन्नतिम् ।
न स बाहुरसाधनक्षमो नरवृक्षप्रभव. प्ररोहक. ॥३७॥

परिक्लृप्त्यजडो यशोऽर्जने जठरैकप्रवणो निरुत्सुक. ।
पशुरेव बुधैर्निगद्यते यवसग्रासनिवृत्तमानस. ॥३८॥

न पशु पुरुषाकृतिर्यतो नृगुणभ्रष्टतया न पूरुष ।
विरतव्रतपौरुषस्पृह किमु कोऽपि द्रुहिणेन निर्मित. ॥३९॥

अकृतद्विपदुन्नतिच्छिद श्रितसरक्षणवन्ध्यकर्मण ।
पुरुषस्य निरर्थक. कर किल कण्डूयनमात्रसार्थक. ॥४०॥

अशने रसनानि देहिना कृतयोगानि मुखेषु भूरिश ।
न न सन्ति तदेषु दुर्लभ प्रभु यत्स्यादभय प्रजल्पितुम् ॥४१॥

तव जीवितसशयेष्वपि न परित्याज्यमिद कुलव्रतम् ।
सुलभ प्रतिजन्म जीवितं हृदय धर्मरतं हि दुर्लभम् ॥४२॥

३७ जो शरण मे आये हुए की रक्षा नहीं करता और शत्रुओ की बढती को नहीं काटता वह निकम्मी बाहु नही है । वह मनुष्यरूपी वृक्ष की एक छोटी टहनी मात्र है ।

३८ दूसरे के प्रति अपने कर्तव्य को निबाहने मे चेष्टाहीन, यश कमाने मे उदासीन और केवल अपना पेट भरने मे तत्पर, ऐसे मनुष्य को बुद्धिमान् लोग पशु कहते हैं । अन्तर केवल इतना ही है कि घास खाने से उसने अपना मन हटा लिया है ।

३९ वह जानवर नही है क्योंकि उसकी शक्ल आदमी की सी है, और वह आदमी नही नहीं है क्योंकि उसमे आदमी के गुण नहीं हैं । तो क्या ब्रह्मा ने कोई ऐसा जीव बनाया है जिसमे न तो धर्म की ओर रुचि है और न पुरुषार्थ की आकाक्षा है ।

४० जो शत्रुओ की उन्नति को नही रोक सकता और जो शरणार्थियों की रक्षा करने मे असमर्थ है, ऐसे पुरुष का हाथ तो केवल (शरीर) खुजलाने का साधन मात्र है ।

४१ ऐसा नहीं है कि प्राणियो के मुँह का स्वाद बढाने के लिये बनाये हुए अवलेह न हो (अवश्य हैं) । परन्तु इन सब पदार्थों मे वह अत्यन्त दुर्लभ है जिससे अभय देने वाले शब्द मुख से निकलें ।

४२ तुम्हारी मृत्यु की आशका भी हो तो तुम्हे अपने कुलव्रत को न छोडना चाहिये, क्योंकि प्रत्येक वार जन्म लेने पर जीवन तो सुलभ है, पर ऐसा हृदय दुर्लभ है तो अपने कर्तव्य मे रत हो ।

विरतः शवतामभिव्रजत्यभिषेकोत्सवदुन्दुभिः क्षणात् ।
इतिपातिनि जीविते कथं सुखमालम्ब्य सृजन्ति सत्पथम् ॥४३॥

यशसि व्रज यत्नमुज्झितस्वसुखप्रीतिरुपैहि वा तपः ।
अधिगम्यमसारमस्थिरं विषयास्वादसुखं पशोरपि ॥४४॥

यशसा सुकृतेर्न संग्रहो नियतं धर्ममुपार्जितो यशः ।
अनुगच्छ तदेक संग्रहादुभयं लभ्यमितीह सत्पथम् ॥४५॥

ननु तावदिहैव सज्जनप्रतिरक्षाविधिगम्यमक्षयम् ।
फलमिन्दुकरोपरञ्जितप्रहसत्कौमुद कोमलं यशः ॥४६॥

प्रयतः प्रतिपद्य तत्तपोवनमुग्रं त्वमुदग्रविक्रमः ।
सहसा सह कौशिकेन तं यमिनां कृन्त निवर्हकं युधि ॥४७॥

पितुरित्थमनाकुलं वचस्तदुपश्रुत्य ननाम पादयोः ।
सह सिद्धवनं यियासुना समरायावरजेन राघवः ॥४८॥

४३. यह देखते हुए कि एक राजा, राज्याभिषेक के उत्सव पर बजाये हुए नगाड़े की आवाज के समाप्त होते ही क्षण भर में मर जाता है और केवल उसका शव बच रहता है, तो फिर लोग क्यों ऐसे सांसारिक सुख के लिये सन्मार्ग को छोड़ देते हैं ।

४४. अपने शरीर को सुख देने की प्रवृत्ति छोड़ कर यश प्राप्त करने का यत्न करो, नहीं तो तपस्या करो । विषय भोग का सुख साररहित और अस्थिर होता है । वह तो पशुओं को भी प्राप्त है ।

४५. केवल यश से सदाचार का संग्रह नहीं होता । धर्म के अनुष्ठान से यश अवश्य ही होता है । इसी एक के संग्रह से दोनों ही प्राप्त होते हैं । अतः सन्मार्ग का अनुसरण करो ।

४६. चन्द्रमा की किरणों से अनुरञ्जित फूले हुए कमल के समान कोमल यश, सज्जनों की रक्षा करने से निश्चय ही इसी लोक में मिलता है ।

४७. विश्वामित्र के साथ उस उग्र तपोवन में पहुँच कर तपस्वियों को सताने वाले राक्षस को युद्ध में अपने प्रचण्ड पराक्रम से तुरन्त काट डालो ।

४८. इस प्रकार अपने पिता की धीर वाणी सुन कर रघुकुल में उत्पन्न राम, अपने छोटे भाई के साथ, जो युद्ध के हेतु सिद्धवन में जाने के लिये उत्सुक थे, पिता के चरणों में मस्तक नवाया ।

तमसि स्फुरदशुमद्युतिप्रहृते ससदि सौखरात्रिक: ।
यतये निरयीयतत्सुतौ नृपतिर्मन्त्र पवित्रदर्शितौ ॥४६॥

अनुजग्मतुरश्रुवर्षिणो हृदयै पौरजनस्य राघवौ ।
मुनिमेनमनाकुलातुरैरनुयातावशिवैकचिन्तया ॥५०॥

यमिन. पथि चैतिहासिकादुपशृण्वन् विविधाश्रया' कथा. ।
क्रमयं न विवेद राघवो बलयाऽऽनीतबल. स विद्यया ॥५१॥

अथ वज्रभृत' सुहृद्द्रुहो विषयो य' स्नपनेन विश्रुतः ।
नृवरो निजगाद तत्पुर पिशिताशीनिहतं निरीक्ष्य स' ॥५२॥

न भुनक्ति पुरा पुरश्रिय परितः कीर्णकरङ्कसङ्करा ।
अवमग्नशिर'कपालदृग्विवरप्रोद्गतशाद्वला मही ॥५३॥

फणिभिः प्रतिविम्बमातर' शितिभिर्भान्ति शिरोऽवलम्बिभि ।
रचितैरिव वेणिवन्धनैर्विरहादस्य पुरस्य शासितु' ॥५४॥

४६ तब नृपति ने विश्वामित्र से यज्ञशाला मे, जिसका अन्धकार सूर्य की किरणो के छिटकने से दूर हो गया था, सुखपूर्वक रात्रि व्यतीत होने का हालचाल पूछ कर अपने दोनो पुत्रों को जो मत्रपूत वस्त्रो को पहिने थे, ऋषि के साथ जाने का आदेश दे दिया ।

५० रघु के दोनो वशज, केवल मुनि की आपत्तियो पर विचार करते हुए विश्वामित्र के पीछे-पीछे चले । पौरजन, जिनकी आँखो मे आँसू गिर रहे थे, और जो शान्त और व्याकुलता से रहित थे, उनके पीछे चले ।

५१ इतिहास के ज्ञाता, उस सयमी ऋषि से नाना प्रकार की कथाओ को सुनते हुए, रघु के वशज (राम) को, जिनमे 'बला' विद्या के प्रभाव से बल का सञ्चार हो गया था, मार्ग मे कोई थकान नही मालूम पडी ।

५२ तब पुरुषो मे श्रेष्ठ, विश्वामित्र उस नगर को, जो मित्र के मारने वाले वज्रधारी इन्द्र के स्नान करने से प्रसिद्ध हो गया था और जिसे मासभक्षी राक्षसों ने विनष्ट कर डाला था, देख कर वोले ।

५३ इस नगर की भूमि ने जहाँ नरकपाल का चूर चारो ओर विखरा पडा है, जहाँ जमीन के भीतर धँसी हुई खोपडियो मे आँखों के गढे के भीतर से घास उग आई है, इस नगर के सौंदर्य को चौपट कर दिया है ।

५४. इन मातृकाओ की मूर्तियाँ जिनके सिर से श्वेत सर्प लटक रहे हैं ऐसी लगती हैं जैसे उन्होने नगर के शासक के वियोग से एक चोटी बाँध ली हो ।

भुवि भोगनिभं विलोकयंस्तुद्रमो हारमहार्य वेपथुः ।
हरिहस्तहतस्य दन्तिनः कररन्ध्रे निभृतं निलीयते ॥५५॥

प्रतिमा विशदेन लूतिकापटलेनावृतदृग्विरीक्ष्यते ।
रुदितैरिव पुष्पितेक्षणा विपुलत्रासकृतैरनेकशः ॥५६॥

श्लथभित्तिविरूढभूरुहस्थिरमूलाग्रविनिर्गमक्षतम् ।
स्फुटतीव भृंश शुचातुरं हृदयं तद्‌गृहचित्रयोषिताम् ॥५७॥

नकुलः परिजीर्णवैबुधप्रतिविम्बाननमध्यरन्ध्रतः ।
परिकर्षयति क्रुधा यथा स्फुरितं तद्रसनं सरीसृपम् ॥५८॥

इति जल्पति तत्र राक्षसी पुरतः प्रादुरभूद्भिदेलिमा ।
मकराकरपायिधामभिः क्षयतक्षाकृतिरुग्रविग्रहा ॥५९॥

नवकृत्तविलासिनीकरप्रसवोत्तंसविभूषितानना ।
नृशिरस्ततिमेखलागुणस्फुरणक्रूरकट्टकणत्कटिः ॥६०॥

५५. पृथ्वी पर पड़ी हुई एक माला को जो सर्प के समान लगती थी, देख कर, एक चूहा, निरन्तर भय हो थर-थर कांपता हुआ, सिंह के थपेड़ों से मारे हुए एक हाथी की सूँड़ के के छिद्र में चुपके से छिप गया।

५६. एक मूर्ति की आँखें मकड़ी के विशाल जाले से ढक जाने से ऐसी दिखाई पड़ती थीं, जैसे घोर भय के कारण वे निरन्तर रोने से फूल गई हों।

५७. उस महल की जर्जर दीवारों पर उगे हुए पेड़ों की मजबूत जड़ों के बाहर निकल आने से ऐसा लगता था जैसे उस पर चित्रित स्त्रियों के हृदय (जिनको फोड़ कर जड़ें बाहर निकल आई थीं) महान् शोक से विदीर्ण हो गए हों।

५८. एक नेवला, चौकीदार की अति जीर्ण मूर्ति के मुख के छिद्र से, उसकी जीभ को लपलपाता सांप समझ कर क्रोध से खींच रहा था।

५९. मुनि यह कह रहे थे कि वहाँ एक विकराल चेहरे वाली राक्षसी, जिसका यक्ष स्वरूप, समुद्र पी जाने वाले ऋषि (अगस्त्य) ने नष्ट कर दिया था, सामने आकर खड़ी हो गई।

६०. जिसका चेहरा विलासिनी स्त्रियों की नई कटी हुई अंगुलियों के बने हुए गहनों से विभूषित था और जो कमर में नरमुण्ड की पंक्ति से बनी हुई करधनी पहिने थी, जिसके हिलने से भयङ्कर शब्द होता था।

परित स्फुरदन्त्रपाशयया परिणद्धाकुलकेशसन्तति ।
घनशोणितपङ्ककुङ्कुमप्रविलिप्तस्तनकुम्भभीषणा ॥६१॥

इति तामतिभीमदर्शनामभिवीक्ष्योभयतस्तपोधनम् ।
धनुषोरवनीभुज. सुतौ सपदि न्यस्तशरावतिष्ठताम् ॥६२॥

स वसिष्ठतनूजपातितक्षितिपस्वर्वसतिप्रदो मुनि ।
घृणिनो नृपते. कृतस्मयस्तनय वीक्ष्य जगाविद वच. ॥६३॥

इति सार्वजनीनसम्पद. प्रलय देशवरस्य कुर्वतीम् ।
न निहत्य शरेण सूरिभिस्त्वमधर्मी ध्रुवमेव गीयसे ॥६४॥

शतमन्युरवर्णवृत्तये न वधः स्त्रैण इति प्रचिन्तयन् ।
निजघान विरोचनात्मजा कुलिशेन त्रिदिवस्य शान्तये ॥६५॥

वनितावपुषि द्विषज्जने पुरुषाकारविशेषितेऽपि वा ।
न हि भद्रकरं शरीरिणा प्रहृतार्हे करुणावलम्बनम् ॥६६॥

६१ कुम्भ के समान अपने बडे-बडे स्तनो पर गाढे रुधिर को कुकुम के समान पोतने से वीभत्स लगती वह राक्षसी अपने लहराते हुए बालो को सब ओर लथराती हुई अँतडियो से बाँधे हुई थी ।

६२ इस प्रकार अत्यन्त भयावनी राक्षसी को देख कर पृथ्वी के स्वामी (दशरथ) के दोनो पुत्र तुरन्त अपने अपने धनुषो पर बाण चढा कर उस तपस्वी (विश्वामित्र) के दोनो ओर खडे हो गये ।

६३ जब विश्वामित्र ने, जिन्होने वसिष्ठ के पुत्रो से तिरस्कृत राजा (त्रिशकु) को स्वर्ग मे रहने का पद दिया था, दयावान् राजा (दशरथ) के पुत्र (राम) की ओर देखा तो मुसकरा कर ये वचन बोले ।

६४ ऐसे श्रेष्ठ देश मे, जिसकी समृद्धि सम्पूर्ण जनता को इष्ट है, इतना प्रलय मचाती हुई इस राक्षसी को अपने बाणो से यदि तुम न मार डालोगे, तो बुद्धिमान् लोग तुम्हे अवश्य अधर्मी कहेगे ।

६५. यह विचार कर कि स्त्री का वध चारो वर्णों की रक्षा के प्रतिकूल नहीं है, इन्द्र ने स्वर्ग मे शान्ति के हेतु विरोचन की पुत्री को वज्र से मार डाला था ।

६६. ऐसे शत्रु पर दया करना जो मार डालने का पात्र है, चाहे उसका शरीर स्त्री का हो अथवा पुरुष का, प्राणियो के लिये कल्याणकारी है ।

युवतेरपि साधवः सुखे जगतो लुप्तवतश्चिरस्थितिम् ।
तुलयन्ति न राम विक्रमं द्विषतीतापमगुण्यवृत्तिभिः ॥६७॥

अपि वित्थ इदं धनुभृतोर्भवतोः पौरुषरोषवृत्तयोः ।
न भजन्ति यशःश्रियं रणेऽभ्युदिते हन्त तपोधनद्विषः ॥६८॥

न विरोचनजन्मनोरिदं युवयोरायुधयुद्धतन्त्रयोः ।
द्विजवृद्धनिषेवणक्षमं महतोः श्रौत्रमलं विराजते ॥६९॥

इति मुनिचोदितोहृदिसुकेतुसुतामिषुणा
रघुपतिरक्षिणोदशनिपातपटुध्वनिना ।
स्फुटितकुचान्तरस्रवदसृक्स्रुतिनः करणात्
प्रथममपाययुस्तदसवो नु शरो नु वहिः ॥७०॥

ऋषिरिति विघ्नघातविधिसञ्जितसद्यशसं
तनुजमयो जयद्दशरथस्य सुरास्त्रगणैः ।
असुरनिशाचरक्षतजपानपरैर्विकस-
च्छ्वसितहुताशनद्युतिपिशङ्गितदिग्वदनैः ॥७१॥

६७. हे राम ! विश्व की शान्ति के लिए, तुम यदि ऐसी स्त्री को दुःख पहुँचाते हो अथवा उसके अधिक समय तक जीवित रहने को लोप कर देते हो (अर्थात् उसे मार डालते हो) तो साधु पुरुष, तुम्हारे इस वीरता के काम की तुलना अनुचित कामों से न करेंगे ।

६८. क्या तुम यह जानते हो कि जब तुम लोग, जिनका पौरुष एवं रोष विख्यात है, धनुष लेकर युद्ध के लिये उठोगे तब इन तपस्वियों के शत्रुओं को यशश्री नहीं प्राप्त हो सकेगी ।

६९. यह विजय उन लोगों को नहीं प्राप्त होगी जो विरोचन की सन्तान हैं। यह तो तुम्हें ही प्राप्त होगी, जिन्होंने वेद का अध्ययन किया है, जो शस्त्र और युद्ध विद्या में पारङ्गत हैं और जो ब्राह्मण और वृद्ध की सेवा करने में समर्थ हैं ।

७०. इस प्रकार ऋषि से उत्साहित किये जाने पर रघुपति ने सुकेतु की पुत्री की छाती में एक बाण मारा, जिसकी ध्वनि वज्रपात के सदृश थी। उसके स्तनों के बीच में फटे हुए दरार से बहते हुए रुधिर के साथ पहिले उसकी प्राणवायु निकली या बाण पहिले निकला ? यह कहना सम्भव न था। (बाण के लगते ही तुरन्त उसके प्राण निकल गये, यह भाव है ।)

विशेष—नर्दटकः='यदि भवतो न जौ भजजला गुरु नर्दटकम्' ।

७१. दशरथ के पुत्र राम, जिन्होंने इस प्रकार यज्ञों को विघ्न रहित करके उज्ज्वल यश प्राप्त किया था, उन्हें विश्वामित्र ने वह देवास्त्र समूह प्रदान किया जो असुरों और निशाचरों का रुधिर पीने के लिये सदा प्रस्तुत रहते थे और जिन्होंने अपनी धधकती और लप-लपाती अग्नि की प्रभा से दिशाओं को पिशंग कर दिया था ।

विशेष—नर्दटक छन्द

वदनविनिर्गतज्वलितवह्निशिखावितते-
रुपगतवन्ति राममथ तानि ततानि रुचा।
शशधरखण्डकोणकुटिलस्फुतकोटिखर
दशनचतुष्टय पृथु दधन्ति बहि. प्रसृतम् ॥७२॥

रक्षोहव्यहविर्भुज स हि तथा सधूप्य शस्त्रेन्धनै
प्रत्युद्गम्य सुदूरमेव हरिणैस्त्वीयमानो वहि।
छेदाय प्रसृतैरसेकिमलताजालप्रवालश्रिय.
कूजत्कोकिलमाश्रमस्य निकट साय प्रपेदे मुनि. ॥७३॥

इति चतुर्थ. सर्ग.

७२ तदनन्तर मुख से निकल कर लपलपाती हुई अग्नि शिखा के समान, झुड-के झुड अस्त्रो की पक्ति, जिनकी प्रभा से चार दाँत प्रदर्शित हो गये थे, और जो अर्ध-चन्द्र के किनारो के समान स्वच्छ और भयङ्कर पैने थे, बाहर निकल कर, राम के पास आ गये।

विशेष—नर्दटक छन्द।

७३ राक्षस लोग जिनके हव्य थे, ऐसी अग्नि को, शास्त्र रूपी ईंधन से, जिनका वध करने के हेतु आविर्भाव हुआ था, प्रज्वलित कर, सन्ध्या समय मुनि विश्वामित्र, हरिणों के साथ, जो बहुत दूर तक उनके पीछे-पीछे गये थे, आश्रम के निकट पहुँचे, जो विना जल से सींची हुई लताओ के अँखुवों से मण्डित था और जहाँ कोयल कूक रही थी।

विशेष—शार्दूलविक्रीडित छन्द="सूर्याश्वैर्यदि म' सजौ सततगा शार्दूलविक्रीडितम्।"

चतुर्थ सर्ग समाप्त

पञ्चमः सर्गः

ततस्ततं तापसकन्यकाजनप्रसिक्तसंवर्धितवृक्षमण्डलैः ।
सहस्रशस्तानितसामनिस्वनप्रवर्तिताखण्डशिखण्डिताण्डवम् ॥ १ ॥

विहङ्गपानाय महीरुहां तले निवेशिताम्भः परिपूर्णभाजनम् ।
विशोषणार्थाहितपुण्यवल्कलप्रतानसश्रीकृतवृक्षमस्तकम् ॥ २ ॥

कृतासु नीवारविभागवृत्तिषु स्वकीयमंशं मृदुहस्तसंपुटैः ।
हरद्भिरालोहितगण्डमण्डलैः प्लवङ्गमैः सेवितशैलकन्दरम् ॥ ३ ॥

स्वमङ्कमारुह्य सुखं परिष्वपत् कुरङ्गशावप्रतिबोधशङ्कया ।
चिरोपवेशव्यथितेऽपिविग्रहे सुनिश्चलासीनजरत्तपोधनम् ॥ ४ ॥

हिरण्यरेतः शरणानि सर्वतः प्रवृत्तपुण्याहुतिधूमधूसरम् ।
बृहल्लतातानभृतः फलेग्रहेरधस्तरोरासितशायितातिथि ॥ ५ ॥

१. तब कौशिक (विश्वामित्र) ने उस तपोवन में प्रवेश किया जो तपस्वियों की कन्याओं के पाले-पोसे वृक्षों से भरा था और जहाँ निरन्तर अनन्त 'साम' के गानों और उनकी तानों से प्रेरित हो झुंड के झुंड मयूर ताण्डव नृत्य कर रहे थे।

विशेष—इस सर्ग के पहिले नौ श्लोकों में तपोवन का वर्णन है। इन नौ श्लोकों का विधेय पद, "कौशिक ने तपोवन में प्रवेश किया," दसवें श्लोक में है। इसे कुलक कहते हैं।

२. जहाँ वृक्षों के नीचे, पक्षियों के पीने के लिये जल से भरे पात्र रखे थे और जहाँ, सूखने के लिये फैलाये हुए, वल्कल के चीरों से वृक्षों की डालियों के अग्रभाग झुक गये थे।

३. जहाँ पर्वतों की कन्दराओं में लाल-लाल मुंह वाले वन्दरों का झुंड, खाने के लिये, मुलायम हाथों से, अपने हिस्से का 'नीवार' उठा ला कर, रहता था।

४. जहाँ तपस्वी लोग, इस शंका से कि कहीं, उनकी गोद में सुख से सोये हुए, मृगछौने जाग न उठें, बिना हिलेडुले बैठे थे, यद्यपि देर तक ऐसे बैठे रहने से उनका शरीर दुखने लगा था।

५. जो सब ओर अग्निकुण्डों में पड़ती हुई पवित्र आहुतियों से निकले हुए धुएँ से धूसरित हो रहा था और जहाँ मोटी मोटी लताओं से परिवेष्टित एवं फलों से लदे हुए वृक्षों के नीचे अतिथियों के आसन और विस्तरे रखे थे।

तपस्विवर्गस्य वधूषु वह्नये वितन्वतीषु प्रकृता बलिक्रियाम् ।
मृगाङ्गनाभिः परिलिह्य जिह्वया विनोदितत्याजितरोदितच्छिदु ॥ ६ ॥

बलिक्रियातानितलाजकर्पणे समेतकीट प्रतिघातशङ्कया ।
कुशस्य मुष्ट्या शनकैस्तपस्विभि. प्रमृज्यमानानलमन्दिरोदरम् ॥ ७ ॥

महीरुहभ्रष्टविहङ्गपोतिकासुखोपवेशाय तपस्विसूनुभि. ।
इषीकतूलेन विधाय मार्दवं कचित्समासञ्जितनीड़पञ्जरम् ॥ ८ ॥

सवारिमृत्स्नापरिपूर्णखातकप्रजन्यमानाङ्कुरबीजमेकत. ।
प्रहृष्टसारङ्गकिशोरवलितप्रकीर्णपुञ्जीकृतशुष्यदिङ्गुदि ॥ ६ ॥

समीरणैराहुतिगन्धपावनैर्वितानितोद्दामशिखण्डि निस्वनम् ।
तपोवनं तत्तपसामधिश्रिय. कुमारयुग्मेन विवेश कौशिक. ॥१०॥

विधित्सुरिष्टिं नृपतेरतन्द्रितं. सुत ततो वैबुधलौकिकीमृषि ।
समादिदेश प्रकृताय कर्मणे चिराय तत्रक्षणरूप्यमाद्दत. ॥११॥

६ जहाँ तपस्वियो की स्त्रियाँ अग्नि मे आहुति डाल रही थी और जहाँ हरिणियाँ छौनो को चाट कर प्यार कर रही थी, परन्तु फिर छोड देने के कारण जिन छौनो की आँखो से आँसू निकल रहे थे ।

७ जहाँ तपस्वी लोग अग्निकुड के गर्भ को कुश की मूँठ से हलके-हलके इस हेतु बटोर रहे थे कि आहुति के लिये फैलाये हुए लाजा को ले जाने के लिये एकत्र छोटे-छोटे कीडे कही मर न जायँ ।

८ जहाँ पेड से गिरे हुए चिडिया के बच्चे के सुख से बैठने के लिये, तपस्वियो के बालको ने एक घोसले के आकार का पिंजडा बना कर उसमे बेंत का मुलायम छिलका बिछा दिया ।

६ जहाँ एक ओर अच्छी मिट्टी और पानी से भरी हुई गढैया मे बीज अँकुरा रहे थे और दूसरी ओर सूखने के लिये एकत्र किये गये इङगुदी के फलो को प्रफुल्लित मृग-शावक चौकडी भर कर बिखेर रहे थे ।

१० ऐसे तपोवन मे जहाँ मस्त मयूरो की आवाज, हवन के गध से पवित्र वायु से सञ्चालित होने के कारण दूर तक फैल रही थी, तप के भाण्डार, कौशिक ने दोनो कुमारो के साथ प्रवेश किया ।

११. तब एक स्वर्गिक यज्ञ के जो बहुत दिनो से स्थगित था, करने की इच्छा से आदरणीय विश्वामित्र ने उसके सरक्षण का भार राजा के पुत्र, आलस्य रहित राम को सौंपा जिनका शरीर यज्ञो की रक्षा करने मे दमकने लगा था ।

तमग्निमिन्धन्तमथिक्रतु भ्रमन् रिरक्षिषुः सन् परितो रिपोरसौ ।
क्षमाभुजः सज्यसरासनः सुतो हृतो जगादावरजं वनश्रिया ॥१२॥

विभर्ति नीवारवदम्बुजाकरश्रिया परीतं सततं तपोजुषाम् ।
अखातमाहावमनुप्त्रिमं परं सदाफलं शस्यमिदं तपोवनम् ॥१३॥

सवेदवेदाङ्गविदो यमव्ययं विदन्ति यत्नेन पदं तपस्विनः ।
स लोककृत्यानि विचिन्त्य कानिचित् तपस्यति स्मेह पुमान् पुरातनः ॥१४॥

सुदर्शनच्छिन्न समाहृतेन्धनं द्विजेन पक्षव्यजनेन वीजितम् ।
त्रिनेत्रमूर्त्यन्तरमादिपूरुषो जुहाव हव्यैरिह हव्यवाहनम् ॥१५॥

तपस्यति स्वामिनि शत्रुनाशने समित्कुशच्छेदनमात्रतत्परः ।
सुसंयतो नाभिननन्द नन्दकः सुरारिवक्षःक्षतजासवं तदा ॥१६॥

गदा रणद्दुन्दुभिभैरवंरणं तदा समभ्येत्य भयं वितन्वति ।
शिरस्यपध्वस्तशिरस्त्रजालके निमज्य मज्जां न जघास विद्विषाम् ॥१७॥

१२. तब पृथ्वीपति (दशरथ) के पुत्र (राम) धनुष को चढ़ा कर वन की रक्षा करने की इच्छा से अग्निकुण्ड के चारों ओर घूमते हुए अपने छोटे भाई (लक्ष्मण) से, जिनका मन वन की शोभा को देखने में लगा था, बोले।

१३. तपस्वियों के इस तपोवन में, कमलों के सौंदर्य से व्याप्त एक सरोवर और (पशुओं के पानी पीने के लिये जल पात्र है और वहाँ नीवार (एक प्रकार का चावल) की तरह बिना बोई हुई खेती होती है।

१४. वेद और वेदाङ्ग के ज्ञाता तपस्वी लोग, जिस पुराण पुरुष को बड़ी साधना से अविनाशी जान सके हैं, उसने (पुराण पुरुष ने) लोक की हितकामना से इसी स्थान पर तपस्या की है।

१५. यहाँ पर आदि पुरुष ने सुदर्शन चक्र से काटी हुई ईंधन की लकड़ी लाकर और गरुड़ के पंखों के हांकने से प्रज्वलित किये हुए शिव के एक रूप, अग्नि, को हव्य अर्पित किया था।

१६. जब शत्रुओं (राक्षसों) के नाश करने वाले स्वामी (विष्णु) तपस्या कर रहे थे तो 'नन्दक' (उनका खड्ग) सुसंयत होकर कुश और समिधा ही काटने में तत्पर रहता था और तब उसे देवताओं के शत्रुओं के चिरे हुए वक्ष से बहती हुई रुधिर रूपी मदिरा में कोई आनन्द नहीं रह गया था।

१७. उस समय दुन्दुभियों के घोर नाद के कारण भयङ्कर रणभूमि में पहुँच कर भय उपजाति हुई उनकी (विष्णु की) गदा, शत्रुओं के सिर पड़ कर शिरस्त्राणों को टुकड़े-टुकड़े करती हुई, उनके मज्जा का पान नहीं करती थी।

नवं स्वकोशाहृतवारिधारया वन तरूणामनुगृह्णता रणे।
न पाञ्चजन्येन जनस्य तेनिरे भियो विद्युत्काशनिभैरवैरवै. ॥१८॥

सलीलमुद्दण्ड सरोज विष्टरे निपद्य पादेन पुरोऽवलम्बिना ।
परिस्पृशन्त्या चलवीचिमस्तकं तदा किलागायि कल न पद्मया ॥१६॥

फणावतामुद्धरणेषु वारिधिप्रवाहसिक्तावुदयाचलस्थित. ।
वितत्य पक्षावधिप पतत्रिणा व्यशोपयन्न प्रतिसूर्यमायतम् ॥२०॥

विहारमारण्यकमिष्टवस्तुद विहाय वल्केन सम वितूस्तयन् ।
इत. किल क्रोधपराहतो हरि. पुरा प्रतस्थे बलिबन्धसिद्धये ॥२१॥

तत प्रहृत्येव गुणस्य सम्पदा हिरण्यगर्भस्य विवृत्तहिसया ।
निपेव्यते श्वापदसपदा पद तपस्विनामृद्धमिद शमावहम् ॥२२॥

प्रगृह्य पुच्छे शिशवस्तपस्विना मसीपय.सेकक्षतानिवासितान् ।
यदङ्कबिन्दून् गणयन्ति चापलाद्विलोकयद्वीपिनमेनमग्रत. ॥२३॥

१८ पाञ्चजन्य शख ने अपने छिद्र से निकलती हुई जल की धार से (सीच कर) उस नये वन को अनुगृहीत कर, शुष्क विद्युत की कडक के समान अपनी भीषण ध्वनि से, युद्ध मे लोगो के हृदय मे भय नहीं उत्पन्न किया।

१६ उस समय ऊँचे नाल वाले कमल के आसन पर बैठ कर (सरस्वती) सामने लटकते हुए अपने पैरो से, लहराती हुई तरङ्गो के मस्तक को खेलवाड से छूती हुई अपना ललित गायन नही करती थी।

२० उदय गिरि पर बैठे हुए, पक्षिराज गरुड, समुद्र से फण वाले सर्पों को निकालने के कारण, जल प्रवाह से भीगे हुए अपने विशाल पखों को धूप मे नही सुखाते थे।

२१. प्राचीन समय मे, मनोवाञ्छित फल देने वाले इस वन के विहार को छोड, वल्कल का चीर पहिन और कधे से बालो को झार कर, क्रोध से भरे हुए हरि इसी स्थान से बलि को बाँधने के लिये गये थे।

२२ उस समय से हिंसक जन्तुओ का समूह, जैसे ब्रह्मा के गुणो के उत्कर्ष से प्रभावित होकर, हिंसा की प्रवृत्ति छोड, तपस्वियो के इस शान्ति देने वाले, समृद्ध प्रदेश मे रह रहे है।

२३. (हे लक्ष्मण) वह सामने देखो, तपस्वियो के बालक चपलता से एक तेंदुये को पूछ से पकड कर उसके शरीर के काले धब्बो को, जो स्याही के गिरने से बने हुए लगते थे, गिन रहे हैं।

इमौ हरि संहृतरोषशङ्कितौ नितान्ततप्तौ तपनस्य दीप्तिभिः ।
तलं गजस्य स्रुतगण्डसंपदः फणातपत्रं फणिनश्च वाञ्छतः ॥२४॥

तथा गिरं व्याहरतैव रोदसी वितत्य यात पवनेन रंहसः ।
विधूनयत्तद्विपिनं द्विषद्बलं ध्वजैरुपालक्ष्यत काकलाञ्छनैः ॥२५॥

सरोषरक्षः प्रतिबिम्बविग्रहं कृपाणपत्रे शरदम्बरत्विषि ।
विगृह्णतां जीवितपानलिप्सया स्थितः समास्थाप्य यमो यथा बभौ ॥२६॥

असंख्यगृह्या अपि तत्र सैनिकाः पिशाचरक्षस्ततिभिर्निरन्तरम् ।
कृतान्धकारं रथचक्ररेणुभिर्जगुर्जगत्सत्त्वरजस्तमोमयम् ॥२७॥

चकार लक्ष्यं प्रथमो वलोत्तरो नभः श्रितं तत्पदिको वलं द्विषाम् ।
तति क्षितिस्थामनुजो जघान च द्रवत्तुरङ्गामतिदन्तवद्विभुम् ॥२८॥

२४. वह देखो, एक सिंह और मेंढक, सूर्य की जलती हुई किरणों से खूब तपे हुए, अपनी अपनी क्रूरता और भय को रोक कर, सिंह तो, माथे से मद बहते हुए हाथी के नीचे और मेंढक सर्प के फन के साये में जाने की इच्छा कर रहे हैं।

२५. ज्योंही वे (राम) इस प्रकार कह रहे थे, उन्होंने देखा कि आकाश और पृथ्वी पर फैली हुई शत्रुओं की एक सेना जिसकी पताकाओं पर कौवे अङ्कित थे, वायु के वेग से वन को झकझोरते हुए आगे बढ़ रही है।

२६. क्रोध से भरा एक राक्षस जिसके शरीर का प्रतिबिम्ब, शरद ऋतु के आकाश की तरह शुभ्र, उसकी तलवार की फल पर पड़ रहा था, यम के समान, जीवन के रक्तपान करने की इच्छा से, वहाँ डट कर बैठा है।

२७. वहाँ असंख्य पिशाचों और राक्षसों की भीड़ से तथा उनके रथों के पहियों की धूल से उत्पन्न अन्धकार से, जगत, सत्व, रजस और तमस युक्त हो गया।

विशेष--श्लेष--"असंख्य गृह्या अपि"=गिनती में असंख्य होते हुए भी=सांख्य मत के अनुयायी न होते हुए भी।
(राक्षसों के वर्तमान होने से 'सत्व'। पहियों की धूल उड़ने से 'रजस' और उससे जनित अन्धकार से 'तमस' इन तीनों से जगत की सृष्टि—यह सांख्य का मत है।)

२८. शत्रुओं की सेना जो आकाश में थी, उसे तो अति बलवान् और पैदल चलने वाले राम ने अपना लक्ष्य बनाया और उनके छोटे भाई (लक्ष्मण) ने, पृथ्वी पर जो सेना थी, जिसमें घोड़े बड़ी तेजी से दौड़ रहे थे और जिनके सेनापतियों के बड़े-बड़े दाँत थे, उन पर वार किया।

युधि द्विपा रामशरेण दारिता. कृतत्वराधोरणमुक्तकन्धरा· ।
यतो धरण्यामनुकृत्वारिद दिव. पतन्तो रुरुजु. स्वसैनिकान् ॥२६॥

शरासने वर्त्मनि लक्ष्यभेदने परैरुपालक्ष्यत नेपुसन्तति. ।
ऋतेऽपि हेतोरिव दीर्णवक्षसो निपेतुरस्य प्रधने सुरद्विप ॥३०॥

यथा गुणस्य ध्वनय. समुच्चयुर्निपातशब्देन सम युधि द्विपाम् ।
तथाऽस्य योद्धुर्धनुपो विनिर्गता जवे विशेष विदधु शिलीमुखा· ॥३१॥

सुरारिहस्तच्युतशस्त्रजालकान्यलब्धलक्ष्याणि चिर नभस्तले ।
विशुष्कपत्रप्रतिमानि तच्छरप्रतानवातोपहतानि वभ्रमु. ॥३२॥

प्रभञ्जनेनाहितपक्षतिध्वनि प्रसर्पता राजसुतस्य पत्रिणाम् ।
ऋभुद्विपस्ते प्रतिलोममाहृतै. शरैर्निजैरेव दृढं निजघ्निरे ॥३३॥

क्षतं पृपत्केन पतत्रिणा पथ पतद्बल तत्तनयस्य भूभृत. ।
निपातखेदादशिवे भुवस्तले भियेव तूर्णं जहुरन्तराऽसव. ॥३४॥

२६ रणक्षेत्र मे राम के बाण से मारे हुए हाथी बडे वेग से भागे, जिसके कारण उनके कधो पर बैठे हुए महावत गिर गये और वे मरे हुए हाथी अपने साथ बादलों को घसीटते हुए जब आकाश से पृथ्वी पर गिरे तो उन्होंने अपने ही सैनिको को कुचल डाला ।

३० राम के बाणो की कतार इतनी तेजी से निकलती थी कि शत्रुओ को वह न तो धनुष पर दिखाई पड़ती थी और न (धनुष से निकल कर) मार्ग ही मे और न लक्ष्य के भेदने ही पर । ऐसा लगता था जैसे युद्ध मे, देवताओ के शत्रु जिनके वक्ष विदीर्ण हो गये थे वे पृथ्वी पर गिर कर बिना कारण ही मर गये ।

३१ युद्ध मे ही इस वीर (राम) के धनुष की प्रत्यञ्चा का निर्घोष और शत्रुओ के गिरने का शब्द मिल कर जितना ही बढता जाता था, उतनी ही उनके (रामके) धनुष से निकले हुए बाणो की गति बढती जाती थी।

३२ देवताओ के शत्रुओ के हाथ मे चलाया हुआ बाणो का समूह ठीक निशाना न लगाने के कारण, अपनी ही हवा के झोंके से तितर-बितर होकर आकाश मे सूखी पत्तियो की तरह बडी देर तक इधर उधर घूमता रहता था ।

३३ उस राजपुत्र (राम) के बाण, जिसमे पर लगे हुए थे, चलने के समय बडी ध्वनि करते थे और उनसे बडे वेग से वायु निकलती थी । उस वायु के झपेटे से देवताओ के शत्रुओ के बाण, उलट कर उन्ही को बेतहाशा मार रहे थे ।

३४ (पृथ्वीपति दशरथ) के पुत्र के बाणों से सेना के छिन्न-भिन्न होने पर राक्षसो के अन्त-प्राण, सेना को छोड़ कर, शरीरो के मार्ग ही मे इस भय के भेद मे तुरन्त निकल गये कि कहीं वे इस अमगलकारी पृथ्वी पर न गिर पडें ।

शितांकुशन्यासविधूतमस्तकाः शिरःसमीपे विनिविष्टबाहवः ।
ध्रुवं नदन्तो युधि तं प्रहारिणं भयादयाचन्त यथाऽरिदन्तिनः ॥३५॥

द्विपं करीरीयुगमूलखण्डितप्रशीर्णदन्तं समदेन पश्यता ।
मृधावतारव्यथितेन चेतसि क्षणं विचक्रे निकटेन दन्तिना ॥३६॥

करी करं यातमुदग्रविग्रहः परं प्रहर्तुं प्रतिहृत्य रंहसा ।
शरेणभित्वा निखिले निकीलिते शशाक मोक्तुं न भुजस्य मण्डले ॥३७॥

निर्कीलिते रामशरेण वेगिना दृढं विभिद्योरुयुगं कुरङ्गमे ।
कृतेऽपि दोषे भयमूढवृत्तिना हयेन कश्चिद्विचचाल नासनात् ॥३८॥

रिपोरपूर्णेन्दुमुखेन कश्चन स्थिरासनः पत्रियुगेन राक्षसः ।
निकृत्तयोरप्यधिजानु पादयोः पपात वेगेन यतो न वाजिनः ॥३९॥

वधाय धावन्नभिशत्रुविद्विषः शरेण कृत्तच्युतमस्तकोपऽरः ।
हृतायुरप्यादिकृतेन कानिचित्पदानि वेगेन जगाम राक्षसः ॥४०॥

३५. शत्रुओं के हाथी, जिनका सिर तेज अंकुश के प्रहार से भग्न गया था, अपने दोनों अगले पैर मस्तक के समीप लाकर भय से चिग्घाड़ने लगे जैसे वे युद्ध में प्रहार करने वाले से (न मारने की) याचना कर रहे हों।

३६. निकट में खड़े हुए एक हाथी ने, जो युद्ध में आने के कारण व्यथित था, एक दूसरे हाथी को जिसके दांत जड़ पर टूट जाने से हिल रहे थे, बड़े गर्व से देख कर क्षण भर में अपना इरादा बदल दिया।

३७. एक भारी-भरकम हाथी ने अपने सूंड़ को, जिसे उसने शत्रु को मारने के लिये आगे बढ़ाया था, बड़े वेग से खींच लिया। पर एक वाण के लगने से सम्पूर्ण गर्दन में 'रिपिट' (दृढ़ता से घंसना) हो जाने के कारण उसे वह छुड़ा न सका।

३८. जब राम का अति वेगगामी वाण एक सवार की जांघों को छेदता हुआ घोड़े के पेट में दृढ़ता से धंस गया। यद्यपि घोड़ा भय के मारे बिचकता रहा पर (उसके साथ एकजुट हो जाने के कारण) सवार अपने आसन से नहीं हटा।

३९. एक राक्षस घोड़े पर ऐसी दृढ़ता से आसन जमा कर बैठा था कि यद्यपि शत्रु (राम) के दो वाणों से, जिनके अग्रभाग अर्धचन्द्र के समान थे, उसके दोनों पैर घुटने के नीचे से कट गये थे, फिर भी वह घोड़े की तीव्र गति के कारण नीचे नहीं गिरा।

४०. शत्रु (राम) को मारने के लिये दौड़ते हुए एक दूसरे राक्षस का सिर राम के वाण ने काट गिराया। यद्यपि उसका प्राणान्त हो गया था, फिर भी (पूर्व प्रेरित) गति के कारण वह कई पग आगे बढ़ गया।

जवेन कश्चिज्जवनाम्बुदोपमं क्षणं सिताभ्रैः कृतकर्णचामरम्।
निपत्य कुम्भे तरसा द्विधा गतैर्विहायसा वाहयति स्म दन्तिनम् ॥४१॥

पृषत्कभिन्नोदररन्ध्रनिर्गतं स्वमन्त्रमुत्कृत्य खुराग्रपातनैः।
दिशि क्षिपन्तं युधि वेगधारयाऽपरो भुवं वाहयतिस्म वाजिनम् ॥४२॥

निकृत्य सौमित्ररथाङ्गधारयाऽपर्वाणित स्वं तरसा क्षपाचरः।
क्रुधायुधीकृत्य भुज महीभुजः सुतं जघान ध्वनिकम्पितस्थल ॥४३॥

न्यमज्जदर्द्धेन रथाङ्गमीरितं परेण शत्रोरुपदण्डमस्तकम्।
तमेव दण्डं परशु विधाय त शिरस्यरातिर्निजघान सस्वनः ॥४४॥

स्वपाणियन्त्रच्युतशस्त्रसादितं विधाय वृन्दं बहुधा सुरद्विषाम्।
रणाय कोशादसिमीशितुः सुतश्चकर्ष कृष्ण विवरादिवोरगम् ॥४५॥

परस्य सौमित्रिकृपाणपाटितद्विधाभवद्देहभृतो निकीलयन्।
शरेण पार्श्वं नृहरि समग्रता व्यधत्त रोपेण नु लीलया नु सः ॥४६॥

४१ तेजी से भागते हुए, बादल के समान, एक राक्षस फुर्ती से हाथी के मस्तक पर चढ कर, बादलो को चीरता हुआ ऐसा लगता था जैसे उसके दोनो ओर चँवर चल रहे हो।

४२ एक दूसरा राक्षस आकाश मे अपना घोड़ा भगाये लिये जा रहा था। बाण से विदीर्ण किये हुए उस घोडे के उदर के छिद्र मे अँतडियाँ निकल पडी थी जिन्हें वह अपने टाप के अग्रभाग के झटके से, अपनी द्रुतगति से रणभूमि मे चारो ओर फेंक रहा था।

४३ अपने गर्जन से पहाड को कँपा देने वाले एक निशाचर के हाथ को जब लक्ष्मण के तीखे चक्र ने काट कर बलपूर्वक दूर फक दिया तो उस निशाचर ने क्रोध से अपने उस हाथ को आयुध की तरह प्रयोग कर, पृथ्वीपति के पुत्र (राम) को मारा।

४४ जब राम का फेंका हुआ चक्र एक राक्षस की गदा के उपरी भाग मे आधा धँस गया तब गरज कर उस राक्षस ने उसमे (गदा से) फरसे का काम लेकर उनके सिर पर मारा।

४५ जब राजपुत्र देवताओं के शत्रुओ के समूह को अपने हाथ मे लिये हुए यत्र से शस्त्रो के द्वारा अनेक प्रकार से मार चुके तब उन्होने, युद्ध के लिये म्यान से तलवार खींची जैसे बिल से कोई काले साँप को खीचे।

४६ लक्ष्मण की तलवार मे दो टुकडे किये हुए एक राक्षस के शरीर को पुरुष सिंह (राम) ने तीर से भेद कर दोनो टुकडो को क्रोध से अथवा खेलवाड से समूचा कर दिया।

करं रणाय प्रतिहृत्य धावति द्विपे निजघ्ने तनयेन भूभुजः ।
बहूनि खण्डानि विधित्सुनाऽसिना समेत्य सम्पिण्डित एव तत्करः ॥४७॥

कृपाणकृत्तस्य दृढोरुयन्त्रितं न पश्चिमार्द्धं निपपात सादिनः ।
तुरङ्गवल्गादृढकृष्टमुष्टिना परेण भागेन च लम्बितं पुरः ॥४८॥

परेण खड्गेऽनुपपात पातिते सुरारिरुत्तानविसृष्टविग्रहः ।
अपि व्यपाये सति सत्त्वमानयोर्द्विषे न दित्सन्निव पृष्ठमाहवे ॥४९॥

निमग्नखड्गे जठरे सुरद्विषः परिक्षरच्छोणितसिक्तमूर्तयः ।
परस्परस्य प्रसभं समुच्छ्वसत्प्रहारवातेन पुनर्विशोषिताः ॥५०॥

ततस्तलासृक्स्रवलोहिताम्बरः श्रियं जयस्यामुपयन्तुमुद्यतः ।
यथेप्सपानाशनतृप्तचेतसश्चकार राजन्यवरश्चिरं द्विजान् ॥५१॥

ततो मरुत्पावकशस्त्रनिर्द्धुतप्रदग्धमारीचसुबाहुविग्रहः ।
बलं बलीयानबलीकृतं भिया ततं दिगन्तं स निनाय नायकः ॥५२॥

४७. जब एक हाथी अपने सूंड को सिकोड़ कर युद्ध करने के लिये दौड़ा आ रहा था पृथ्वीपति के पुत्र (राम) ने उसको टुकड़े-टुकड़े कर डालने की इच्छा से उसके निकट आकर, अपनी तलवार से, उस सूंड सिकोड़े हुए हाथी पर वार किया ।

४८. यद्यपि एक घुड़सवार का नीचे का धड़ तलवार से कट गया था परन्तु अपनी जांघों में (घोड़े को) कस कर बैठने के कारण वह नीचे नहीं गिरा । और घोड़े की लगाम को मुट्ठी से कस कर थामे रहने से उसका ऊपरी धड़ सामने लटकता रह गया ।

४९. राम ने देवताओं के एक शत्रु (राक्षस) को मार गिराया तो वह उत्तान (=वक्ष ऊपर और पीठ नीचे) गिरा । यद्यपि उसके प्राण और उसका दर्प नष्ट हो गया था फिर भी ऐसा लगता था जैसे युद्ध में वह शत्रु को पीठ नहीं दिखलाना चाहता था ।

५०. देवताओं के शत्रुओं (राक्षसों) के पेट में तलवार के घुस जाने से उसमें से बहते हुए रुधिर से उनके शरीर भीग गये थे । पर प्रहार-पर-प्रहार करने से जोर-जोर साँस लेने से उसकी हवा से वह रुधिर सूख गया ।

५१. तब उस क्षत्रिय श्रेष्ठ (राम) ने, जिसके कपड़े रुधिर के छींटों से रक्तवर्ण हो गये थे, विजय लक्ष्मी को प्राप्त करने के लिये, उद्यत होकर, गिद्धों को, बहुत दिनों बाद, जी-भर कर माँस भोजन और रुधिर पान से तृप्त किया ।

५२. तब उस बलवान् नेता (राम) ने मारीच और सुबाहु के शरीर को वायव्य और आग्नेय अस्त्रों से छिन्न-भिन्न और दग्ध करने के पश्चात्, भय से निर्बल सेना को दिशाओं के अन्त तक खदेड़ दिया ।

रणे दधानो हृदयं दयाऽऽर्द्रं सलोलमायम्य धनुर्धनुर्धर.।
पराङ्मुखानां शनकै. शिलीमुखाद्विपद्विपाना जघने जघान स.॥५३॥

भृशं न सेहे युधि राममाशुगप्रतानशुष्काशनिपातभीषणम्।
युगान्ततिग्मद्युतितेजसं द्विपो बलीयसो भ्रातृबलान्वितं बलम्॥५४॥

स्थित्वा गुणे महति तत्क्षणलब्धमोक्षा. सुश्लिष्टयुक्तिसफलाननसम्पदस्ते।
शाक्या इवास्य विशिखा रिपुसैनिकेभ्यश्चक्रुस्त्रिविष्टपसभागमनोपदेशम्॥५५॥

हुतभुजि निधनाख्ये शत्रुहव्यानि हुत्वा परिणयति जयश्रीवीरकन्या नृवीरे।
समरपटहकोपे तत्र नृत्तं कबन्धैर्बहलरुधिरपङ्कस्फारसिन्दूरलेपै.॥५६॥

मध्येनिकृत्तरजनीचरपूर्वकायाश्छेदैः स्थिता भुवि निपत्य भय वितेनु.।
रक्ष.सु युद्धविमुखेपु विभिद्य भूमीमर्द्धोत्थिता इव पुन. समराय दैत्या.॥५७॥

५३ तब उस धर्नुधर ने, जिसका हृदय युद्ध मे दयार्द्र हो जाता था, धनुष को रोक कर शत्रुओ के हाथियो की जघा को, जिन्होने बाणो से मुँह फेर लिया था, प्रेम से धीरे-धीरे थपथपाया।

५४ अपने भाई (लक्ष्मण) के बल से समन्वित, शुष्क विद्युत के गिरने के समान भयङ्कर, प्रलयकालीन झुलसाने वाली सूर्य की प्रखर रश्मियो के समान प्रचण्ड राम के शर-समूह को बलवान शत्रुओ (राक्षसो) की सेना युद्ध मे बिलकुल न सह सकी।

५५ लम्बी प्रत्यञ्चा पर चढ कर फुर्ती से छोडे हुए, बडी योग्यता से प्रयुक्त होने के कारण, सफलता से श्रीसम्पन्न जिनके अग्रभाग हैं, ऐसे (राम के) तीखे बाण, बौद्ध भिक्षुओ की भाँति, शत्रु के सैनिको को इन्द्र की सभा मे जाने का उपदेश दे रहे थे।

विशेष--शाक्या इव -'गुणे महति'=आनन्द, शान्ति इत्यादि गुणों से सम्बन्धित। 'तत्क्षण लब्ध-मोक्ष'=उसी क्षण मोक्ष की प्राप्ति। 'सुश्लिष्ट युक्ति सफलाननसपद'=गम्भीर योगाभ्यास से जिनका मुख देदीप्यमान हो रहा था। 'विशिखा'=जिन्होने चोटी कटवा दी थी। 'रिपु सैनिका:'=मार के साथी।

५६ विनाश नामक अग्नि मे शत्रुओं की आहुति देकर उस पुरुषवीर ने जब विजयश्री की वीर कन्या के साथ विवाह किया तब रण के नगाडे बज रहे थे, कबन्ध जिनके शरीर पर, सिन्दूर की तरह रुधिर के कीचड का लेप खूब पुता था, नाच रहे थे।

५७. बीच से कटे हुए निशाचरों के पृथ्वी पर पडे हुए टुकडे दिल दहला रहे थे। ऐसा लगता था जैसे युद्ध से भागे हुए राक्षस पृथ्वी को फोड कर आधे बाहर निकले हुए, युद्ध करने के लिये फिर बाहर निकल रहे हैं।

रामायुधव्यथितराक्षसरक्तधारास्पर्शेन लोहितरुचो मुहुरम्बुवाहाः।
गौरीपतिप्रणतिसम्भ्रमलाभवन्ध्यां सन्ध्यामकालघटितां गगने वितेनुः ॥५८॥

संक्रीड्रद्रयतुरगद्विपाभ्रवृन्दव्युत्क्रान्तौ विरतपृषत्कपातवृष्टि।
निस्त्रिंशस्फुरिततड़िद्वियुक्तमाप व्यक्तार्कद्युति शरदीव तन्नभः श्रीः ॥५९॥

रक्षोवसापिशितपूरितकुक्षिरन्ध्रः काकुत्स्थबाणहतहस्तिमुखाधिरूढ़ः।
पर्यन्तलग्नरुधिराणि मृदुप्रणादस्तुण्डानि वायसगणो रदने ममार्ज ॥६०॥

राजात्मजौ मुनिसुताक्षिभिराहिताघ्यौं प्रत्युद्गतौ मृगकुलैरुटजानि गत्वा।
आवर्जिते विदधतुः शिरसी सुवाहोर्वाणव्रजेन गुरुणी गुरुपादमूले ॥६१॥

इति पञ्चमः सर्गः।

५८. राम के शस्त्रों से वध किये गये राक्षसों के रुधिर के स्पर्श से रक्त वर्ण, जल से भरे मेघों ने, असमय आकाश में रह-रह कर संध्या का विस्तार किया, जो गौरी-पति शिव की अर्चना के लाभ से विहीन थी।

विशेष—बादल के लाल होने से पूजकों ने सन्ध्या के भ्रम से शिव को प्रणाम किया। पर उन्हें उसका कोई लाभ नहीं हुआ, यह भाव है।

छन्द—वसन्त तिलक।

५९. मेघों के सदृश मेलवाड़ करते रथों, घोड़े और हाथियों के निकल जाने से, एवं वृष्टिपात के सदृश बाणों का चलना बन्द हो जाने से, और बिजली की चमक की तरह चलती हुई तलवार से मुक्त हो जाने पर, आकाश में ऐसे सौंदर्य का सञ्चार हुआ जैसा सूर्य की चमक से शरद्कालीन नभ में होता है।

६०. धीरे-धीरे कांव-कांव करता हुआ, कौवों का एक झुंड, काकुत्स्थ के वंशज (राम) के बाणों से मारे गये हाथियों के सर पर बैठ कर, अपने उदर के गढ़े को राक्षसों के मांस और मज्जा से भर, अपने टोंट के अग्रभाग पर लगे हुए रुधिर को, हाथियों के दाँतों पर रगड़ कर साफ कर रहा था।

६१. दोनों राजपुत्र (राम और और लक्ष्मण) ने जिन्हें तपस्विकन्यायें (हर्षातिरेक से बहते हुए) अश्रुधाराओं से अर्घ्य दे रही थीं और जिनका मृगों का झुंड पीछा कर रहा था, मुनि के कुटियों में जाकर, सुवाहु और मारीच के बाणों से लगे हुए घावों से अलंकृत मस्तकों को गुरुचरणों में नवाया।

पाँचवाँ सर्ग समाप्त।

षष्ठः सर्गः

उच्चचाल ततः स्रष्टा जगदंशस्य मैथिलम्।
अनुग्रहीतुमग्रण्य गृहिणामाहितक्रतुम् ॥१॥

विभ्रत्सन्ध्याविधिस्नानसवर्धितरुचो जटाः।
ज्वाला इव तपोवह्नेः शालिशूकाग्रपिङ्गलाः ॥२॥

तेजसातपसो दीप्तः स्निग्धश्च करुणागुणात्।
समं सन्दर्शितादित्यचन्द्रोदय इवार्णवः ॥३॥

शिरः प्रदेशलम्बिन्या कुर्वन् रुद्राक्षमालया।
फलिता इव तीर्थाम्भः सेकपुष्ट्या जटालताः ॥४॥

अरण्यदेवताभिः स प्रयुक्तवलिमङ्गलः।
व्रती निरगमत् सत्रान्मेघाद्ब्रध्न इव ज्वलन् ॥५॥

१ ससार के एक अश का सृजन करने वाले (विश्वामित्र) अपने आश्रम से, गृहस्थो के अग्रणी, मिथिलाधिपति (जनक), जिन्होने हाल ही मे एक यज्ञ आरम्भ किया था, को अनुगृहीत करने के लिये उठ कर चले।

२ सिर पर जटाजूट धारण किये हुए, सन्ध्यावन्दन के हेतु विधिवत नित्यस्नान से जिनकी कान्ति बढ गई थी और चावल के पौधो के अग्रभाग के सदृश पिङ्गलवर्ण वाले, तपस्या की अग्नि की लपक के समान (वे विश्वामित्र, यज्ञशाला से निकले)।

विशेष—श्लोक २ से ५ तक 'कलापक' हैं। हर श्लोक के साथ "स सत्रान्निरगमत्" (वे यज्ञशाला से निकले) पढ़ने से अन्वय होगा। कलापक की व्याख्या देखिये २–२।

३ तपस्या की प्रभा से दमकते हुए, करुणा के कारण स्निग्ध, समुद्र मे सूर्य और चन्द्र के एक साथ उदय होने के समान।

४ सिर से लटकती हुई रुद्राक्ष की माला के सम्पर्क से ऐसा लगता था जैसे तीर्थ के जल से सिञ्चित उनकी जटा रूपी लता मे फल लगे हो।

५. वह तपस्वी जिसे वन देवताओ ने मगल बलि अर्पित की थी यज्ञशाला से ऐसे निकला जैसे दमकता हुआ सूर्य बादल से निकलता है।

निनाय हरिणव्रातं स्वयं यत्नेन वर्द्धितम्।
प्रस्थितं सह संरुध्य वाष्पापूरितलोचनौ ॥६॥

गमनव्याहृतारम्भप्रणामेषु महर्षिभिः।
प्राणिभिः शिरसि स्पृष्टौ हव्यधूमसुगन्धिभिः ॥७॥

वैखानसवधूहस्तलम्भितार्घ्यकृताशिषौ।
तौ द्रष्टुकामौ मेदिन्या ईश्वरस्य सुतौ धनुः ॥८॥

ततश्चिरपरित्यक्तं गौतमस्य तमोनुदः।
विवेश विश्वभुग्धाम्नो धाम वर्त्मवशाद्वशी ॥९॥

स्थपुटासु कुटीरस्य निकटाङ्गनभूमिषु।
प्ररूढदर्भसन्दर्भघासग्रासोद्यतद्विपम् ॥१०॥

क्वचिदुद्देहिकाऽऽलीढजीर्णवल्कलमन्यतः।
आरण्यतुटुमच्छिन्नशीर्णकृष्णमृगाजिनम् ॥११॥

६. अपने यत्नों से पाले-पोसे, पीछे-पीछे चलते हुए मृगों के झुंड को रोक कर, हर्षातिरेक से आँखों में आँसू भरे राम और लक्ष्मण को साथ लेकर (विश्वामित्र) चल पड़े।

विशेष—श्लोक ६ से ८ तक 'विशेषक' है।
'विशेषक' की व्याख्या देखिये, २-२।

७. प्रस्थान की चर्चा के आरम्भ में जब दोनों भाइयों ने गुरुजनों को प्रणाम किया तो उन लोगों ने हव्य से सुगंधित अपने हाथों से उनके सिर को स्पर्श किया।

८. जब आश्रमवासियों की पत्नियों ने पृथ्वीपति के उन दोनों पुत्रों को अर्घ्य प्रदान किया तो उन्होंने उनको आशीर्वाद दिया।

९. तब जितेन्द्रिय मुनि (विश्वामित्र) अग्नि के समान तेजस्वी, अन्धकार को नाश करने वाले, गौतम के आश्रम में गये, जो रास्ते ही में था और जो बहुत दिनों से खाली पड़ा था।

१०. जहाँ कुटी के निकट, आँगन में उगी हुई घास को खाने के लिये हाथी उद्यत थे।

विशेष—१० से १३ श्लोक तक 'कुलक' में आश्रम वर्णन है।
कुलक की व्याख्या देखिये, २-२।

११. जहाँ वल्कल के पुराने वस्त्रों को दीमकों ने खा डाला था और कृष्ण मृग के चर्म जिनको जंगली चूहों ने कुतर डाला था, जर्जर होकर सूख गये थे।

तलस्थितजरत्कुम्भमुखान्निर्गच्छताऽहिना ।
आवर्जितपयस्तिम्यद् वृक्षमूलमिव क्वचित् ॥१२॥

क्वचिद्विष्णुप्रतिच्छन्द कुक्षिस्थविवराननात् ।
नकुलैरन्त्रवत्कृष्टवेष्टमानसरीसृपम् ॥१३॥

तस्मिन्निजपदस्पर्शत्याजितग्रावविग्रहम् ।
पप्रच्छ स्त्रीमय तेजो राम. शापस्य सम्भवम् ॥१४॥

निगद्यासो सुनासीर व्रीडा नम्रीकृतानना ।
न्यवीवददनुक्त्वैव यौवनाविनय पुरा ॥१५॥

ययौ रामोऽथ त देश मरुतामास वेगिनाम् ।
पुरुहूत हृतभ्रूणच्छेदेभ्यो यत्र सभव. ॥१६॥

प्रतीत्या लङ्घिताध्वानस्ते तोरणमणित्विषा ।
इति चेतोहरा राममभिव्यातेनिरे गिर. ॥१७॥

मत्तमातङ्गसदानदामनिर्दलितत्वच. ।
अजय्यत्व वदन्तीव यस्य पर्यन्तभूरुह ॥१८॥

१२ कही वृक्षो की जडें, थी जो पृथ्वी पर पडे हुए घडे के पानी से जैसे भीग गई हो, जब उसके मोहडे से निकलते हुए साँप ने उसे लुढका दिया ।

१३ कही विष्णु की मूर्ति के पेट के गढे से, उस मे गुडरी मार कर बैठे हुए सर्प को अँतडी की तरह, नेवले खीच रहे थे ।

१४ आश्रम मे राम ने उस कान्तिमयी स्त्री से, जिसने उनके चरणस्पर्श से पत्थर के शरीर को छोड दिया था, शाप का कारण पूछा ।

१५ 'पूर्व समय मे इन्द्र" कह कर लज्जा से मुख नीचा किये हुए, बिना और कुछ कहे उसने अपनी यौवनावस्था मे अपने पतन की बात कह डाली ।

१६ तब राम उस प्रदेश मे गये जहाँ इन्द्र ने गर्भ के टुकडे-टुकडे कर डाले थे और उनसे वेगशाली मरुतो का जन्म हुआ था ।

१७ अपने अनुभव एव तोरण द्वारो पर जडी हुई मणियो की प्रभा से मार्ग को पार कर वे राम से मनोहारी वचन बोले ।

१८ नगर के पर्यन्त भाग पर लगे हुए वृक्षो के वक्ले, उनम (वृक्षो मे) बँधे हुए मस्त हाथियो की रस्सी से उधड जाने से, जैसे नगर के अजेय होने का विज्ञापन कर रहे थे ।

तारावज्रस्पृशो याति पिधानत्वं निशाकरः ।
यत्र प्राकारचक्रस्य नभोमध्यस्थमण्डलः ॥१६॥

मध्ये कुवलयाक्रान्तमहापद्मविभूषणः ।
अवतीर्णघनालिश्रीर्यत्खातः सागरायते ॥२०॥

वप्राजगरभोगेन वेष्टमानः समन्ततः ।
पिण्डीभूत इव त्रासाद्घनो यद्गृहसंचयः ॥२१॥

यद्गोपुरविटङ्काग्रचन्द्रकान्तमणिस्रवम् ।
रसयन्ति स्यदश्रान्ताः शीतदीधितिवाजिनः ॥२२॥

विटङ्कभुजसंप्राप्त सहस्रकरमूर्तिना ।
विग्रहेण यदावाससन्तानो भार्गवायते ॥२३॥

यद्देवगृहशृङ्गस्थपद्मरागप्रभाऽऽहतम् ।
व्योममध्यं प्रपद्यापि विम्बं वालायते रवेः ॥२४॥

हर्म्यशृङ्गेषु निर्द्धूतध्वान्ता यत्र मणित्विषः ।
ज्यौत्स्नः कृष्ण इति ज्ञानं जने रुन्धन्ति पक्षयोः ॥२५॥

१६. जहाँ आकाश के बीच में स्थित चन्द्र मण्डल, तारागणों को छूटी हुई, नगर की गोलाकार चहारदीवारी के लिये ढक्कन बन गया था।

२०. नगर की परिखा जो श्वेत और नील कमलों से विभूषित थी और जो बीच में मँड़राते हुए झुंड के झुंड भ्रमरों से सुशोभित थी, समुद्र के समान लगती थी।

२१. अजगर के समान प्राचीर की परिधि के भीतर घने बने हुए मकानों का समूह ऐसा लगता था जैसे वह, भय के कारण एक स्थान पर एकत्र हो गया हो।

२२. चन्द्रमा के घोड़े, अपनी तेज चाल के कारण थक कर, नगर के फाटकों पर कबूतर की छतरियों से लटकते चन्द्रकान्त मणि से रसते हुए जल को चाटते हैं।

२३. हाथों के समान लगने वाली, कबूतरों की छतरियों के कारण, सूर्य के समान मकानों की परम्परा शुक्र के सदृश लगती थी।

२४. यद्यपि सूर्य का बिम्ब आकाश के मध्य में आ गया था (अर्थात् यद्यपि वह तरुण सूर्य था) पर देवालयों के शृंगों पर लगे हुए, कमल के रंग के हीरों की चमक से हार कर वह बाल सूर्य लगता था।

२५. जहाँ मकान की मीनारों पर लगे हुए रत्नों की प्रभा के कारण, अन्धकार दूर हो जाने से लोगों को यह पता नहीं चल पाता था कि शुक्ल पक्ष है या कृष्ण पक्ष।

यत्र वातायनासन्नवारमुख्यामुखेन्दवः ।
रथ्यासंचारिणो यूनः स्खलयन्ति पदे पदे ॥२६॥

श्रुत्वा यत्सौधपृष्ठेषु विमानशिखिनिस्वनम् ।
याति शैथिल्यमुष्णांशुहयभोगीन्द्रबन्धनम् ॥२७॥

सोपानरत्ननिर्भिन्नतमश्छेदेन दर्शिता ।
ग्लायन्ति यत्र न सरश्चक्रवाका निशास्वपि ॥२८॥

यस्य हर्म्यसमासन्नतिग्मदीधितिवाजिनः ।
मन्दं व्रजन्ति सङ्गीतवीणाऽऽवर्जितचेतसः ॥२९॥

पौरसन्दोहभोगस्य श्रिया वज्रभृतः पुरीम् ।
अधो विधत्ते धामेदं मैथिलस्य पुरं परम् ॥३०॥

इति व्याहरतैवाथ तेन स्थानं महीयसः ।
पुरमृद्धं क्रतुपतेर्निन्याते नेतुरात्मजौ ॥३१॥

कृतपाद्यो भुवोभर्तुः स व्रती प्रमदाश्रुभिः ।
विष्टरं परिजग्राह सिंहचर्मोत्तरच्छदम् ॥३२॥

२६ जहाँ राजपथ की खिडकियों पर बैठी हुई, प्रमुख चन्द्रमुखी वेश्याओं के कारण, राह मे सैलानी युवा पुरुष पग-पग पर ठोकर खाते थे ।

२७ राजमहल की छत पर चलते हुए मयूरों की वाणी सुनकर सूर्य के घोडो की विशिष्ट सर्पों की रास ढीली पड जाती थी।

२८ जहाँ सीढ़ियो पर जडे हुए रत्नो की प्रभा से सरोवर मे रहने वाला चकवा दिखलाई पड जाता था और रात्रि मे भी अन्धकार दूर हो जाने के कारण उसकी उदासी दूर हो जाती थी (वह समझता था कि दिन हो गया, अब चकई से भेंट होगी, यह भाव है) ।

२९ जहाँ सूर्य के घोडे महलो के निकट पहुँच कर, गायन और वीणा के स्वर से आकृष्ट हो धीमे धीमे चलने लगते थे ।

३० मिथिलाधिपति का यह नगर पौरजनो के आनन्द की प्रचुर सामग्री की श्री के कारण इन्द्रपुरी को नीचा दिखाता था ।

३१ इस प्रकार कह कर वे (विश्वामित्र), (राजाओ के) नेता (दशरथ) के दोनो पुत्रो को, यज्ञ करने मे प्रमुख महात्मा (जनक) के समृद्ध स्थान पर ले गये ।

३२ पृथ्वीपति (जनक) से पादार्घ्य लेकर, वह व्रती (विश्वामित्र) नेत्रो मे आनन्द के आँसू भर कर, एक आसन पर जिसके ऊपर सिंह का चर्म था, बैठे ।

स्तुत्याऽऽसुतीवलं सत्रे जगादोत्साह्यन्मुनिः ।
प्रभोर्भाजत एवाग्रे निःस्पृहेण प्रभोरपि ॥३३॥

यो धर्मस्य धृतः सप्ततन्तुभिः सगरादिभिः ।
तन्तुः स एव सम्राजा सम्यगालम्बितस्त्वया ॥३४॥

अपि सत्यां विस्रसायामविस्रस्तां तव श्रियम् ।
विक्रमस्य वदन्तीव सत्रसंभारसम्पदः ॥३५॥

कृतवेलाव्यतिक्रान्तिस्त्वरासङ्कोचिताम्बरा ।
साभिसारेव ते कीर्तिर्दूरमाक्रामदाशया ॥३६॥

कच्चित्स्वार्थे क्रतुरयं स्वर्ग्यस्तव फलस्पृहाम् ।
विनैव प्रथते कच्चिन्निःस्वम्प्रति वदान्यता ॥३७॥

आदाय करमाढ्येभ्यः कीकटेष्वपि वर्षसि ।
प्रपीय वारि सिन्धुभ्यः स्थलेष्विव घनाघनः ॥३८॥

३३. विश्वामित्र, जिनके हृदय में किसी प्रकार का लालच नहीं था, विधिवत् यज्ञ करने वाले (जनक) को उत्साहित करते, उनसे स्तुति के वचन बोले ।

३४. सगरादि, आपके पूर्वजों ने, जो यज्ञों के द्वारा धर्माचरण के सूत्र का बराबर अवलम्बन किया था, उसी को सम्राट ने (आपने) उपयुक्तरीति से ग्रहण किया है ।

३५. यद्यपि आप वृद्ध हो गये हैं पर आपके यज्ञों की अभिवृद्धि का ओज, जैसे कह रहा है कि आपके पराक्रम का वैभव बूढ़ा नहीं हुआ है ।

३६. आपकी कीर्ति ने, जिसकी तीव्र गति से आकाश छोटा पड़ गया है और जो समुद्र तट को पार कर गई है, अभिसारिका की तरह लम्बे-लम्बे डग बढ़ाते हुए दिगन्त के पार चली गई है ।

३७. यह स्वर्ग में ले जाने वाला यज्ञ आप स्वार्थ के लिये कर रहे हैं या विना किसी लालच के, गरीबों के प्रति उदारता से कर रहे हैं ।

३८. (मैं आशा करता हूं कि) धनी लगों से कर लेकर आप उसे गरीबों को देते हैं । जैसे बरसने वाला मेघ नदियों से पानी लेकर पृथ्वी पर बरसाता है ।

विशेष—प्रजानामेव भूत्यर्थं सताभ्यो बलिमग्रहीत् ।
सहस्र गुण मुत्स्रष्टु मादत्तेहि रसं रविः ॥ रघुवंश –१–१८ ।

नवे वयसि राज्यार्थं प्रविधाय जरा गतान्।
कच्चित्पुष्णासि ते मृत्यान् सादर समयेऽक्षमे ॥३९॥

त्वद्विक्रमेण वैधव्यं प्रापिता रिपुयोषित.।
वालप्राणार्थिनी. कच्चित्सम्यग्रक्षसि वन्धुवत् ॥४०॥

द्वयेनादौ त्रिवर्गस्य कच्चित्साम्य गतश्चिरम्।
धर्मोऽद्य वयसो वृद्धया सह सवर्द्धते तव ॥४१॥

इति प्रश्नावकाशस्य विरामे रामलक्ष्मणौ।
मुनेर्विवेद वैदेहो द्रष्टुकामौ निज धनु.॥४२॥

एकमुद्रेचित तस्य भ्रूचापमनुजीविभि.।
चापस्यानयने हेतु. क्षणमास क्षमापते.॥४३॥

३९ (मैं आशा करता हूँ कि) वे नौकर जो अपनी युवावस्था में राज्य की सेवा मे अगुवा थे, वे जब बूढे होकर काम करने के योग्य नहीं रह जाते, उस समय आप उनका आदर से भरण-पोषण करते हैं।

४० (मैं आशा करता हूँ कि) आप अपने शत्रुओ की स्त्रियो की, जो आपके पराक्रम से विधवा हो गई हैं और जो अपने बच्चो की रक्षा के लिये आपसे प्रार्थना करती हैं, उनकी अपने परिवार की भाँति आप रक्षा करते हैं।

४१ (मैं आशा करता हूँ कि) पहिले की भाँति जैसे आपका धर्म, त्रिवर्ग के अन्य दो वर्गों (अर्थात् अर्थ और काम) से समता रखता था वैस अब भी आपकी आयु की वृद्धि के साथ-साथ उस समता की वृद्धि हो रही है।

कच्चिदर्थं च धर्मं च काम च जयतावर।
विभज्य काले कालज्ञ सर्वान् भरत सेवसे॥
अयोध्याकाण्ड, १००-६३।

विशेष—शास्त्र कहता है "धर्मार्थं कामा सममेव सेव्या· । यस्त्वेक सेव्य स नरो जघन्य" धर्म, अर्थ और काम का समता से व्यवहार करना चाहिये। जो मनुष्य केवल एक की सेवा करता है वह जघन्य है।

४२. इस प्रकार जब मुनि पूछ चुके तब विदेहाधिपति को मालूम हुआ कि राम और लक्ष्मण उनका धनुष देखना चाहते हैं।

४३ तब पृथ्वीपति (जनक) के केवल क्षणभर के लिये एक भौंह को थोडा उठा देनेसे उनके नौकर लोग धनुष को उठा लाये।

वरवक्त्रेन्दु बिम्बत्विड्ग्रासगृध्नुं परं ग्रहम् ।
सीताविवाहसंयोगसुखरोधार्गलान्तरम् ॥४४॥

अहिर्बुध्नपरित्यागतीव्रशोकभरादिव ।
मध्ये लोहसमुद्गस्य निःशब्दंशयितं चिरम् ॥४५॥

अमार्दवमतिस्तब्धं गुणेनापि न नामितम् ।
ईशेन दर्शितस्नेहं नीचं जनमिवाग्रहम् ॥४६॥

चक्रीचकार कर्णान्तावतंसितनखद्युतिः ।
तद्दाशरथिरादाय सीताक्रयधनं धनुः ॥४७॥

ततस्त्रासकरो नादश्चापभङ्गसमुद्भवः ।
दिशः ससर्प रामस्य यशोघोषणडिण्डिमः ॥४८॥

क्षेत्र भूमिर्गुणस्यासौ सीतया सहिता वृता ।
वप्रैः फलवती सद्यः प्रचकम्पेऽखिला पुरी ॥४९॥

४४. जो वर (राम) के मुखचन्द्र के बिम्ब से निकली हुई प्रभा को कवलित करने के लिये लालायित भयानक ग्रह है, अथवा सीता के विवाह सम्बन्ध से उत्पन्न सुख के बन्द करने के लिये कोई दूसरी कुंडी है ।

विशेष —श्लोक ४३ से ४७ तक 'कलापक' है ।
"तदनुः दाशरथिः चक्री चकार" से अन्वय होगा।

४५. जो शङ्कर से परित्यक्त होने के कारण महादुःख से व्यथित होकर लोहे के कोष में बहुत काल से चुपचाप पड़ा था ।

४६. जो कठोर, बड़ा मजबूत, प्रत्यञ्चा से भी न झुकने वाला, शिव को बहुत प्यारा, नीच की भांति न पकड़ में आने वाला था ।

४७. दशरथ के पुत्र (राम) ने, जिनके नखों की प्रभा उनके कान का अलङ्कार बन गई थी (कान तक खींचने के कारण, यह भाव है) उस धनुष को जो सीता के क्रय का मूल्य था, चक्र के समान झुका दिया ।

४८. धनुष के टूट जाने से ऐसा भयानक शब्द दिशाओं में गूंज गया जैसे वह राम के यश की घोषणा करने वाला नगाड़ा हो ।

४९. गुणों की क्षेत्र भूमि, तुरन्त फल देने वाली, सीता सहित प्राचीर से घिरी हुई वह सम्पूर्ण नगरी कांप उठी ।

रोमोद्भेदापदेशेन हर्षमंकुरितं हृदि ।
सिञ्चन्नस्रुस्रवेण स्म मुनिमाह महीपति. ॥५०॥

प्रौढेऽपि वयसि प्रायो रुणद्धि तपसि स्पृहाम् ।
यच्चापभङ्गदेय मे प्रार्णं सीमन्तिनीधनम् ॥५१॥

तद्रामस्य गत दास्य विक्रमक्रयलम्भितम् ।
अस्य ह्रस्वद्वितीये मे न्यस्ता विद्ध्यूर्मिलामपि ॥५२॥

शोकाख्यमस्य वैदेह्या विवाहपरिलम्बजम् ।
हृच्छल्यमस्तुकारेण तपस्यन् निचकर्ष स. ॥५३॥

अथ दूतास्थित. प्रायाद्राजद्वय मनोरथ. ।
अयोध्यामन्यराजन्यप्रीतिप्रशमनो रथ. ॥५४॥

यत्रासीद्रघुपतिरूपनिर्जितोऽसौ वैलक्ष्यक्षतकृतसम्मदावसाद. ।
लालाटयज्वलनरयेण भूतभर्त्रा नौरात्म्य हृदयभुव. शिवाय सृष्टम् ॥५५॥

५०. पृथ्वीपति (जनक) जिनके हृदय मे, अश्रु से सिञ्चित, हर्ष, अंकुरा कर रोमाञ्च के बहाने निकल पडा था, मुनि से बोले ।

५१ धनुष के तोडने के कारण स्त्रीरूपी धन के देने का ऋण जो हो गया है वह वृद्धावस्था मे भी प्राय तपस्या करने की इच्छा को रोकता है ।

५२. विक्रम के द्वारा खरीदने से जो मेरे उपर ऋण था वह अब राम के पास दासता से लिये चला गया । अब आप यह जाने कि मैं उर्मिला को इनके छोटे भाई (लक्ष्मण) को देता हूँ ।

५३ तपस्या म निष्ठा रखने वाले मुनि (विश्वामित्र) ने, सीता के विवाह मे देर होने के कारण जो जनक के हृदय मे शोकरूपी भाला चुभ रहा था उसे अपनी स्वीकृति देकर निकाल दिया ।

५४ तब एक रथ दोनो राजाओं (जनक और दशरथ) के मनोरथो के लिये हुए, उन राज-पुत्रो के साथ जो (सीता की प्रीति के) शान्ति व्यवस्था के दूत थे, अयोध्या भेजा गया ।

५५. राम के रूपसौंदर्य से पराजित, कामदेव के हर्षोन्माद का, लज्जा के आघात से जो नाश नहीं हुआ उसका कारण यह था कि गणो के स्वामी (शङ्कर) ने उसे (कामदेव को) अपने मस्तक की अग्नि की ज्वाला से उसकी आत्मा का विनाश कर दिया था ।

पीनांसो नियतमुरस्तटो विशालः क्षामं तद्व्यथयति मध्यमं शरीरं ।
धात्रेति स्वयमनुचिन्त्य लम्बबाहुस्तम्भाभ्यां दृढमिव यन्त्रितोऽस्य देहः ॥५६॥

नेत्रान्ताधरकरपल्लवप्रभाभिस्तेनोष्णद्युतिकरकुंकुमानुलिप्तः ।
व्याकोशारुणवनजप्रभाविशेषो निर्जित्याहित इव पादयोरधस्तात् ॥५७॥

ज्ञानं विलोचनमिति प्रथिते तदीये नेत्रे उभे विमलवृत्तिगुणस्वभावे ।
एकं तयोः श्रुतिपथस्य समीपमात्रं यातं प्रपन्नमखिलश्रुतिपारमन्यत् ॥५८॥

इत्थं वराश्रयकथेषु जनेषु सीता नम्रेण घर्मसलिलास्पदगण्ड लेखा ।
तस्थौ मुखेन शशिनिर्मलदन्तकान्तिज्योत्स्नानिषिक्तदशनच्छदपल्लवेन ॥५९॥

इति षष्ठः सर्गः ।

५६. उनके (राम के) कंधे मांसल थे और वक्ष विशाल था, उनका कटिप्रदेश पतला था, अतः उनके शरीर को अवश्य कष्ट होता होगा, ऐसा स्वयं ब्रह्मा ने विचार कर उनके शरीर को लम्बी भुजाओं के स्तम्भों से दृढता से बांध दिया ।

५७. अपनी तिरछी आँखों, अधरों और पल्लव के सदृश हाथों की कान्ति से, सूर्य की किरणों की अरुणाई से व्याप्त प्रफुल्ल कमलों की प्रभा को उन्होंने (राम ने) पराजित कर, जैसे अपने पैर के तलुओं के नीचे रख लिया हो ।

५८. निर्मल, गुण और स्वभाव से युक्त, उनकी दो प्रसिद्ध आँखें थीं । एक दृष्टि चक्षु और दूसरी ज्ञान चक्षु । उन दोनों में से पहिली (दृष्टिचक्षु) तो केवल कान तक पहुंचती थी, पर दूसरी समस्त वेदों के पार तक जाती थी ।

५९. जब इस प्रकार लोग राम से सम्बन्धित कथाओं का बखान कर रहे थे तब, सीता जिनके गालों पर गर्मी के कारण, पसीने की रेखा खिंच गई थी और जिनके चन्द्रमा के समान उज्ज्वल दांतों की प्रभा से उसके पल्लव सदृश ओंठ व्याप्त थे, नम्रता से अपना मुख नीचा किये, खड़ी थी ।

छठा सर्ग समाप्त ।

सप्तमः सर्गः

ततो धरित्रीतनया गरीय. सा शासन प्राप्य गुरोरलघ्यम् ।
स्थपत्यशुद्धान्तजनै. परीता जगाम कर्त्तुं व्रतिनो नमस्याम् ॥१॥

सुखेन नत्वा गज कुम्भपीनस्तनावकृष्टा चरणौ महर्षे ।
तमेव भूयो भरमुद्वहन्ती समुन्ननाम प्रतिपद्य यत्नम् ॥२॥

सत्य यदस्या. प्रविभाव्यरागो दृष्टिप्रवेक. खलु कृष्णवर्त्मा ।
स्नेहेरित तद्धनदोपमस्य धैर्येन्धन तेन ददाह भर्त्तुः ॥३॥

विन्यस्तपीनस्तनहेमकुम्भा स्वेदाम्बुभिस्तद्धृदयोपकार्या ।
मनोभुवस्तत्प्रथमप्रवेशे सिक्तापि नो तत्र रज शशाम ॥४॥

तुष्टो नु भङ्गादविपन्नधाम्न' शैवस्य चापस्य सुबाहुशत्रुम् ।
स्मरस्तमालिङ्ग्य तया प्रयुक्तश्चक्रे विहस्त नु विशालदृष्ट्या ॥५॥

१ तब वह धरती की पुत्री (सीता) अपने पिता की सारगर्भित एव अलड्घनीय आज्ञा से महल के अन्त पुर मे रहने वाली परिचारिकाओं के साथ, व्रती (विश्वामित्र) को प्रणाम करने के हेतु गई।

२. हाथी के कुम्भ के समान, मासल स्तना वाली सीता ने पहिले बडी सरलता से झुक कर महर्षि को प्रणाम किया और फिर (स्तनो के बोझ के कारण) प्रयास से उठी।

३ सीता की मोहक, तिरछी चितवनें, जिनमें प्रेम छलछला रहा था, सचमुच साक्षात् अग्नि थी। अत सीता ने स्नेह से उनका प्रयोग कर, कुबेर के समान राम के धैर्यरूपी ईंधन को जला डाला। (अर्थात्) उनमे फिर धैर्य न रह गया।

४. कामदेव के प्रथम प्रवेश के समय सीता के हृदयरूपी रगमहल के सामने जो कामोद्वेग का रज पडा था और जिसके द्वार पर सुवर्ण कुम्भ के समान दो मासल स्तन रखे थे, उस रज का सीता के स्वेद से सींचे जाने पर भी शमन नहीहुआ।

विशेष—उपकार्या="सौधोऽस्त्री राजसदनमुपकार्योपकारिका।" इत्यमर।

५ शिव के तेज सम्पन्न धनुष के तोडने वाले, सुबाहु के शत्रु राम का आलिङ्गन कर क्या कामदेव सन्तुष्ट हुआ अथवा बडे बडे नेत्रो वाली से प्रेरित होकर उसने उन्हें बेकाबू कर दिया।

विधातृमुख्यैरपि दृश्यरूपं रूपं निरूप्यार्धनिरीक्षितेन ।
एवं स गुण्यो गणयाम्बभूव भूम्ना मनस्वी मनसैव तस्याः ॥६॥

प्रसीद मैवं परिभूदखण्डं ताराधिपं ते वदनामृतांशुः ।
इति प्रियायाः पतितेव पादे ताराततिर्दीप्रनखच्छलेन ॥७॥

कृष्ट्वा नितान्तंकृशवृत्तिमध्यं मास्म च्छिनच्छ्रोणिरिति प्रचिन्त्य ।
गुर्वी तदूरुद्वयशातकुम्भस्तम्भद्वयेनेव धृता विधात्रा ॥८॥

तदस्तु सोष्मं कठिनं प्रकृत्या तनोति तापं स्तनयोर्द्वयं यत् ।
मध्यस्थमप्येतदनिन्द्यवृत्तेर्वलित्रयं मांदहतीति चित्रम् ॥९॥

स्तनौ नु कुम्भप्रतिमौ सुदत्या निःशेषवक्षस्तटवद्धविम्बौ ।
पिण्डौ नु पीनौ नवयौवनस्य न्यस्तौ शरीराद‌तिरिक्तवन्तौ ॥१०॥

विभाति तन्व्या नवरोमराजिः शरीरजन्मानलधूमरेखा ।
अन्योन्यवाधिस्तनमण्डलस्य मध्यस्य धात्रा विहितेव सीमा ॥११॥

. ब्रह्मादिक देवता जिसके रूप को बड़े चाव से देखते थे, ऐसी सीता के रूप को एक तिरछी चितवन से देख कर गुणवान् और मनस्वी राम ने अपने विशाल मन में सीता के सम्बन्ध में इस प्रकार सोचा ।

. मेरी प्रिया के चमकते हुए नख ऐसे लगते हैं जैसे ताराओं की पंक्ति उसके पैरों पड़ कर यह कह रही हो कि "प्रसन्न होजाओ, अपने मुखचन्द्र से सम्पूर्ण नक्षत्र-मण्डल के स्वामी (चन्द्रमा) को लज्जित न करो" ।

८. उसकी (सीता की) स्वाभाविक पतली कमर थी, कसने पर कहीं उसके भारी नितम्ब कमर से अलग न हो जांय, यह विचार कर ब्रह्मा ने जैसे उन्हें (नितम्बों को) सहारा देने के लिये दो सुनहली टेक लगा दी हो ।

९. सीता के दोनों स्तन जो स्वभाव से ही कड़े और उष्ण हैं, मेरे हृदय में दाह का विस्तार करते हैं, सो तो ठीक ही है, परन्तु इस अनिन्द्य सीता की बीच में स्थित त्रिवली, मुझमें दाह उत्पन्न करती है, यह आश्चर्य है ।

१०. क्या इस सुन्दर दांतों वाली (सीता) के सम्पूर्ण वक्ष को घेरे हुए दोनों स्तन, दो कुम्भ की प्रतिमाएं है अथवा चढ़ती जवानी के दो मांस-पिंड है जो अतिरिक्त होने के कारण अलग रख दिये गये हैं ।

११. उस सुकुमाराङ्गी सीता के एक दूसरे से सटे हुए स्तनों के बीच में, कामाग्नि के धुएँ की रेखा के समान नये रोमों की लकीर है, वह जैसे ब्रह्मा द्वारा दोनों स्तनों के बीच की निर्धारित सीमा हो ।

यात्यङ्गदोऽप्येष विवृद्धदीप्तिरनङ्गदत्वं न्यसनेन यत्र ।
तथाहि शक्तिर्मदनस्य दाने चारुप्रकोष्ठस्य भुजद्वयस्य ॥१२॥

वक्त्रेन्दुलीलामनुयातुमस्याः कलान्तराणि प्रतिपद्य चन्द्रः ।
पूर्णोऽपि साधर्म्यविशेषशून्य क्रमेण शोकादिव याति हानिम् ॥१३॥

मृगाङ्गनाना नयनानि पूर्वं विधाय नीलानि च नीरजानि ।
कृतप्रयोगेण पुनर्विधात्रा सृष्ट नु नेत्रद्वयमायताक्ष्याः ॥१४॥

अन्वेति कान्त्या कमनीयमस्या युग्मं भ्रुवोरायतनम्रलेखम् ।
रोषेण कृत्तस्य हरेण मध्ये च्छेदद्वय मन्मथकार्मुकस्य ॥१५॥

असर्पतामापतितालकान्तपर्यन्तकान्ति श्रुतिमूलमस्या ।
भ्रुवौ नु वक्तु तरलत्वमक्ष्णोर्भ्रूयुग्मकौटिल्यमिमे नु दृष्टी ॥१६॥

तन्व्या मनोज्ञस्वरनैपुणेन विनिर्जितो रोषविलोहिताक्ष ।
प्रसक्त चिन्ताऽऽहितमन्यपुष्ट शोकेन काष्र्ण्यं वहतीति मन्ये ॥१७॥

१२ वह चमचमाता हुआ बाजूबद (अङ्गद) भी उसके हाथ मे पड कर कामोद्दीपन करता है क्योकि उसके दोनो भुजाओ के प्रकोष्ठ (अग्रभाग) इतने सुन्दर हैं कि वे स्वय कामोद्दीपन करते हैं ।

विशेष--अङ्गद और अनङ्गद मे चमत्कार है ।

१३ इसके (सीता के) मुखचन्द्र की थिरकन की नकल करने लिये, चन्द्रमा, क्रमश बढ़ता था, परन्तु सम्पूर्णता को प्राप्त करने पर भी जब उसमे सीता के मुख के समान सौंदर्य नही आया तो, जैसे शोक के कारण वह धीरे-धीरे क्षीण होने लगा ।

१४ पहिले हरिणियो की आँखें और नील कमल को बना कर जब विधाता का हाथ खूब मँज गया तब फिर उन्होने, बडे बडे नेत्रो वाली सीता की दोनो आँखो को बनाया ।

१५ सीता की लम्बी एव कोनो पर नुकीली और झुकी हुई भौहे, कामदेव के धनुष के टुकडो दो का अनुकरण करती थी, जिसे (जिस धनुष को) क्रोधयुक्त शिव ने बीच से काट डाला था ।

१६. क्या इसकी (सीता की) भौहें कान की जड तक, जिसकी प्रभा लटकते हुए लटो के अग्रभाग तक बिखर रही हैं, आँखो की चञ्चलता बताने के लिये पहुँच गई हैं। अथवा उसकी बडी बडी आँखें ही भौहो की कुटिलता की शिकायत करने वहाँ तक पहुँच गई हैं।

१७. ऐसा लगता है कि कोमलाङ्गी (सीता) की मधुर बोलीसे हार कर कोयल की आँखें क्रोध से लाल हो गई हैं और उसका शरीर निरन्तर चिन्ता से काला पड गया है ।

पुष्पायुधः स्वात्मनि शस्त्रपातान् कुर्वीत सीताऽऽकृति वीक्ष्य रत्नम् ।
चित्रीयते तत्र यदात्मयोनेस्तीव्रा मयि व्यापृतिरायुधानाम् ॥१८॥

सति स्म तस्यातिगुरुप्रतर्के चेतस्यथ प्राह मुनिं नरेन्द्रः ।
प्रणम्य शुद्धान्तमुपैति पादौ तीर्थादनूनौ भवतः स्नुषेति ॥१६॥

कलत्रभारेण कुचद्वयस्य स्थाम्ना तथा मन्थरविक्रमायाः ।
आसीत् स तस्या गतिमन्थरत्वेऽसौ राजपुत्रोऽपि त्रितीयहेतुः ॥२०॥

अनुव्रजन्तं परिवारवर्गं प्रत्याहरन्ती किल नाम किञ्चित् ।
तिर्यग्विवृत्ताननचन्द्रविम्बा रामं जघानार्द्धनिरीक्षतेन ॥२१॥

तस्यां गतायां सह राघवाभ्यां भर्त्ता भुवः संयमिनं ततस्तम् ।
द्रष्टुं निनाय स्वयमृद्धिसारं सत्रस्य विप्रैरकृशं ततस्य ॥२२॥

दूरोऽपि देहेन वियोगवह्नेः प्रवर्द्धिताधिः स्फुटतीति भीतः ।
तद्रक्षणायैव कृतप्रयत्नो मुमोच तस्या हृदयं न रामः ॥२३॥

१८. सीता जैसे रत्न को देख कर पुष्पायुध (कामदेव) ठीक ही अपने ऊपर बाण छोड़ता है (अर्थात् स्वयं कामासक्त हो जाता है) और इसमें भी कोई आश्चर्य नहीं कि वह आत्मयोनि (कामदेव) मुझ पर भी बाणों का तीव्र आघात करता है ।

१६. जब इस प्रकार के गम्भीर तर्क राम के मन में उठ रहे थे उस समय राजा (जनक) मुनि से बोले—"यह आपकी बहू, आपके चरणों को जो तीर्थ से कम नहीं हैं, प्रणाम कर अन्तःपुर में जायगी ।"

२०. दोनों कुचों के भार से दबे कटि एवं नितम्ब उसके (सीता के) मन्थर गति से चलने के कारण थे ही, राजपुत्र (राम) भी तीसरे कारण हो गये ।

२१. अपने पीछे चलते हुए परिवार वर्ग से कुछ कहती हुई (कहने के बहाने से, यह भाव है) अपने मुखचन्द्र को थोड़ा पीछे मोड़ कर (सीता ने) अपनी तिरछी चितवन से राम पर प्रहार किया ।

२२. जब सीता चली गई तब पृथ्वीपति (जनक) राम और लक्ष्मण के सहित उस संयमी मुनि को वहां ले गये जहां ब्राह्मण लोग विधिपूर्वक, समृद्धशाली यज्ञ निरन्तर कर रहे थे ।

२३. कहीं वियोग की अग्नि, मनोव्यथा के कारण फूट न निकले इसलिये उसकी रक्षा के लिये, दृढ़ प्रयत्न राम, यद्यपि शरीर से दूर थे, पर उन्होंने सीता के हृदय को नहीं छोड़ा ।

यातेच रामे नयनाभिरामे दृष्ट्वा दिश किं फलमस्ति शून्या.।
इतीव पद्मायतलोचनाया विलोचने नेत्रजल रुरोध ॥२४॥

कृतेऽपि पाणिग्रहणे ममेय जाता परत्राहितरागवृत्ति.।
बालेति तस्या वलय कृशाङ्ग्या ससर्ज रोषेण यथा कराग्रम् ॥२५॥

सन्तापवह्निर्हृदि सन्नताङ्ग्या कामाहित. खेदविलोहितेन।
नेत्रद्वयेनेव बहि. प्रवृत्तज्वालावलि. सविविदे सखीभि ॥२६॥

याता नु सा तानवमङ्गजाग्नितप्तेचिर तद्धृदये निवासात्।
उत स्वकीये हृदि त निविष्टमूढ्वा तनुत्व श्रमज गता नु ॥२७॥

दूरेऽपि राम. परिकल्पवृत्त्या किं दृष्यतेऽस्मिन्नथ वा स्थितेऽपि।
किं मे प्रवास प्रतिभाति पापादित्यास तस्या त्रिविधो विकल्प. ॥२८॥

मृदुप्रबालास्तरणेऽपि तन्वी शिलातलेनैव धृतिं सिषेवे।
असृक्स्रवार्द्रे शरतल्पमध्ये सा पुष्पकेतोरिव वर्तमाना ॥२९॥

२४ जब नयनो को आह्लाद पहुँचाने वाले राम ही चले गये (अर्थात् सामने नहीं हैं) तो फिर सूनी दिशाओ ही को देखने मे क्या लाभ, ऐसा समझ कर आँसुओ ने आकर उस कमल-नयनी की दृष्टि को रोक दिया।

२५ यद्यपि मैंने इस बाला का पाणिग्रहण किया है फिर भी इसका प्रेम दूसरे (राम की) ओर है (अर्थात् राम से प्रेम करती है) ऐसा समझ कर, जैसे क्रोध मे, कंकण उसकी कलाई से सरक गया।

२६ सखियो ने झुकी हुई सीता की शोक सन्तप्त लाल लाल दोनो आँखो मे यह जान लिया कि कामदेव से प्रेरित उसके (सीता के) हृदय म जो शोकाग्नि है, उसकी शिखायें जैसे बाहर निकली पडती हैं।

२७ क्या यह (सीता) कामाग्नि से सन्तप्त राम के हृदय मे बहुत दिनो तक रहने के कारण दुबली हो गई है या राम को अपने हृदय मे रखने के श्रम से वह दुबली हो गई है।

२८ दूर होते हुए भी, राम क्या कल्पना मात्र से मेरे हृदय म दिखाई देते हैं। अथवा मेरे हृदय मे राम के रहते, मेरे पाप के कारण, मुझे ऐसा लगता है कि वे मुझसे दूर हैं, इस प्रकार की अनेक भावनायें, उसके (सीता के) मन मे उठती थीं।

२९ उस कोमलाङ्गी को शिलापट्ट पर, मुलायम नई पत्तियो के बिछावन पर, चैन नहीं पडता था जैसे वह कामदेव के रक्त से सींची हुई शरशय्या के बीच म पडी हो।

तुषाररश्मेरुदयेऽपि तस्या नेत्रोत्पलं नो मुकुलीबभूव ।
चन्द्रे मुखच्छद्मनि दीर्घकालमभ्यासतो नु प्रियचिन्तया नु ॥३०॥

सशीकरं गर्भदलं कदल्या न्यस्तं नताङ्ग्या हृदये सखीभिः ।
बबन्ध भिन्नस्फटिकावदातं पुष्पेषुबाणव्रणपट्टशोभाम् ॥३१॥

कस्यापि दृष्ट्या मयि यद्विरागः स्वपादसेवाभिरतेऽपि तत्किम् ।
इतीव शैथिल्यमतानि तस्या युग्मेन सन्नूपुरयोरमन्दम् ॥३२॥

सखीसमीपेऽपि सखेदवृत्तिश्चन्द्रातपैरप्यनुतापभाजा ।
देहेन वैदेहसुता निनाय दिनानि दीना कतिचित्कथञ्चित् ॥३३॥

सार्धं द्विजैः पावनसोमपाननिर्धूतपाप्मन्यथ सत्रनाथे ।
मखस्य कोटिं प्रकृतस्य मुख्ये क्षितिक्षितामीयुषि वीतविघ्नम् ॥३४॥

जनाधिनाथः पुरुहूतकल्पः समग्रशक्तिः सुतयुग्ममन्यत् ।
ततः समादाय सुमन्त्रसूतः पुरं प्रपेदे जनकस्य राज्ञः ॥३५॥

३०. उसके कमल नेत्र, शीतरश्मि चन्द्रमा के उदय होने पर भी नहीं मुँदे। इसका कारण या तो, छद्म से उसकी मुखाकृति लेने वाले, चन्द्रमा की ओर, अभ्यासवश देर तक देखना हो, या अपने प्रिय (राम) का निरन्तर चिन्तन हो।

३१. ओस से लिप्त, फटे हुए स्फटिक के समान उज्ज्वल, केले के भीतरी भाग का पत्ता, उस नवाङ्गी के हृदय पर लपेटने से ऐसा शोभायमान हुआ जैसे कामदेव के बाण के घाव पर पट्टी बँधी हो।

३२. 'यद्यपि हम निरन्तर उसके (सीता के) चरणों की सेवा में लगी रहती हैं फिर भी, क्या किसी दूसरे पर आँख लग जाने से हमारी ओर इसकी उदासीनता है,' यह सोच कर उसके दोनों नूपुरों में बड़ी शिथिलता आगई।

३३. सखियों के साथ रहने पर भी, खेद के कारण दीन, विदेहराज की पुत्री ने, जिसके शरीर में चाँदनी से जलन होती थी, थोड़े दिन किसी-न किसी तरह काटा।

३४. जब उस सत्र के अधिष्ठाता और राजाओं में अग्रगण्य महाराज जनक ने जिनके पाप, पवित्र सोम के पीने से नष्ट हो गये थे, ब्राह्मणों के साथ उस यज्ञ को बिना किसी विघ्न के समाप्त किया।

विशेष—यह और आगे वाला श्लोक मिला कर पढ़ने से अन्वय होता है। इसे 'युग्म' कहते हैं। 'युग्म' की व्याख्या देखिये—२–२।

३५. इन्द्र के समान, सम्पूर्ण शक्तियों के धारण करने वाले, जनों के स्वामी (महाराज दशरथ) सुमंत्र सारथी के साथ अपने दोनों पुत्रों को लेकर जनक के नगर में गये।

क्षत्रस्य नक्षत्रमदोषदुष्टं वैवाहिकं वाहितशत्रुवीरः ।
पुरोहितेनाभिहितं निशम्य सपादयामास विधि विधिज्ञ ॥३६॥

स्नातद्विजारूढमदद्विपेन्द्रस्कन्धस्थकार्तस्वरकुम्भपङ्क्त्या ।
नृपस्य धिष्ण्यं प्रकृते समन्तादच्छेदवत्पावनतीर्थतोये ॥३७॥

रथ्योभयान्ताहितशातकुम्भकुम्भस्थपङ्केरुहगन्धविद्धे ।
तिरोदधाने गगन सुगन्धौ कर्पूरकृष्णागरुसारधूपे ॥३८॥

चरत्सुवन्द्याननिसृतेषु नरेन्द्रसूनोर्जयघोषणेषु ।
प्रध्मातशङ्खध्वनिवृंहितेषु ध्वनत्सु तूर्येषु च मङ्गलाय ॥३९॥

लाजा जल दर्भमिति प्रसक्तमाविष्कृताम्रेडितशीघ्रनादे ।
आहूय सम्पादयतोऽपि भृत्यान् प्रत्युद्व्रजत्याकुलभृत्यवर्ग ॥४०॥

३६ क्षत्रियों के लिये निर्दोष, वैवाहिक मुहूर्त, पुरोहिता से पूछ कर, शत्रुओ के वीरो को दमन करने वाले (महाराज दशरथ) ने, जो वैवाहिक पद्धति के पूर्ण ज्ञाता थे, विधिवत कृत्यो का सम्पादन किया ।

३७ जब हाथी पर सवार और स्नान से पवित्र ब्राह्मणो ने, राजमहल का कोना, मत्त हाथियो के कधा पर पक्ति के पक्ति रखे सोने के कलशो मे भरे हुए तीर्थों के पवित्र जल से, बिना किसी स्थान को छोडे, अच्छी तरह अभिषिक्त कर दिया ।

विशेष—३७ वें श्लोक से ४५वें श्लोक तक 'कुलक' हैं ।

कुलक—'द्वाभ्या युग्ममिति प्रोक्त, त्रिभि श्लोकै विशेषकम् ।
फलापक चतुर्भि स्यात् तदूर्ध्वं कुलक स्मृतम् ॥

इन नौ श्लोको मे विवाह की भीड-भाड एव व्यवस्था का वर्णन है ।

३८ जहा सडको के दोना छोर,पर स्थापित, सुवर्ण कलशा पर रखे हुए कमलो की सुगध से मिल कर, कपूर और कालागुरु धूप के सुगधित धूंएँ से, गगन आच्छादित हो गया था ।

३९ जहाँ श्रेष्ठ चारणो के मुख से निकली हुई राजपुत्र (राम) की जय घोषणा गूँज रही थी और उनके मङ्गल के हेतु बजाये हुए शखा के नाद से तुरही की ध्वनि प्रचण्ड हो गई थी ।

४० जहाँ कार्य सम्पादन करने पर भी भृत्यो को बुलाकर 'लाजा, जल दर्भा लाओ' ऐसी आज्ञा देते हुए और आकुल भृत्यवर्ग भी उन्ही आज्ञाओ को जल्दी जल्दी तीव्र स्वर मे दोहराते हुए हडबडी मे इधर उधर दौड रहे थे ।

ज्ञातुं मुहुर्यामघटी-जलस्य वृत्तिं प्रयुक्ते नृपदासवृन्दे ।
धावत्युरोघात निपातिताध्वमार्गस्थ लोकेऽपि गतागताभ्याम् ॥४१॥

आसन्नभूतो महितो मुहूर्तः किं स्थीयते तावदिति प्रगल्भम् ।
वृद्धेषु वंशद्वितयस्य धीरं स्नानाय सद्यस्त्वरयत्सु रामम् ॥४२॥

उच्चैर्भृतान्यस्वरमुच्चरत्सु समं समाविष्कृतमङ्गलेषु ।
आपूरिताशेषककुम्मुखेषु पटुप्रसक्तं पटहध्वनेषु ॥४३॥

वेत्रेण वेत्रग्रहणाधिकारे जने च तत्रानुपयोगवन्ति ।
दिदृक्षुवृन्दानि निरस्यमाने मुखेन हुङ्कारकृता नितान्तम् ॥४४॥

हुङ्कार मात्रप्रथितैरमर्षैस्तिर्यक्करात्रस्य विकम्पितेन ।
निवारयन्तो मुखरं जनौघं माशाब्दिका वेश्मनि तत्र चेरुः ॥४५॥

केचिद्विधातुं विधिमुद्यतेभ्यः क्रियासु दक्षाः कुशलेतरेभ्यः ।
आच्छिद्य वैवाहिककर्मयोग्य वस्तूनि भृत्या विदधुर्विधानम् ॥४६॥

४१. जहाँ नृप के दासों का समूह, जल घड़ी से समय जानने के लिए बार-बार भेजे जाने पर दौड़ कर आ-जा रहा था, जिसके कारण उनके वक्ष से भिड़ने से मार्ग में खड़े दर्शक लोग गिर पड़ते थे ।

४२. "मङ्गल मुहूर्त निकट आरहा है, फिर क्यों देर कर रहे हो ?" ऐसा कह कर दोनों कुलों के गुरुजन, तुरन्त स्नान करने के लिये जल्दी मचा रहे थे ।

४३. जहाँ बड़े बड़े नगाड़ों की ध्वनि जिससे सम्पूर्ण दिशायें व्याप्त हो रही थीं और मंगल मंत्रों की ध्वनि स्पष्टतया सुनाई पड़ती थी, चारों ओर होते हुए तुमुलनाद को अतिक्रान्त कर रही थी ।

४४. और जहाँ अधिकारयुक्त, दण्डधारीवर्ग बिना दण्ड का प्रयोग किये केवल अपने मुख के हुंकार से दर्शकों की भीड़ को भगा रहे थे ।

४५. महल के भीतर वे अधिकारी जिनका काम शोर-गुल रोकने का था, केवल हुंकार मात्र से अपना क्रोध जताते हुए और अँगुलियों से, शोर मचाती हुई जनता की भीड़ को रोकते हुए घूम रहे थे ।

४६. कुछ कार्य-कुशल भृत्य, उन भृत्यों से जो काम करने में तो उद्यत थे पर मूर्ख थे, वैवाहिक कर्मों के योग्य सामग्री को लेकर स्वयं कार्य सम्पादन करने लगे ।

शच्या विवाहस्य विधानमाद्यं नामान्तरेण प्रथितं विधिज्ञः।
पर्यस्य चित्तानि तथा सुताया नृपस्य तत्रैव जनस्ततान ॥४७॥

स्नानस्य रत्नाभरणेन दीप्तमाकल्पमन्ते विधिवद्विधाय।
ययौ वधूर्वेदविदा कृतार्घं वेद्या उपान्तं विधुरा स्मरेण ॥४८॥

अथवोपनिन्ये नयकोविदेन महेन्द्रसख्यास्तनुजेन तन्वी।
लज्जाविधेया विधवेतराभिर्विभूषिताऽसौ विभुनन्दनाय ॥४९॥

समाददे सम्मदभिन्नधैर्यं पाणिं फणीन्द्राङ्गगुरुप्रकोष्ठ.।
तस्या. कुमार. सुकुमारसन्धिं वामेतरं वामविलोचनाया. ॥५०॥

प्राज्यं तत' प्राज्ञतरेण हव्यमावर्जितं वर्जितदुष्कृतेन।
विधातृधाम्ना विधिवत्कृशानौ सदिन्धने शीलधनेन तेन ॥५१॥

वेद्यामनसीदनवद्यवृत्तिस्तन्वी ततो वेदविदा प्रयुक्ता।
प्रदक्षणीकृत्य विवाहसाक्षीकृतं कृशानु सह राघवेण ॥५२॥

४७ कर्मकाण्डी लोगो ने विवाह के आरम्भ मे जो विख्यात शची का विधान है, उसमे नाम बदल कर, और अपना चित्त भी तदनुसार उसके अनुकूल कर, उसके स्थान पर नृप की सुता (सीता) के नाम से कृत्य का विस्तार किया।

४८. पवित्र स्नान के अनन्तर, मूल्यवान् और भड़कीले वस्त्र, जिनमे रत्नों के आभरण चमचमा रहे थे, पहिन कर काम विह्वला बहू (सीता), वेदी की छोर पर गई, जहाँ वेद के जानने वाले पुरोहितो ने पहिले ही से अर्घ्य दान कर रखा था।

४९ तब इन्द्र की सखी (अहल्या) के पुत्र व्यवहारकुशल, शतानन्द, सौभाग्यवती स्त्रियो के द्वारा सजाई हुई, लज्जा से युक्त उस कोमलाङ्गी (सीता) को वीर पुत्र (राम) के पास ले गये।

५०. कुमार (राम) ने, जिनका धैर्य, हर्षातिरेक से छूट गया था और जिनका प्रकोष्ठ, सर्पराज की तरह तगडा था उस सुन्दर नेत्रो और सुकुमार सन्धि वाली, सीता का दाहिना हाथ पकडा।

विशेष—प्रकोष्ठ=कलाई से लेकर टिहुनी तक हाथ का भाग=Fore arm। सन्धि=बदन के जोड।

५१. तब बुद्धिमान्, निष्पाप, प्रजापति के समान तेजवान और शालीनता जिनका धन है ऐसे राजपुत्र (राम) ने पवित्र ईंधन से युक्त अग्नि मे अनेक आहुतियाँ डाली।

५२. तब वेदो के जानने वाले पुरोहितो से प्रेरित होकर, उस निष्कलुष आचरणवाली, कोमलाङ्गी (सीता) ने रघु के वंशज (राम) के साथ, विवाह की साक्षी, वेदी पर प्रज्वलित अग्नि, की प्रदक्षिणा कर उसे प्रणाम किया।

गण्डस्य बिम्बं दुहितुर्धरित्र्याघर्माम्भसां बिन्दुरलञ्चकार ।
चेतःस्थकन्दर्पकृशानुना वा तस्योष्मणा वा परमार्थवह्नेः ॥५३॥

चकार चक्राङ्कतलेन पाणौ करेण भर्त्राभिनिपीड्यमाने ।
शीत्कारमाकुञ्चितदीर्घदृष्टिः स्पर्शेन वह्नेः किल नाम सीता ॥५४॥

व्यापारिताबाङ्मयपारगेण द्विजेन तेन द्विजराजवक्त्रा ।
बाला कृशानौ कृशगात्रयष्टिर्भावानभिज्ञाथजुहाव लाजान् ॥५५॥

पत्युः करस्पर्शकृते कृशाङ्ग्या हर्षैः सखीभिः प्रतिभाव्यमाने ।
आचारधूमागमलब्धजन्मान्यश्रूणि तत्संवृतये बभूवुः ॥५६॥

कृत्वानमस्यामनुपूर्वमुक्तो भर्त्तुर्भुवो विप्रवरेण रामः ।
समेतजानिर्जनकस्य राज्ञो बन्दिस्तुतस्यांघ्रियुगं ववन्दे ॥५७॥

पश्यन्सुतं पाशभृतो दधानं गङ्गाकरासक्तकरस्य कान्तिम् ।
तस्थौ नृपः स्तब्धविशालदृष्टिरश्रुस्रवाक्षालितपक्ष्मरेखः ॥५८॥

५३. धरती की पुत्री (सीता) के मुखबिम्ब को पसीने की बूंदों ने शोभायमान कर दिया। सम्भव है यह पसीना उसके हृदय में स्थित कामाग्नि के कारण हो अथवा (वेदी पर प्रज्ज्वलित) पवित्र अग्नि की गर्मी के कारण हो।

५४. जब उसके पति (राम) ने विष्णु के चक्र से अङ्कित अपने हाथ से, उसके हाथ को धीरे से पकड़ा तो जैसे अग्नि के स्पर्श से सीता ने अपनी बड़ी-बड़ी आंखों को सिकोड़ कर सीत्कार किया।

५५. सब विद्याओं में पारङ्गत, ब्राह्मण (शतानन्द) से आदेश पाकर, उस चन्द्रवदना, सुकुमाराङ्गी, कामोद्वेग से अनभिज्ञ बाला (सीता) ने अग्नि में लाजा बिखेरी।

५६. जब पति के हाथ के छू जाने से उत्पन्न, उस कोमलाङ्गी के हर्ष को सखियों ने जान लिया तो यज्ञ के धुंएं से जनित आंसुओं ने उस हर्ष को छिपा लिया।

५७. विप्रवर (शतानन्द) के कहने पर, अपनी पत्नी के साथ राम ने, पृथ्वी के स्वामी (दशरथ) को प्रणाम कर फिर क्रमानुसार, चारणों से वन्दित जनक के चरणों की वन्दना की।

५८. गङ्गा का हाथ पकड़े हुए शिव के समान, कान्तिमान् अपने पुत्र को देख कर राजा दशरथ अपने विशाल नेत्रों से एक टक देखते रह गये और उनकी आंखों से बहते हुए आंसुओं से उनकी पलकें भीग गईं।

रत्नासनस्थामथ पौरमुख्या वाष्पप्रकाशप्रणया प्रणेमु ।
भर्त्तु. सुतामेत्य वरश्चतस्या. कक्षान्तरे दत्तसितातपत्रम् ॥५६॥

नीत्वा विवाहोत्सवसम्भृतेन सुखेन राम. कतिचिद्दिनानि ।
तत. कदाचित्समयाववोधदक्षेन विद्धो हृदि मन्मथेन ॥६०॥

गौरीमिवाचारगुणेन गुर्वीं करे गृहीत्वा करभोपमोरूम् ।
सतल्पभूभागमनल्पशोभ भवप्रभावो भवन विवेश ॥६१॥

भुवि विरचितमग्रे तल्पमालोक्य भीति
स्पृशति मनसि बाला साश्रुपातस्थिता ताम् ।
नृपतिभवनरत्नस्तम्भमालिङ्गय दोर्भ्यां
रघुपतिरुपगुह्य प्रापयद्भूमिशय्याम् ॥६२॥

इति सप्तम' सर्ग. ।

५६. राजमहल म रत्नजटित सिंहासन पर अपने पति के साथ श्वेत छाते के नीचे वैठी हुई राजपुत्री के पास आकर, अपने आंसुओं से प्रेम जताते हुए प्रमुख नागरिकों ने दोनो को प्रणाम किया ।

६०. विवाहोत्सवों मे कुछ दिन आनन्द से व्यतीत करने के बाद कामदेव ने अवसर देख कर, राम के हृदय मे बडी तीव्रता से आघात किया।

६१. शिव के समान तेजस्वी राम,पार्वती के समान अपने सदाचरणों मे गम्भीर, हाथी के बच्चे के समान जांघ वाली सीता का हाथ पकड कर राजमहल मे गये जो अच्छी तरह सजा हुआ था और जहाँ स्थान-स्थान पर पर्यंक बिछे हुए थे।

६२. सामने जमीन पर एक सजा-सजाया पर्यङ्क देख कर रघुपति राम, मन म डरी हुई और राजप्रासाद के रत्नजटित स्तम्भ से सटी एव आखो से अश्रुधारा बहाती हुई खडी उस वाला (सीता) को पर्यङ्क के पास लाये ।

सातवाँ सर्ग समाप्त ।

अष्टमः सर्गः

आचरन्नथ स योषितो हठं सा च वामचरिताऽनुरागिणः ।
अप्यनीप्सितविधानचेष्टितौ तेनतुः सपदि संमदं मिथः ॥१॥

कामिना समुपगुह्य बालिका सप्रयत्नमुतवेशिताऽप्यसौ ।
वाञ्छति स्म समुदेतुमङ्कतः साध्वसेन चपला मुहुर्मुहुः ॥२॥

राघवेण परिरभ्य पृष्ठतः सस्पृहं निगदिते मनोरथे ।
व्रीड़यावनतवक्त्रपङ्कजा धीरमस्मयत चारुहासिनी ॥३॥

अङ्गुलीषु परिगृह्य राघवे वेधवत्युरसि रागिभिर्नखैः ।
सस्मितं विबलिताङ्गुलिर्बलादात्मनः करमुदास मानिनी ॥४॥

किन्नु वक्ति कुपितेति वेदितुं कामिना निधुवने सविग्रहम् ।
याचितैनमभिकोपजिह्मितप्रेरितेक्षणकटु व्यलोकयत् ॥५॥

१. तब वह (राम) अपनी पत्नी से जबरदस्ती करने लगे और वह (सीता) भी अपने ऊपर आसक्त पति की इच्छा के विरुद्ध करने लगी । इस प्रकार दोनों ही के एक दूसरे की इच्छा के प्रतिकूल आचरण से, तुरन्त दोनों में आनन्द का विस्तार होने लगा ।

२. कामासक्त (राम) ने उस बाला का आलिङ्गन कर बड़ी तरकीब से उसे अपनी गोद में बिठा लिया, तब वह डर से काँपती हुई, बार-बार गोद से उठने का प्रयत्न करती थी ।

३. जब राघव, पीछे से उसका आलिङ्गन कर, बड़े अनुनय से अपना मनोरथ कहने लगे तब वह सुहासिनी अपने कमल सदृश मुख को लज्जा से नीचा कर मुसकराने लगी ।

४. जब राम उसकी अँगुलियों को पकड़ कर, अपनी प्यार भरी अंगुलियों से उसके उरोजों को सहलाने लगे, तो उस मानिनी ने मुसकरा कर बलपूर्वक उनकी अँगुलियों को मरोड़ कर अपनी अंगुलियों को छुड़ा लिया ।

५. 'क्रुद्ध होकर वह क्या कहेगी' यह जानने के लिये राम ने जब सशरीर रति का आग्रह किया तो उसने गुस्से से आँखों को तिरछी कर उन्हें (राम को) कटुता से देखा ।

पुष्पकेतुहृतधैर्यबन्धनं तस्य भावमवगम्य निर्गमे ।
साऽवकाशमथ कुर्वती. सखी. सरुरोध वसनान्तसङ्गिनी ॥६॥

इच्छति स्म विरहं न कामिनी सङ्गमं न भृशमाकुली कृता ।
विप्रयोगसमये मनोभुवा लज्जया नृपसुतस्य सन्निधौ ॥७॥

तस्य हस्तमबला व्यपोहितु मेखलागुणसमीपसङ्गिनम् ।
मन्दशक्तिररतिं न्यवेदयल्लोलनेत्रगलितेन वारिणा ॥८॥

तत्र राजदुहितुर्बलात्क्रियामाचरत्युदितलोचनाम्भस ।
आगमिष्यदनुचिन्त्य खण्डनं भीतवद्भृशमकम्पताधरम् ॥९॥

न स्पृशामि रशनागुणं पुनर्निर्दयं भुजयुगेन पीडितं ।
इत्युवाच नृपसूनुरर्थिनी सा ततान परिरम्भमस्फुटम् ॥१०॥

अन्तरीयहरणे कृतत्वरं राघवन्तमपयान्तमङ्गना ।
तत्पटान्तपरिधानरक्षिता सरुरोध परिरभ्य पृष्ठत ॥११॥

६ जब उसने (सीता ने) उनके मनके भाव को जान लिया और यह देख लिया कि कामदेव ने उनके धैर्य के बाँध को तोड़ दिया है (अर्थात् वह अब किसी तरह न मानेंगे) तो उसने (सीता ने) अवसर देने लिये वहाँ से खिसकती हुई सखियो को उनके वस्त्रों के छोर को खीच कर रोका।

७ राजपुत्र से अलग रहने पर वह कामदेव से बहुत पीडित हो जाती थी और उनके सामने वह लज्जा से बहुत घबरा उठती थी। इस प्रकार वह काम की इच्छा रखने वाली न तो उनसे वियोग ही की और न सयोग ही की इच्छा करती थी।

८ करधनी की डोरी के पास मडराते हुए उनके (राम के) हाथ को हटाने मे अशक्त उस अबला ने अपने विलोल नेत्रो से निकलते हुए अश्रु से अपनी अनिच्छा प्रकट की।
मेखला प्रणय लोलतागत, हस्तमस्य शिथिल रुरोधसा'
—कुमारसम्भव ८ १४ कालिदास।

९ जब उस राजपुत्री के साथ वे (राम) इस प्रकार जबरदस्ती कर रहे थे तो अधरो के काटे जाने की सन्निकट चिन्ता से उसके आँखो मे आँसू आ गये और वह डरी हुई सी थर-थर काँपने लगी।

१० 'यदि तुम हमे अपने दोनो हाथो से कसकर आलिङ्गन करोगी तो हम फिर करधनी की डोरी को न छुएँगे जब राजपुत्र ने ऐसा कहा तो उसने अर्थिनी की भाँति हलके से उन्हें आलिङ्गन किया।

११ जब फुरती से उसके अधोवस्त्र को उतार कर राघव चले तो गोल मोल अङ्ग वाली सीता ने अपनी ओढनी की छोर से अपने को ढँक लिया और राम को पीछे से लिपट कर उन्हे आगे बढने से रोक दिया।

अंशुकस्य निशि रक्षणाकुला हस्तयुग्मधृतनीविवन्धना ।
अप्रमादकृतिविघ्नमन्तरा स्वापमाप शयने पराङ्मुखी ॥१२॥

यद्ररक्ष दृढवस्त्रबन्धनैः स्वापकालमवगम्य भर्त्तरि ।
तत्प्रमृष्टवति संगतस्मृतिः सा रुरोद मुषितेव सस्वरम् ॥१३॥

यत्नगम्यमथ मैथिलीमुखं सोऽनुभूय नहि तृप्तिमाययौ ।
आननेन परिघट्य वोधितं राजहंस इव पद्मकुड्मलम् ॥१४॥

प्रेमवेगदृढदंशपीडितं यत्तदीयमधरोष्ठपल्लवम् ।
तद्दयार्द्रहृदयः शनैःपिबन् स क्षणेन विनिनाय वेदनाम् ॥१५॥

आहितं नृपतिशक्रसूनुना स्वाधरं विविधचाटुचेष्टितैः ।
पानवर्जितमदन्तवीक्षितं भूय एव सृजति स्म मानिनी ॥१६॥

स्वं नितम्बमपवाहितांशुकं कामिनी रहसि पश्यति प्रिये ।
प्रार्थनामपि विनैव पल्लवस्निग्धरागमधुरं स्वयं ददौ ॥१७॥

१२. रात्रि के समय, अपने वस्त्र की रक्षा के लिये आकुल, दोनों हाथों से कटिबन्ध को पकड़ कर, राम के चतुर चालों में बिना कोई विघ्न डाले, वह शय्या पर अपना मुंह पीछे कर सोई।

१३. जब राम ने जाना कि अब वह सो गई तो, जिस चीज की सीता ने अपने वस्त्र के दृढ़ बन्धनों से रक्षा की थी उसे उसके पति ने मसला। तब वह सजग हो, चिल्ला कर रोने लगी, जैसे उसे किसी ने लूट लिया हो।

१४. तब मिथिलाधिपति की पुत्री (सीता) के, यत्न से प्राप्त, मुख का रसास्वादन कर उन्हें तृप्ति नहीं हुई। जैसे राजहंस को अपनी चोंच से खोदने के कारण उत्फुल्ल कमल से तृप्ति नहीं होती।

१५. कामोद्वेग से जोर से काटने के कारण पीड़ित, उसके नव पल्लव के सदृश ओठों की वेदना को, दयार्द्र हृदय, राम ने धीरे-धीरे चूम कर, हर लिया।

१६. राजाओं में इन्द्र के समान (राम ने) मीठी-मीठी बातों एवं चेष्टाओं से अपने निचले ओंठ को उसके (सीता के) मुंह में पकड़ा दिया। पर उस मानिनी ने बिना उसका आस्वादन किये और बिना अपने दांत से काटे, तुरन्त छोड़ दिया।

१७. जब चोरी से, प्रिय राम, उसके नितम्बों को, जिस पर से, उन्होंने वस्त्र हटा दिया था, देख रहे थे, तब उस कामिनी ने बिना मांगे, स्वयं, नवपल्लव के सदृश चिकने और गुलाबी अधर को उन्हें दे दिया। (जिससे वह नितम्ब को न देख सकें, यह भाव है।)

सा मदेन मदनेन लज्जया साध्वसेन च विमिश्रचेष्टिता ।
आययौ सपदि तादृशी दशा या न वक्तुमपि शक्यविभ्रमा ॥१८॥

वर्जनाय सुरतस्य भामिनी वाञ्छति स्म पटुचाटुचेष्टितम् ।
यत्तदेव समजायत स्वयं योषितो निधुवनस्य वृद्धये ॥१९॥

अश्रुणा सुरतखेदमात्मन. सम्मदञ्च पुलकेन कामिनी ।
व्याजहार ननु लज्जया गिरा नव्यनृत्यकुशलेव भर्त्तरि ॥२०॥

यद्यदास तरसाऽभियोजित योषितो रतिषु खेदवृत्तये ।
तत्तदेव मृदुसाधित पुन. कामिनाऽपनयति स्म तच्छ्रमम् ॥२१॥

केशपाशमथ बन्धुमुद्यता मैथिली निधुवनेन विश्लथम् ।
बाहुमूलगतलोचने प्रिये लज्जयाऽवनति स्म सस्मितम् ॥२२॥

इत्यनङ्गशिखिना हृते हृदि क्ष्माधिपस्य दुहितुर्निविष्टया ।
लज्जया कतिपयेषु तानवं वासरेषु गलितेषु शिश्रिये ॥२३॥

१८. गर्व, कामासक्ति, लज्जा एव भय इन भावो के सम्मिश्रण से उसकी (सीता की) चेष्टाएँ, तुरन्त ऐसी अवस्था पर पहुँच गई और उनका व्यवहार उसके लिये इतना स्वाभाविक हो गया कि उसका वर्णन नही किया जा सकता ।

१९. चतुर एव मीठी बातचीत और चेष्टाओ की इच्छा जो वह (सीता) सभोग से बचने के लिये करती थी (अर्थात मीठी मीठी बातो मे लगाये रहती थी) उनका परिणाम उसके कामोद्दीपन करने मे हुआ ।

२०. उस कामविह्वला स्त्री ने, रति मे उत्पन्न थकान को आँसूओ से और मदनोन्माद को रोमाञ्च से अपने पति पर प्रकट किया । भावो के प्रदर्शन मे चतुर की भाँति उसने लज्जा से शब्दो के द्वारा कुछ नही कहा ।

२१. सभोग मे जब जब वे (राम) जल्दी के मारे जबरदस्ती करते थे तब तब उसे (सीता को) खेद होता था । परन्तु वही बात जब वे काम प्रेरित होकर मुलायमियत से करते थे तब उसका श्रम दूर हो जाता था ।

२२. रति के कारण जब उसके बाल का जूडा ढीला हो गया तो वह उसे बाँधने लगी । तब राम की ओर देखने के कारण, लज्जा से सिर झुका कर वह मुसकराने लगी ।

२३. जब इस प्रकार उसके हृदय पर कामदेव का आघात हुआ तो पृथ्वी की पुत्री (सीता) के हृदय से, कुछ ही दिनो के बाद, लज्जा धीरे-धीरे जाने लगी ।

शर्वरीषु विरलीकृतत्रपा निद्रया किल हृता नृपात्मजा ।
नीविबन्धमतीत्य संस्थितं हस्तमस्य न बलादपाहरत् ॥२४॥

निद्रिता प्रतिभयं भयानकस्वप्नदर्शनकृतं प्रपद्य सा ।
राघवं कुचघटावुरःस्थले सन्निधाय परिपस्वजे दृढम् ॥२५॥

ज्ञातमन्मथरसा मदातुरे कामिनीक्षिपति नीविबन्धनम् ।
सा जहार करयुग्ममंशुकादञ्जलिं किल भयेन कुर्वती ॥२६॥

सम्मताऽपि भुवनस्य मेधया राघवे निधुवनोपदेशिनि ।
व्याजहार गुणितस्य विस्मृतिं भूरिशस्तदुपदेशवांछया ॥२७॥

स्वेदबिन्दुनिचिताग्रनासिका धूतहस्तलतिका सशीत्कृतिः ।
सोढमन्मथरसा नृपात्मजा राघवस्य न बभूव तृप्तये ॥२८॥

चोदयत्यवनिपालनन्दने शिक्षितुं युवतिकृत्यनैपुणम् ।
देहजन्मशरखण्डितत्रपा सा ययौ रहसि कर्मकर्तृताम् ॥२९॥

२४. रात्रि में लज्जा कम हो जाने के कारण वह राजपुत्री निद्रा से अभिभूत हो गई और नीवीबन्ध के नीचे पड़े हुए उनके (राम के) हाथ को उसने बलपूर्वक नहीं हटाया।

२५. निद्रावस्था में भयानक स्वप्न देखने के कारण भयभीत होकर उसने अपने कुम्भ के समान स्तनों को राम के वक्ष से सटा कर उनको जोर से लिपटा लिया ।

२६. जब काम से विह्वल, राम उसके कटिबंध को खोलने लगे तो सीता ने, जो कामदेव के आनन्द को जान चुकी थी, डर के बहाने से अपने दोनों हाथों की अंजुली बना कर अपने वस्त्र को छोड़ दिया ।

२७. रति के उपायों के विविध उपदेश, जब राम उसे दे रहे थे तो यद्यपि वह तीव्र बुद्धि के लिये भुवन में विख्यात थी, पर उन्हें बार-बार सुनने की चाव से कह देती थी कि वह बताई हुई बातों को भूल गयी ।

२८. यद्यपि रति के आनन्द को वहन करने से उस राजपुत्री की नासिका के अग्रभाग पर पसीने की बूंदें आ गई, सुकोमल हाथ कम्पायमान हो गये और वह सीत्कार करने लगी, पर राघव का जी नहीं भरा ।

२९. जब राम उसे (ऐसे समय में) युवतियों को क्या करना चाहिये, इसकी शिक्षा दे रहे थे तो वह (सीता), जिसकी लज्जा कामदेव के बाणों से चूर-चूर हो गई थी, एकान्त में स्वयं शिक्षिका बन गई ।

यत्प्रगाद मदनेन पीडिता तत्सहासरसमूचिपि प्रिये।
सस्मितं बलितदेहशोभिनी तत्तदस्फुटमुवाच लज्जिता ॥३०॥

रत्नतल्पनिकटस्थिते शुके सङ्गतौ हृदि निधाय भाषितम्।
नि सहास्मि विसृजेति जल्पति व्रीडिता परिजघान पञ्जरम् ॥३१॥

रामवक्त्रगलितै: श्रमाम्बुभिश्छिद्रितं कुचयुगस्य कुङ्कुमम्।
सा निरीक्ष्य हसिते सखीजने सम्मुखाद्व्यपजगाम सस्मितम् ॥३२॥

स्वानुवृत्तिविधिवन्ध्यमीर्ष्यया चोदितोद्यत इवाथ लज्जितम्।
मैथिलस्य दुहितुर्मनोभवश्चेतसो निरवशेषमाक्षिपत् ॥३३॥

दीर्घिकाजललतरङ्गनिर्धुतत्यक्तपुष्पमयमण्डनौ कचित्।
चाटुरम्यमितरेतराश्रयास्तेनतु. प्रमदकानने मृजा. ॥३४॥

चाटुमात्रकरणप्रयोजनस्तुल्यरागमपि स न्यपातयत्।
योषितश्चरणपङ्कजद्वये यावक तरुणपल्लवप्रभे ॥३५॥

३० जब हँसी हँसी मे उसके पति ने उन बातो को कह दिया जिन्हे उसने (सीता ने) काम की विह्वलता मे कहा था तो उसने अपने सुन्दर शरीर को मोड कर मुसकराते हुए लज्जा से फिर उन्हें धीरे धीरे दोहरा दिया।

३१ रति के समय जो उसने कहा उसे हृदयस्थ कर जब रत्नजटित शय्या के निकट बैठे शुक ने कहा, "मै अशक्त हूँ, मुझे छोड दीजिये' तो लज्जित होकर उसने पिंजडे पर हाथ मारा।

३२. श्रम के कारण राम के चेहरे से निकले हुए पसीने से, सीता के स्तनो पर लगे हुए कुकुम लेप को पुछा हुआ देख कर जब सखियां हँसी तो वह मुसकराती हुई उनके सामने से हट गई।

३३. जैसे ईर्ष्या से प्रेरित होकर कामदेव ने मिथिलाधिपति की कन्या के चित्त से लज्जा को, जिसके कारण उसके अनुरूप आचरण मे बाधा पडती थी, जड से उखाड कर फक दिया।

३४ कभी-कभी प्रमद वन मे सरोवर के जल की लहरियो से गिराये हुए पुष्पो के गहनों को छोड, वे दोनो, एक दूसरे का सहारा लेकर मीठी एव मनोहर बातें करते हुए स्नान करते थे।

३५ केवल प्रसन्न करने के प्रयोजन से वे पत्नी के चरण कमल मे महावर लगाते थे क्योंकि वे तो स्वभाव ही से उसी ढग के नवपल्लव की तरह लाल थे।

अङ्घ्रियुग्ममनुलिम्पतः स्वयं कुंकुमेन तरुणार्करोचिषा ।
आरुरोह करयुग्ममस्य तत् दूरमेव परिवृद्धवेपथु ॥३६॥

मेखलामधिनितम्वमर्पयंस्तत्र तत्र पुनरादधौ करम् ।
अत्र किञ्चिदनुपाश्रितः परं दुर्नहो नु मणिमेखलागुणः ॥३७॥

आचरन्नथ विलेपनक्रियां पाणिना पुलकितेन सस्पृहम् ।
सोऽस्पृशत्कुचयुगं पुनः पुनश्चन्दने सममपि स्थिते सति ॥३८॥

पत्रमानमिततर्जनीशिरःस्पृष्टकर्णलतिकोऽयमर्पयन् ।
पूर्वमर्धमुकुलीकृतेक्षणं तन्मुखं सुरभिगर्भमन्वभूत् ॥३९॥

आत्मनैव स तदा पुरा कृतं यावकं युवतिदन्तवाससि ।
उज्जहार मुदितः पुनः पुनर्निष्पिवन्नधरपानलोलुपः ॥४०॥

चुम्बति प्रियतमे विलोचनं योषितः स्वयमुपाहिताञ्जन् ।
प्राप रागमविकाशचक्षुषा कर्णगं निजमशोकपल्लवम् ॥४१॥

३६. जब वे स्वयं, तरुण सूर्य के समान चमचमाता कुंकुम का लेप उसके दोनों पैर के अंगूठों में लगाते थे तो (कामोद्वेग के कारण) कांपते हुए उनके दोनों हाथ बहक कर दूर तक ऊपर चढ़ जाते थे।

३७. कोई सहारा न होने के कारण, मणि-मेखला का कहीं पर अटकना कठिन है, यह विचार कर वे (राम) उस मेखला को नितम्बों के ऊपर अटकाने के लिये वार-बार अमत हाथ वहाँ पर फेरते थे।

३८. अपने पुलकित हाथों से चन्दन के लेप से चित्रित करते हुए वे बार-बार बड़े चाव से उसके स्तनों को छूते थे, यद्यपि उन पर चन्दन ठीक तरह से लगा था।

३९. उसके सुगंधित मुख, जिसमें आंखें अधमुंदी थीं, चित्रित करते समय अपनी तनिक झुकी हुई तर्जनी के अग्रभाग से उसके लता के समान कोमल कान को छूते हुए वे उस मुख का अनुभव करते थे।

४०. तब उसके अधर पान के लिये उत्सुक राम ने उस युवती के अधरों का वार-वार चुम्बन किया और उसके अधर पर अपने ही हाथ से पहिले लगाये हुए लाक्षारस को मिटा दिया।

४१. जब उसके पति (राम) ने उसकी आंखों का, जिसमें उन्होंने स्वयं अन्जन लगाया था, चुम्बन किया तब सीता, के जिसकी आंखें मुंदी थीं, कान में पहिनाया हुआ अशोक-किसलय अपने स्वाभाविक रंग से चमक उठा।

पुष्परत्नविभवैर्यथेप्सितं सा विभूषयति राजनन्दने ।
दर्पणं ननु चकाङ्क्ष 'योषिता स्वामिसम्मदफलं हि मण्डनम्' ॥४२॥

तामनङ्गकृतचारुविभ्रमा निर्दयं समुपगुह्य चुम्बितुम् ।
वीक्षितुञ्च समकालमप्रभुर्व्याकुलो मुहुरिवास राघव. ॥४३॥

प्रार्थिताऽपि न चकार कानिचित् कानिचित् स्वयमपि व्यधत्त सा ।
अन्वभूद्धृदयरत्नविक्रयक्रीतमेनमबला यथेप्सितम् ॥४४॥

येन येन हरति स्म तामसौ तत्तदेव पुनराप योषित. ।
सज्जनेषु विहितं हि यच्छुभं सद्य एव फलबन्धि जायते ॥४५॥

कर्मणि स्वमुखपद्मविच्युतस्वेदबिन्दुहृतकान्तवक्षसि ।
तस्य चक्षुरुपकाञ्चिसञ्चरद्वीक्ष्य वक्षसि मुमोच सा तनुम् ॥४६॥

भर्तरि प्रणयमौनमास्थिता जल्पयत्यधरदशनिग्रहै. ।
नो चकार वचनानि तादृश निग्रहं चिरमवाप्तुमिच्छया ॥४७॥

४२. जब राजपुत्र उसे मनमाना, सुन्दर पुष्पो एव रत्नों से सजा रहे थे तब उसने दर्पण देखने की इच्छा नही की । क्योकि स्त्रियो के शृङ्गार का फल स्वामी की प्रसन्नता ही मे होता है ।

विशेष—प्रियेषु सौभाग्य फलाहि चारुता ।
—कुमारसम्भव ५-१- कालिदास ।

४३ जब कामदेव से प्रेरित होकर सीता लुभावने हाव भाव करती थी और राम उसे इतना कस कर लिपटा लेते थे कि वह उन्ही मे छिप जाती थी तो वह बार-बार जैसे व्याकुल हो जाते थे क्योकि उसको देखना और चुम्बन भी करना, दोनो साथ-साथ एक समय में वे नही कर पाते थे ।

४४. प्रार्थना करने पर भी वह कुछ बातें नही करती थी और कुछ बातो को वह स्वय (बिना प्रार्थना किये) करती थी । अपने हृदय रत्न से उन्हें मोल लेकर, जैसी उसकी इच्छा होती थी उसी प्रकार वह अबला उनका आनन्द उठाती थी ।

४५. उन्होने उस पत्नी से वही वही चीजें पायीं जिनसे वे उसे आकृष्ट करते थे । क्योकि सज्जन के प्रति किया गया शुभ काम तुरन्त फलदायी होता है ।

४६ जब उसने देखा कि उनकी (राम की) आँखें उसकी मेखला पर मँडरा रही हैं तो उसने अपने मुख कमल से गिरे हुए पसीने की बूँदो से अपने पति के वक्ष को भिगोते हुए अपने शरीर को उनके वक्ष पर गिरा दिया।

४७ जब उसके बुलाने के लिये उसके पति उसका ओठ काटते थे तो वह प्रेम के वशीभूत होकर, इस इच्छा से मौन साध लेती थी कि वे देर तक उसके ओठ को काटें ।

बालया हृदि निधाय स स्तनौ दन्तमास्यकमलं प्रसादने ।
प्राप्तुमिच्छुरपि दोषतो विना रोपमाविरकरोन्मुहुर्मुहुः ॥४८॥

अल्पदोषविषयेऽपि जम्पती जग्मतुः प्रणयकोपवक्रताम् ।
स्नेहजातिरतिवृद्धिमागता जायते सुलभरोषसव्रणा ॥४९॥

अश्रुषु प्रणयकोपवह्निना लोहितत्वमुपनीय पायितः ।
तत्कटाक्षविशिखो निपातितो धैर्यमस्य निचकर्त सुस्थिरम् ॥५०॥

कोपिता चिरनिवृत्तसंगतिः सुप्तमेत्य परिबोधशङ्किनी ।
हस्तरुद्धचलकुण्डला धृतश्वासवृत्ति शनकैश्चुचुम्ब सा ॥५१॥

कैतवेन कलहेषु सुप्तया स क्षिपन्वसनमात्तसाध्वसः ।
चोर इत्युदितहासविभ्रमं सप्रगल्भमवखण्डितोऽधरे ॥५२॥

सङ्गतानि परिहृत्य चारिणौ मानमेत्य कलहं वितेनतुः ।
अन्ययातनयनौ किलोरसा तौ निहत्य कुहचित्परस्परम् ॥५३॥

४८. जब उन्हें आनन्द देने के लिये, वह बाला अपने स्तनों को उनके वक्ष पर रख देती थी तो उसके दांत और मुख पाने की इच्छा से, बिना उसके किसी अपराध के वे बार-बार गुस्सा होते थे ।

४९. वे दोनों एक दूसरे से थोड़ी-थोड़ी बात पर प्रणय क्रोध के तीखेपन का प्रदर्शन करते थे । आसक्ति जब बहुत बढ़ जाती है तब क्रोध की चोट स्वाभाविक हो जाती है ।

५०. उनकी ओर प्रेरित, प्रेमाग्नि से तप्त, उसकी तिरछी चितवन के बाण ने, अश्रु से मिल कर उनके स्वभाव-सुलभ धैर्य को छोड़ा दिया ।

५१. बहुत देर से वियोग के कारण क्रुद्ध (सीता ने) सोते हुए राम के पास जाकर, उनके जाग जाने की शंका से, अपने लटकते हुए कुंडल को हाथ से पकड़े, धीरे से श्वास रोक कर, उनका चुम्बन ले लिया ।

५२. प्रणय कलह में जब वह बहाना कर सो गई और वे (राम) डरते हुए, उसका वस्त्र उतार रहे थे, तो उसने हँसते हुए उन्हें 'चोर,' कह कर उनके (निचले) ओंठ को जोर से काट लिया ।

५३. मान से रूठ कर, दोनों ही एक दूसरे से अलग चलते थे परन्तु जब कहीं पर दोनों की आँखें मिल जाती थीं तो अवश्य ही वे, एक दूसरे को अपने वक्ष से टकरा कर जबर्दस्ती लड़ाई मोल लेते थे ।

एकदारिकदन. स कान्तया सार्धमिद्धरुचि सौधमम्बरम् ।
आरुरोह परिसंहृतातप द्रष्टुमर्धशशिमौलिसन्निभ. ॥५४॥

वासरस्य विगमे समीरणैर्मन्दनर्त्तितसुगन्धिकुन्तलाम् ।
सौधपृष्ठमधितस्थुषी वचो जानकीमिदमुवाच राघव ॥५५॥

सन्निगृह्य करसन्तति क्वचित्प्रस्थितोऽपि रविरेप रागवान् ।
अस्तमस्तकमधिश्रित. क्षण पश्यतीव भुवन समुत्सुक ॥५६॥

दिङ्मुखादपसरन्तमातप नष्टतेजसमनुव्रजन्मुहु' ।
रश्मिभि. समवबध्य भानुना कृष्यमाणमिव लक्ष्यते तम ॥५७॥

अन्तराणि तमस. प्रयच्छति स्रष्टरीव जगती युगक्षये ।
भूय एव रविमण्डले रुचिर्लीयते जलधिमध्यवर्त्तिनी ॥५८॥

ध्वान्तजालमुपयाति सर्वत सागरे निहितमण्डल रविम् ।
वारिभि पिहितदण्डमायतं भृङ्गचक्रमिव फुल्लमम्बुजम् ॥५९॥

५४. एक समय शत्रुओ के नाश करने वाले, मस्तक पर अर्धचन्द्र से शोभित शङ्कर के समान दीप्तिमान, वह (राम) अपनी प्रिया के साथ, ताप से रहित, शुभ्र आकाश को देखने के लिये, राजमहल के ऊपर चढे ।

५५. दिन के समाप्त होने पर राघव, सीता से, जो महल के छत पर बैठी थी और जिनके सुवासित केश कुन्तल वायु मे हलके हलके लहरा रहे थे, ये वचन बोले ।

५६ (देखो) अपने रश्मि समूह को सिकोड कर, अस्ताचल के शृङ्ग पर बैठा हुआ यह राग-वर्ण सूर्य, यद्यपि कही चला गया, फिर भी ऐसा लगता है जैसे क्षण भर के लिये वह बडी उत्सुकता से ससार को देख रहा है ।

५७. ऐसा लगता है कि सूर्य के पीछे आते हुए अन्धकार को, दिशाओ से धीरे-धीरे हटता हुआ, सूर्य का प्रकाश जिसमे गरमी नष्ट हो गयी है, अपनी रश्मियो मे बांध कर बराबर खीचे लिये जा रहा है ।

५८. जैसे युग के अन्त मे जब पृथ्वी समुद्र के बीच मे स्थित हो कर जल मे डूब जाती है और स्रष्टा अन्धकार के लिये स्थान कर देता है उसी प्रकार सूर्य की प्रभा समुद्र के बीच मे आकर पुन सूर्य मे निमग्न हो रही है ।

५९. समुद्र के बीच में स्थित सूर्य के बिम्ब को अन्धकार का जाल ऐसा घेरे हुए है जैसे प्रफुल्ल कमल को, जिसकी नाल पानी मे छिपी है एक बडा भृङ्गचक्र चारो ओर से घेरे हो ।

एकचक्रमिव राजते नभःस्यन्दनस्य रविबिम्बमस्तगम् ।
उत्पतत्यविकले निशाकरे धातुपङ्कपरिदिग्धमण्डलम् ॥६०॥

संहृतात्मकिरणं यथा यथा वृद्धिमुद्वहति मण्डलं क्रमात् ।
सागराम्भसि तथा तथा रविर्गौरवादिव शनैर्निमज्जति ॥६१॥

उन्मुखा दिनकरस्य रश्मयः सागरान्तरितमण्डलश्रियः ।
भान्ति तोयमभिभूय निर्गता वाडवस्य शिखिनः शिखा इव ॥६२॥

सन्ध्यया च परिरुद्धमग्रतो वासरस्य विगमे घनं तमः ।
भातिसिन्धुजलभिन्नमेकतः प्रावृषीव सलिलं पयोनिधेः ॥६३॥

सन्ध्ययाऽरुणितपत्रसञ्चयं श्लक्ष्णपल्लवनिरन्तरं वनम् ।
विन्दतीव परिणामसम्पदं पश्य तत्तमसि सर्पति क्रमात् ॥६४॥

अन्धकारनिकरेण सर्वतः कृष्णसर्पमलिनेन सर्पता ।
रुध्यमानविषयाः समन्ततः संकुचन्ति परिखा नु दिग्भुवः ॥६५॥

६०. (इस समय) जब पूर्ण चन्द्रका उदय हो रहा है तो अस्ताचल पर अस्त होता हुआ सूर्य का बिम्ब, आकाश रूपी रथ का एक ऐसा पहिया लगता है जिसका घेरा धातुओं के चूर्ण से लिप्त हो।

६१. अपने किरणों को सिकोड़ कर, जैसे जैसे सूर्य का मण्डल बड़ा होता जाता है, वैसे-वैसे सूर्य जैसे भारी हो कर समुद्र के जल में धीरे-धीरे डूबता जाता है ।

६२. सागर के भीतर जिसके मण्डल का सौंदर्य छिप गया है ऐसे सूर्य की (जल के) ऊपर छिटकती हुई किरणें ऐसी लगती हैं जैसे बाडवाग्नि की ज्वाला जल को दबा कर बाहर निकल रही हो।

६३. दिन के अन्त में, उषा के प्रकाश के आगे, पीछे हटाया हुआ अन्धकार ऐसा लगता है जैसे बरसात में, नदियों के प्रवाह से एक ओर हटाया हुआ समुद्र का जल ।

६४. वह देखो, अन्धकार के धीरे-धीरे बढ़ने से, उषा के प्रकाश से अनुरञ्जित पत्तियों का समूह और कोमल पल्लवों से लदा हुआ वन, पकेपन के सौंदर्य को धारण करता है।

६५. सब दिशाओं की खाइयों की सीमायें, काले साँप की तरह मलिन, सर्वत्र फैले हुए अन्धकार के समूह से बन्द हो कर संकुचित हो गई हैं ।

भाति मत्तशिखिकण्ठकर्बुरं ध्वान्तजालपरिरुद्धमम्बरम्।
अर्कदीपकृततापसमृतप्रौढकज्जलमलीमस यथा ॥६६॥

पश्य दीप्तरुचि पूर्वमुद्गतं ज्योतिरेतदसितोरगत्विष.।
छिद्रमेकमिव विष्णुवर्त्मनो दूरभग्नरविरश्मिभासुरम् ॥६७॥

पश्चिमे नभसि भान्ति लोहितास्तारका रविरथस्य वेगिन ।
लोहचक्रहतमेरुमस्तकादुद्गता इव हुताशविप्लुष ॥६८॥

मीलिता रविभयेन तारका रश्मिधामहतलोहिता इव।
उन्मिषन्ति दिनकृत्करात्यये दिङ्मुखैकरचना. समन्तत. ॥६९॥

पूर्ववारिनिधिपृष्ठत क्रमाद्दर्शयन् हिमरुचि. कलान्तरम्।
एकपक्षसुलभकमामसौ वृद्धिमद्य मुहुरेव विन्दति ॥७०॥

पश्य भृङ्गपटलासितप्रभ पूर्वत सपदि निर्गत तम ।
यत्करेण जघने हिमांशुना तुद्यमानमिव यातिपश्चिमम् ॥७१॥

६६ मत्त मयूर के कण्ठ की तरह रग बिरगा आकाश, अन्धकार के जाल से परिवेष्टित हो कर ऐसा लगता था जैसे सूर्य रूपी दीपक की लौ से निकले हुए घने काजल से काला पड गया हो।

६७ देखो, यह दमकता हुआ प्रकाश (अर्थात चन्द्रमा) जो पूर्व दिशा मे निकल आया है, ऐसा लगता है जैसे कृष्ण सर्प के रग के समान विष्णु पथ (आकाश) मे, सूर्य की रश्मियो के बहुत गहरे तक घुस जाने से देदीप्यमान एक छिद्र हो।

६८. पश्चिम के आकाश मे लाल-लाल तारे ऐसे लगते हैं जैसे सूर्य के रथ की लोहे की पहिया की टक्कर से मेरु के शृङ्ग से आग की चिनगारियाँ निकल रही हो।

६९ सूर्य के भय से जिन्होने अपनी आँखें बन्द कर ली थी और रवि के तेज से जो लाल हो गई थी वे तारिकायें अब सूर्य की रश्मियो के चले जाने से, दिशा के मुख को सजाने का निश्चय कर, जैसे अपनी आखें चारो ओर खोल रही हैं।

७० यह शीत रश्मि चन्द्रमा पूर्वी समुद्र के ऊपर अपनी कलाओं को क्रमश दिखाता हुआ, एक पक्ष (शुक्ल पक्ष) मे उत्तरोत्तर सुलभ पूर्णता को आज फिर प्राप्त हो गया है।

७१. देखो, भृङ्गो के समूह के समान काला, यह अन्धकार जो एका एक पूर्व से निकला है वह पश्चिम की ओर ऐसे बढ रहा है जैसे चन्द्रमा अपने वाएँ (श्लेष—कर=रश्मि=हाथ) से उसके जघन पर मार कर उसे आगे खदेड रहा हो।

क्षीरवारिनिधिना विवर्द्धता प्लाव्यमानवदसौ निशाकरः ।
उत्पपतत्युदयतः शनैः शनैर्हारशुभ्रनिजरश्मिसंचयः ॥७२॥

क्षिप्यमाणघनतामसोत्करं दूरमुत्सरति मण्डलं दिशाम् ।
शीतरश्मि किरणस्य सर्वतो दातुमन्तरमिव प्रसर्पतः ॥७३॥

क्षीयमाणवपुरिन्दुरुद्गमे वर्द्धमानकिरणः समन्ततः ।
अर्कतप्तगगनानुबन्धिना तेजसेव परितो विलीयते ॥७४॥

बद्धरागमुदितो निशाकरः संत्यजन्दिशमसौ बलिद्विषः ।
शोकदीन इव पाण्डुरोचिषा कार्श्यमेति वपुषा मुहुर्मुहुः ॥७५॥

पीतमेतदलिवृन्दमेचकं ध्वान्तमेव सकलं हिमत्विषः ।
स्वच्छविग्रहतया शशाकृतिच्छद्मना वहिरिवास्य लक्ष्यते ॥७६॥

विप्रयुक्तवनितामुखाम्बुजप्रोद्धृतद्युतिचयेन चन्द्रमाः ।
नूनमेष पुनरात्मण्डलं पूरयत्यसितपक्षकार्शितम् ॥७७॥

७२. दुग्ध के समान जिसका जल स्वच्छ है, ऐसे ऊपर उठते हुए समुद्र से जैसे तैराया जा कर, यह चन्द्रमा, जिसकी रश्मि का समूह श्वेत हार के समान है, उदयाचल से धीरे-धीरे उठा।

७३. सब ओर फैलती हुई चन्द्रमा की किरणों को स्थान देने के लिये, घने अन्धकार को दूर फेंक कर, दिशाओं का घेरा बहुत दूर चला गया है।

७४. उदय होने के समय क्षीणकाय चन्द्रमा ने अपने किरणों को चारों ओर फैलाया तो, परन्तु आकाश में अभी तक गरमी वर्तमान होने के कारण, जैसे वह कहीं लोप हो गया।

विशेष—जानकीहरण की तीन हस्तलिखित प्रतियों में 'गगण' शब्द का प्रयोग पाया जाता है, पर 'गगन' ही शुद्ध है। "फाल्गुने गगने फेने णत्वमिच्छन्ति बर्बराः।"

७५. यह चन्द्रमा जो उदय होने के समय लाल था वह बलि के शत्रु (इन्द्र अथवा विष्णु) की दिशा (अर्थात् पूर्व दिशा) को छोड़ता हुआ जैसे शोक से दीन हो कर, उसकी किरणें पीली पड़ गई हैं और वह धीरे-धीरे दुबला होता जा रहा है।

७६. (उदय होने पर) चन्द्रमा ने भृङ्ग के समूह की तरह काले अन्धकार को सब का सब पी (कर) अपने (चन्द्रमा के) शरीर के पारदर्शी होने के कारण वह (अन्धकार) शशगोश के रूप में बाहर प्रतीत होता है।

७७. अवश्य ही यह चन्द्रमा, विरहिणी स्त्रियों के मुख कमल से छीन कर संचित कान्ति से कृष्ण पक्ष में क्षीण किये हुए अपने मण्डल को फिर पूरा करता है।

अन्धकारनिकरं करैरिमं भिन्दत. शशधरस्य मण्डले।
धूलिपुञ्जइव भाति तामस क्षोभवेगपतित शशाकृति ॥७८॥

गुल्मलीनमलिकबुर्र तम. क्रष्टुकाम इव शर्वरीकर.।
सर्वतो विटपजालरन्ध्रकै प्रेरयत्युदयशेखर करान् ॥७९॥

चन्द्ररश्मिनिहतोऽपि तामस. सुप्तकोकिलकुलेन सञ्चय.।
उल्लसत्कुमुदगन्धसम्भृते सावशेप इव भाति षट्पदे ॥८०॥

पत्रजाल शतरन्ध्रविच्युत सामिसिक्त इव भूरुहस्तले।
स्थण्डिले निरवशेपमिन्दुना भाति मुक्त इव रश्मिसञ्चय. ॥८१॥

उल्लसत्सु कुमुदेपु षट्पदा. सपतन्ति परितो हिमांशुना।
भिद्यमानतमसो नभस्तलाद्विच्युता इव तमिस्रबिन्दव. ॥८२॥

तारका रजतभङ्ग भासुरा लाजका इव विभान्ति तानिता.।
दिग्वधूभिरुदयादुदेष्यतो वर्त्मनि ग्रहपते समन्ततः ॥८३॥

७८ अपनी रश्मियो से अन्धकार के समूह को चूर-चूर करते समय, क्षोभ के वेग से गिरे हुए अन्धकार के टुकडे, चन्द्रमा के मण्डल पर एकत्र होकर, खरहे की आकृति की तरह दिखाई पडते हैं।

७९. रात्रि का उत्पन्न करने वाला, उदयाचल का मुकुट (यह चन्द्रमा) लता मण्डपो मे घुसे हुए, भृङ्ग के समान काले अन्धकार को जैसे खींच कर निकालने की इच्छा से, अपनी किरणो को चारो ओर पेडो के रन्ध्रो मे छोड रहा है।

८० यद्यपि चन्द्रमा की किरणो से अन्धकार नष्ट हो गया था फिर भी, सोते हुए कोकिल के परिवार म और उत्फुल्ल कौमुद की सुगध से आकृष्ट उस पर बैठे हुए भृङ्गों मे उसका (अन्धकार का) अवशेप रह गया था।

८१ चन्द्रमा से गिराया हुआ रश्मियो का समूह, पेडो के पत्र-जाल के सैकडो रन्ध्रो से वृक्ष के नीचे टुकडे-टुकडे दिखलाई पडता था, परन्तु वेदियो पर तो वह समूचा का समूचा पडा हुआ लगता था।

८२ कुमुद के फूलने पर उसके भीतर से भृङ्ग, निकल कर इधर-उधर ऐसे गिरने लगे जैसे चन्द्रमा से चूर-चूर किये गये अन्धकार की बूदें आकाश से गिर रही हो।

८३ चाँदी के टुकडो के समान चमकते हुए तारे ऐसे शोभायमान हैं जैसे उदयाचल से उदय होते हुए ग्रहपति चन्द्रमा के मार्ग मे दिग्वधुओ ने चारो ओर लाजा बिखेरा हो।

मित्रनाशपरिरोदिताश्चिरं मूर्छिता इव विभान्ति दीर्घिकाः ।
सुप्तपद्मविनिमीलितेक्षणा वृद्धशान्तकलहंसकूजिताः ॥८४॥

सैकते शशिमरीचिलेपने रोधसीन्दुकरपुञ्जसन्निभम् ।
राजहंसमसमीक्ष्य कातरा रौति हंसवनिता सगद्गदम् ॥८५॥

तिग्मरश्मिविरहे सरोजिनी लोकमिन्दुकिरणावगुण्ठितम् ।
नाभिवीक्षितुमिव क्षपागमे मीलयत्यसितवारिजेक्षणम् ॥८६॥

जृम्भमाणचलपत्रसंहतेरन्तरं कुमुदखण्डसम्पदः ।
संविधातुमिव पद्मसंततिः संकुचत्यनतिदूरवर्त्तिनी ॥८७॥

८४. अपने मित्र के नाश के कारण (अर्थात् सूर्य के अस्त हो जाने के कारण) बहुत देर से रो चुकने पर, ये सरसियाँ, जिनकी कमल रूपी आँखें बन्द हो गई हैं और जिनमें हंस बहुत जोर-जोर चिल्लाने के बाद चुप होगये हैं, मूर्छित-सी लगती हैं।

विशेष —यह श्लोक संवादिनी चूलिका का उदाहरण है। राजशेखर काव्य मीमांसा में कहते हैं — सममभिधायाधिकस्योपन्या सश्चूलिका।
द्विधा च सा संवादिनी निसंवादिनी च।

(चूलिका=तुल्य अर्थ को कहकर पुनः उसकी अपेक्षा विशेष अर्थ का उल्लेख करना चूलिका है। वह दो प्रकार की होती है—संवादिनी और असंवादिनी अर्थात् समान और असमान। यह श्लोक काव्य मीमांसा में इस प्रकार दिया है—

अङ्गणे शशिमरीचि लेपने
सुप्तमिन्दु करपुन्ज सन्निभम् ।
राजहंसमसमीक्ष्य कातरा
रौति हंस वनिताश्रु गद्गदम् ॥

राजशेखर ने इसी भाव का एक दूसरा उदाहरण दिया है।

चन्द्र प्रभा प्रसरहासिनि सौधपृष्ठे
दुर्लक्ष पक्षति पुटां न विवेद जायाम् ।
मूढ श्रुतिर्मुखर नूपुर निःस्वनेन
व्याहारिणीमपि पुरो गृहराज हंसः ॥

८५. चन्द्रमा के किरणों (चांदनी) से लिप्त किनारे की बलुही जमीन पर, चन्द्रकिरणों के समूह के समान शुभ्र राजहंस को न देख कर, हंसिनी व्याकुल होकर अवरुद्ध कंठ से रो रही है।

८६. यह सरोजिनी (सरसी जिसमें कमल हों) सूर्य के विरह से (अर्थात् सूर्यास्त होने पर) अपने नील कमल रूपी आंखों को बन्द कर लेती है जैसे वह चन्द्रमा के किरणों से लिपटे हुए संसार को देखना नहीं चाहती।

८७. निकट में स्थित कमलों का समूह, पत्तियों के समूह के फैलने के कारण चञ्चल, भाग में स्थित, कौमुद के सौंदर्य को फैलने के लिये स्थान देने के हेतु, सिकुड़ रहा है।

भाति बिभ्रदसितोत्पलप्रभं लक्षणं मृगमय हिमद्युति. ।
श्यामलावदनबिम्बकान्तिभिर्वद्धमध्य इव रूप्यदर्पण. ॥८८॥

यौवनोपहित पाण्डुकान्तिना त्वन्मुखेन विजितो निशाकरः ।
लज्जयेव घनमेघसन्ततौ रुद्धरश्मिनिवहो निलीयते ॥८९॥

अङ्कित. शशमयेन लक्ष्मणा कृष्णमेघशकलं निशाकर. ।
मध्यलग्नमिव मन्दमुद्वहन् निष्पतत्यसितवारिदोदरात् ॥९०॥

उद्धृतद्युतिरिवैष मध्यतो भाति कृष्णमृगलक्षण. शशी ।
कुन्दगौरदशनावलीमिमा वेधसा रचयितु तव प्रिये ॥९१॥

त्वन्मुखावजितमण्डलश्रियस्तत्कलङ्कममृतद्युतेरयम् ।
वीक्ष्य शीतकर कान्ततोरणः शोकवाष्पमिव वारि मुञ्चति ॥९२॥

इति सपदि वदन् वदान्यवर्य. शयनशिलातलमिन्दुपादधौतम् ।
अलसतरगतिर्नरेन्द्रकन्यामनुगमयन्मदमन्थर. प्रपेदे ॥९३॥

८८ यह चन्द्रमा, जिसमें नील कमल के रग का हरिण लक्षित है, उस चांदी के दर्पण की तरह लगता है जिसमे (मुख देखने के समय) सांवली स्त्रियों के मुख के बिम्ब की कान्ति बीच मे बँध गई हो ।

८९ यौवन के कारण शुभ्र कान्तिमान तुम्हारे मुख से हार कर यह चन्द्रमा जैसे लज्जा से, घने मेघों के समूह मे अपनी रश्मियो की परम्परा को बटोर कर छिप गया है ।

९०. खरहे से अङ्कित यह चन्द्रमा काले मेघो के भीतर से धीरे-धीरे निकलता हुआ ऐसा लगता है जैसे (निकलते समय) उसमें काले मेघ का एक टुकड़ा बीच मे लगा रह गया हो ।

९१. हे प्रिये ! यह चन्द्रमा जिसमे कृष्ण मृग का आकार बना है, ऐसा लगता है जैसे तुम्हारे कुन्द के सदृश श्वेत दांत की पंक्ति को बनाने के लिये ब्रह्मा ने चन्द्रमा के मध्य भाग से उसकी कान्ति निकाल ली हो ।

९२. तुम्हारे मुख से जिसके मण्डल की कान्ति हार गई है, ऐसे अमृत के समान दीप्तिमान, इस चन्द्रमा के कलङ्क को देख कर, इस चन्द्रकान्त मणि से बने हुए तोरण से पानी छूट रहा है जैसे वे शोक के आंसू हो ।

९३. शीघ्रता से इतना कह कर, मधुरभाषियो मे श्रेष्ठ (राम) मद से धीरे-धीरे, अलसाई हुई चाल से, चन्द्रकिरणों से स्वच्छ की हुई शयन शिला पर नरेन्द्र की पुत्री (सीता) के पीछे-पीछे गये ।

अथ सुरतमखे सुखं समाप्ते मदनहुताशनदग्धमानहव्ये ।
चषकमधुनि सन्निविष्टविम्बं मु खमनयद्दयितासखः स सोमम् ॥९४॥

दुहितुरवनिभर्त्तु रुन्मयूखं मणिचषकं परिमण्डलं विहाय ।
प्रियमुखपरिभु क्तधामवाञ्छा करकमलं नयति स्म हेमशुक्तिम् ॥९५॥

नियतमिह पतन्ति दन्तधारा मदन मदोद्धतयोरितीव भीत्या ।
अधरकिशलये विहाय यूनोर्मधु पिबतोर्नयनान्युयवाप राग ॥९६॥

मुहुरपि मधुपो विवृद्धतृष्णो न विरमति स्म पिबन् सुगन्धि हृद्यम् ।
युवतिमुखमसंशयं यतो यत् सरसिरुहं परमार्थतस्तदेतत् ॥९७॥

अचकमत मधु प्रियामुखेन क्षितिपसुतः प्रणयादसौ वितीर्णम् ।
अधरमितव्रतो व्रणस्य दाहात् स्फुटरचितभ्रुकुटिर्मधुस्रवेण ॥९८॥

इति सपदि निशामतीयतुस्तौ प्रविधुतकौसुमभक्तिसूत्रशेषम् ।
रतिकलहकचग्रहेण माल्यं विलुलितकेशसमर्पितं दधानौ ॥९९॥

९४. जब रति रूपी यज्ञ, जिसमें कामदेव की अग्नि में, मान की आहुति दी जा चुकी थी, सुख-पूर्वक समाप्त हो गया तब अपनी प्रियतमा के प्रिय (राम) मदिरा के प्याले में, जिसमें उनके मुख का प्रतिबिम्ब पड़ रहा था, सोम भर कर सीता के मुख के पास ले गये ।

९५. पृथ्वीपति की पुत्री (सीता) ने, इस इच्छा से कि वह अपने प्रिय (राम) के मुंह की जूठी मदिरा पी सके, मणि के बने हुए प्याले को जिसके गोल किनारे से आभा निकल रही थी छोड़ कर, सुवर्ण के मदिरा पात्र को अपने कर कमल में ले लिया ।

९६. काम से उन्मत्त उनके दाँतों की तीखी धार अवश्य ही अधरों पर पड़ेगी इस डर से, लाल रंग, मदिरा पीने के समय उनके किसलय के समान अधरों को छोड़ कर उनकी आंखों में छा गया ।

९७. वह मधु लोलुप भृङ्ग (राम) की, जिसकी प्यास बहुत बढ़ गई थी, सुवासित होने के कारण हृदय हारी मधु (अधर मधु) के बार–बार पीने पर भी नहीं अघाते थे और पीने से नहीं हटते थे । क्योंकि वह उस युवती का मुख था इसमें कोई सन्देह नहीं था पर यथार्थ में वह कमल था ।

९८. तब उस पृथ्वीपति के पुत्र (राम) ने, जिनकी भौंहें, अपने अधरों में (सीता के लगाये हुए) घाव पर मदिरा लगने से दाह के कारण संकुचित हो गई थीं, प्रेम के वशीभूत हो कर, अपनी प्रिया के मुख से (सीधे अपने मुख में) मदिरा लेना चाहा ।

९९. रति के समय छीना-झपटी में पकड़े हुए केश से फूलों के गिर जाने से और उनके केवल सूत्र का सौंदर्य बच रहने के कारण, बिखरे हुए बालों में (उसी प्रकार) माला धारण किये उन्होंने जल्दी से रात बितायी ।

अथ हृदयङ्गमध्वनितवशकृतानुगमै-
रनुगतवल्लकीमृदुतरकणितैर्ललनाः ।
तमुषसि भिन्नषड्जविपर्यीकृतमन्द्ररवै
शयितमबोधयन् विविधमङ्गलगीतिपदै ॥१००॥

हृदय निपीडनोद्धृतपयोधरकुङ्कमया
रतिषु दधानया दशनखण्डितमोष्ठमणिम् ।
चिरकृतजागरारुणितमन्थरलोचनया
शयनममुच्यत प्रियमनु प्रमदोत्तमया ॥१०१॥

इति अष्टम. सर्ग. ।

१००. तब हृदय को सोहावनी लगने वाली बासुरी की ध्वनि से, जो वीणा की अति मधुर झकार का साथ कर रही थी, और जिसमे षड्ज के भिन्न-भिन्न श्रुतियो की गम्भीर ध्वनि स्पष्टतया लक्षित थी, तथा विविध प्रकार के मङ्गल गान से प्रात काल स्त्रियो ने सोते हुए उन्हे जगाया ।

१०१ तब स्त्रियो मे श्रेष्ठ (सीता) ने, जिसके स्तनो पर लगा हुआ कुकुम का लेप हृदय के गाढ आलिङ्गन से पुछ गया था, रति के समय दाँत से काटे हुए, मणि के समान दीप्तिमान ओठो को धारण करते हुए, और जिसकी आँखें रात मे देर तक जागने के कारण लाल एव मन्द हो गई थीं, पलग को अपने पति के पश्चात् छोडा ।

आठवाँ सर्ग समाप्त ।

नवमः सर्गः

इति प्रवृत्तस्य सुतस्य केषुचिद्गतेषु मासेषु सुखेन भूपतिः ।
पुरं प्रतस्थे वनितापरिग्रहैस्त्रयं सुतानामितरत्समस्य सः ॥१॥

उपेत्य पत्या सह शोकसम्पदा कलत्रभारेण च मन्थरक्रमा ।
पितुः प्रयाणाभिमुखी भुवः सुता ततान पादावुदबिन्दुभिर्दृशोः ॥२॥

असावपत्यंगुणपक्ष वर्त्तिनीं मतिं समालम्ब्य गुणैः पुरस्कृतम् ।
जगौ ततः साधु गुरुर्गरीयसीं गिरं सतीनामुचितव्रताश्रयाम् ॥३॥

परः प्रकर्षो वपुषः समुन्नतिर्गुणस्य तातो नृपतिर्नवं वयः ।
इति स्म मा मानिनि मानमागमः पतिप्रसादोन्नतयो हि योषितः ॥४॥

स्त्रियो न पुंसामुदयस्य साधनं त एव तद्धामविभूतिहेतवः ।
तड़िद्वियुक्तोऽपि घनः प्रजृम्भते विना न मेघं विलसन्ति विद्युतः ॥५॥

१. जब राम कई दिन इस प्रकार आनन्द में व्यतीत कर चुके बाद राजा दशरथ अपने बाकी तीनों पुत्रों का भी विवाह कर अपनी राजधानी के लिये चले ।

२. पृथ्वी की पुत्री (सीता) अपने पति के साथ, अतिशय शोक एवं श्रोणी के भार के कारण धीरे-धीरे अपने पिता के पास अपने अश्रुबिन्दुओं से उनके पैरों को भिगोते हुए चली ।

३. तब उसके पिता, गुण का पक्ष लेने वाली बुद्धि का अवलम्बन कर अपनी गुणवती पुत्री से, पतिव्रता स्त्रियों के कर्त्तव्य के सम्बन्ध में सारगर्भित वचन बोले।

४. हे मानिनि! शरीर का अधिक सौष्ठव, गुणों की प्रचुरता, पिता का नृपति होना, युवावस्था, इनके कारण अभिमान न करना । क्योंकि पति के प्रसन्न करने ही में पत्नी का गौरव होता है ।

विशेष—कुले प्रसूतिः प्रथमस्य वेधसस्त्रिलोक सौन्दर्यमिवोदितं वपुः ।
अमृग्यमैश्वर्यं सुखं नवं वयः.....।

—कुमारसम्भव, ५–४१ —कालिदास ।

५. स्त्रियाँ, पुरुषों के अभ्युदय का साधन नहीं होतीं । बल्कि पुरुष ही उनके तेज और वैभव के कारण होते हैं । बिना बिजली के भी बादल गरजता है, परन्तु बिना बादल के बिजली नहीं चमकती ।

गतापि भर्त्रे परिकोपमायतं गिर. कृथा मा परुपार्थदीपनी. ।
कुलस्त्रियो भर्तृजनस्य भर्त्सने परं हि मौन प्रवदन्ति साधनम् ॥६॥

पतिव्रता वश्यमवश्यमङ्गना करोति शीलेन गुणस्पृह पतिम् ।
विनष्टचारित्रगुणा गुणैषिण. पराभव भर्त्तुरुपैति दुस्तरम् ॥७॥

अलं त्वयि व्याहृतिविस्तरेण मे कुरुष्व तद्यच्चरित त्वदाश्रयम् ।
श्रुति प्रयात जरसैव जर्ज्जरं सहस्रधेदं हृदयं न दारयेत् ॥८॥

अय त्वदेकप्रवणो मनोरथो वृथाऽद्य दैवादपि नाम नो भवेत् ।
इति प्रवक्तुर्जरतो निरासिरे निगृह्य कण्ठ वचनानि मन्युना ॥९॥

उदग्रभासः शिखया शिखामणे स्रजा च धम्मिल्लकिरीटदष्ट्या ।
प्रमृज्य पादौ जनकस्य जम्पती क्षयादयातामथ लम्भिताशिषौ ॥१०॥

कृतो वियोगेन शुच. समुद्भव. समर्पित. साधुवरेण सम्मद. ।
मनस्यवस्थाननिमित्तमीशितु. क्षण विवादानिव तस्य चक्रतु. ॥११॥

६. पति से बहुत क्रुद्ध होने पर भी उनसे कटु और लगते हुए वचन न बोलना । अच्छे कुल की स्त्रियों के लिये चुप रह जाना, पति की भर्त्सना करने का सबसे बड़ा साधन कहा गया है ।

विशेष --देखिये 'भर्तुर्विप्रकृताऽपिरोषणा तया मास्म प्रतीपं गम.'।

—शाकुन्तल–४–१८,कालिदास

७. पतिव्रता स्त्री, अपने शील से, गुण के इच्छुक पति को, अवश्य ही, अपने वश मे कर लेती है परन्तु चरित्र हीन स्त्रियो की, गुणो की इच्छा रखने वाले पति से बड़ी अवहेलना होती है ।

८. मुझे और कुछ अधिक विस्तार से तुमसे नही कहना है । (केवल इतना ही कहना है-कि) कोई आचरण तुम ऐसा न करना जिसे सुन कर, वृद्धावस्था ही से जर्जर उस हृदय को, जो स्वय सहस्रो टुकडे मे बँट गया है, चूर चूर कर दे ।

९. अब तुम्हारी ही ओर लगी हुई यह अभिलाषा, दैव सयोग से भी, वृथा न हो, ऐसे वचन उस वृद्ध के, शोक से अवरुद्ध कण्ठ से निकले ।

१०. तब वे दोनों अपने मुकुट मे लगे हुए श्रेष्ठ मणि की प्रभा से एव किरीट से केशपाश के साथ गुथी हुई फूलो की माला से जनक के चरणो का परिमार्जन कर (अर्थात् प्रणाम कर) और उनका आशीर्वाद लेकर राजमहल से निकले ।

११. उस राजा के हृदय मे उस क्षण (अपनी पुत्री के) वियोग से जनित शोक और उसे एक विशिष्ट साधु पति मिल जाने की प्रसन्नता, ये दोनो भाव उनके मन मे स्थान पाने के लिये जैसे परस्पर झगडने लगे ।

हलायुधाभस्य सकालहो रवः पयोधिनिर्घोषगभीरभैरवः ।
ततः प्रगल्भाहतभेरिसंभवः प्रकाशयामास गतिं समन्ततः ॥१२॥

गजेन्द्रघण्टाघटितश्च निःस्वनः करेणुकावृंहितवृंहितो मुहुः ।
भयंवितन्वन् भवनेषु पक्षिणां दिशः ससर्पाथ समं समुद्धतः ॥१३॥

समारुरोहाथ रथं महारथः सहेमचित्रं सह राजकन्यया ।
दिनादिसन्ध्यानुगतां पिशङ्गितां स्वरश्मिदीप्त्येव दिवं दिवाकरः ॥१४॥

शिरःप्रदेशस्थसमुद्गपेटिकागृहीतवीणांऽशुक पञ्जरादयः ।
सवेत्रहस्तैः स्थविरैरधिष्ठिताः स्त्रियोऽप्यनुस्यन्दनमत्यगुर्मुदा ॥१५॥

मदान्धमातङ्गघटाद्रिसंङ्कटे परिक्वणन्ती बलकायनिम्नगा ।
तरङ्गिता वल्गुतुरङ्गरङ्गितैः पुरः प्रतस्थे पुरुहूततेजसः ॥१६॥

स्वदृष्टिरोधि श्रवणाग्रमारुतैरजो रथोत्थं यदि नाहरिष्यत ।
विनिर्गताभिर्न्न पुरो मदस्रुतां घटाभिरद्रक्ष्यत वर्त्म दन्तिनाम् ॥१७॥

१२. तब बहुत जोर से पीटे गये नगाड़े की ध्वनि, दुंदुभी का स्वर एवं समुद्र के गम्भीर गर्जन ने, बलराम के समान तेजस्वी उनके प्रस्थान की सूचना दी ।

१३. तब श्रेष्ठ हाथियों के घंटों की टनटनाहट, हथनियों की बार बार की हुई चिग्घाड़ से तेजी पकड़ कर, महल में चिड़ियों को भयभीत करता हुआ बड़े जोरशोर से सब दिशाओं में फैल गयी ।

१४. तब महारथी राम, राजकन्या (सीता) सहित, सुवर्ण से चित्रित रथ पर ऐसा चढ़ जैसे प्रातःकाल, उषा से अनुगत सूर्य रंग विरंगे आकाश में चढ़ता है।

१५. स्त्रियां भी बंद संदूकों को जिनमें वीणा, रेशमी वस्त्र, पिंजड़े इत्यादि रखे थे, अपने सिर पर रख कर, हाथ में बेत लिये हुए वृद्ध भृत्यों की देखरेख में बड़ी प्रसन्नता से रथ के पीछे-पीछे चलीं ।

१६. इन्द्र के समान तेजस्वी राजा की, सुन्दर घोड़ों से अनुरञ्जित तरङ्ग वाली, नदी के समान सेना, पहाड़ के समान मदान्ध हाथियों के समूह से, चलने में रुकावट होने के कारण शोर करती हुई राजधानी की ओर चली ।

१७. यदि रथों के चलने से उठी हुई उनकी दृष्टि को रोकने वाली धूलि को मद बहाते हुए, हाथियों ने अपने कान के अग्रभाग को फड़फड़ाने से निकली हुई वायु से न उड़ा दिया होता तो उनके समूह को सामने का मार्ग न दिखाई पड़ता ।

व्यतीतरथ्येऽथ रथे कपोलयोर्विलासवत्या लसदशुजलायो ।
पयात तस्याः पुरगृह्यदीर्घिकासमीरणानर्त्तितपद्मज रज. ॥१८॥

वराङ्गना प्रस्तरभेदकोटिभिर्हतस्य चक्रे चलन वरूथिन. ।
पिधाय यत्तचलनं पथिप्रियं तमाललम्बे वलसन्निधावपि ॥१९॥

रथध्वनिप्रापितसम्मदं गवा कुल समुत्पुच्छ्यमानमुन्मुखम् ।
उदग्रकर्णं परिधावदेकतो ददर्श सीताऽथ वनान्तवर्त्तिनी ॥२०॥

विनिद्रपद्मा मृदुभि. समीरणैर्विसारयन्त. कलहसिकागिर. ।
स्वदेशसीमासरितो विलङ्घिता. शुच वधूचेतसि साधु सदधु ॥२१॥

विवृत्तदृष्टा विपयव्यतिक्रमाच्छनैर्निमज्जन्त इवावनीतले ।
स्वजन्मभूमौ गिरयोनृपात्मजाकपोलमातेनुरजस्रमश्रुभि. ॥२२॥

द्विपेन्द्रदन्ताहृतवन्यशल्लकीकपायगन्धि. पथि तत्र योपिताम् ।
शनैर्विधुन्वन्नलकाग्रवल्लरीर्मुखानि पस्पर्श वनान्तमारुत. ॥२३॥

१८ जब रथ थोडी दूर चला गया तो नगर के बाहर तालाब मे वायु से नाचते हुए कमलो का पराग उस विलासवती (सीता) के किरणो की जाल से चमकते हुए दोनो गालो पर जा गिरा ।

१९. चलने मे, पत्थर के नोकीले टुकडो से जब रथ के पहियो मे धचका लगता था तो उस अवसर का लाभ उठाकर वह सुन्दर शरीर वाली (सीता) अपने प्रिय से सेना के सामने ही लिपट जाती थी ।

२० जगल के बीच मे सीता ने नील गायो का एक झुड देखा जो रथ की ध्वनि से प्रसन्न हो कर, अपनी पूँछ उठाये, सर ऊँचा किये और कान खडे हुए एक ओर भाग रहा था ।

२१. अपने नगर की सरहद पर नदी को, जिसमे मन्द-मन्द वायु मे उत्फुल्ल कमल झूम रहे थे और जहाँ से हसिनियो की बोली का विस्तार हो रहा था, जब बहू (सीता) ने पार किया तो उसका हृदय शोक से भर गया ।

२२ (रथ की गति के कारण) भिन्न भिन्न वस्तुओ के क्रम-क्रम से आगे आने के कारण (रथ पर से) पीछे मुड कर देखने से उसकी जन्मभूमि के पर्वत, (पीछे हटते हटते) पृथ्वी मे धीरे-धीरे विलीन होते हुए लगते थे। ऐसा देख कर उसको (सीता की) आँखो मे निरन्तर बहते हुए आँसुओं ने उसके गालो को भिगो दिया ।

२३ श्रेष्ठ हाथियो के दाँत से तोडी हुई जगली शल्लकी की कपाय गन्ध से युक्त, वन के अन्त मे बहती हुई वायु ने रास्ते मे, पत्नी (सीता) के लता के समान केश के अग्रभाग को धीरे-धीरे हिलाते हुए उसके (सीता के) मुख को स्पर्श किया ।

अथ प्रतानः प्रततान तामसो नृपस्य भीमं भयमादिशन्दिशः ।
क्षिपन् क्षपाया विगमेऽपि संहतिं प्रसह्य वैरोचनरोचिषां पथि ॥२४॥

अरिष्टसन्तापविरूपदर्शनास्तमोऽभिभूताः प्रतिकूलमारुताः ।
अविप्रसन्नानि मुखानि भेजिरे दिशो विनाशोपनता इव क्षणम् ॥२५॥

अथ प्रकाशीभवदग्रतोदिशं क्षणादुदीचीमवभास्य दीप्तिभिः ।
बलेन तेजः पुरुषाकृतिश्रिया विभक्तमुत्पातमनु व्यदृश्यत ॥२६॥

ततो दधानः श्रवणावसङ्गिनीं विशुष्कपङ्केरुहबीजमालिकाम् ।
विनिद्ररक्तोत्पलशङ्कया ततां विलोचनोपान्त इवालिसन्ततिम् ॥२७॥

विशालवामांसतटावलम्बिनीं समुद्वहन् द्वीपितनुं तनूदरः ।
परिज्वलंस्तीव्रतपोहुताशनस्फुलिङ्गपातैरिव बिन्दुचित्रिताम् ॥२८॥

भुजेऽतिभीमे सशरं शरासनं निधाय वामे निधनावहं द्विषाम् ।
करेऽपरस्मिन् परदुर्गपारगं परं स बिभ्रत्परशुं परासुहा ॥२९॥

२४. यद्यपि रात्रि नहीं थी, फिर भी एक अन्धकार का समूह, राजा के हृदय में तीव्र आशंका उत्पन्न करता हुआ, सूर्य के किरण पुञ्ज को सहसा हटा कर, रास्ते में चारों ओर फैल गया।

२५. अन्धकार से घिरी हुई, जहां प्रतिकूल हवायें चल रही हैं अनिष्ट सूचक भयङ्कर रूप धारण किये हुए, दिशाओं ने, जैसे विनाश की ओर अग्रसर हो रही हों, उस क्षण, घोर अप्रसन्नता का रूप धारण कर लिया।

२६. तब एक तेजपुञ्ज, अपनी दीप्ति से उत्तर दिशा को सहसा प्रकाशमान करता हुआ, बलवान् पुरुषाकृति से दमदमाता हुआ सामने दिखलाई पड़ा।

२७. सूखे हुए कमल के बीजों की माला कान में पहिने हुए, जिनके बीज उनकी आंखों के निकट ऐसे लगते थे, जैसे मुंदे हुए नील कमल की शंका से एकत्र भृङ्गों की पंक्ति लगी हो।

विशेष--२७वें श्लोक से ३१वें श्लोक तक कुलक है। ३१वें श्लोक में "भृगूणां प्रभुः रमेण गिरो जगदे" के साथ प्रत्येक श्लोक का अन्वय होगा। इन पांचों श्लोकों में परशुराम का वर्णन है। 'कुलक' की व्याख्या २-२ में देखिये।

२८. क्रोध से धधकते हुए, पतले उदर वाले, विशाल बांये कन्धे पर तेंदुये का चर्म लटकाये हुए, जिस पर उसके बिन्दु ऐसे लगते थे जैसे उनके तीव्र व्रत एवं तप की अग्नि की जलती हुई चिनगारियों के गिरने से चित्रित चिह्न बन गये हों।

२९. शत्रुओं का नाश करने वाले, जिनके भयानक बांये कन्धे पर बाण से संयुक्त मृत्यु को साथ में ले चलने वाला धनुष था और दूसरे हाथ में एक उत्तम फरसा था जो शत्रुओं के दुर्ग को भेदने वाला था।

तपोऽभिधानस्य सितेतराध्वन शिखा इवादित्यमयूखपिङ्गला. ।
जटा विधुन्वन् बलिता समन्तत समीरणैरात्मरयेण सम्भृतै ॥३०॥

प्रभुर्भृगूणा जगदे जगत्सृज परोऽवतारो ज्वलन वितन्वता ।
हसेन धुन्वन्नथ तद्बलं बली प्रुरुध्य रामेण रुपावृता गिर ॥३१॥

न राम राम युधि जेतुमुद्यमो विधीयतामन्यमिव क्षितिक्षितम् ।
सरित्तटीपाटन पाटवस्पृश न गोपति प्राप्य विशीर्यते नग. ॥३२॥

रघोरपत्ये जगतीपतिद्विषो वृथा तव स्यादिह विक्रमक्रम ।
अल विसारिग्रसनस्थपाटवो न दन्दशूकप्रभवे विहङ्गम. ॥३३॥

तव प्रयोगे धनुषोऽनुशासितु शरासने भूधरधन्वन. परम् ।
इत. प्रवृत्तापि न नूनमागता विपत् त्वदीयश्रवणस्य गोचरम् ॥३४॥

निशम्य तस्यैतदितीरित वचो जगाद शिष्य. स पुन. पिनाकिन ।
परस्य वृद्धि यशसो वितन्वती वृथा विधित्सन् धनुषो भिदामिदम् ॥३५॥

३० सूर्य की किरणो के समान पिङ्गल वर्ण, तपस्या की अग्नि से निकली हुई धूमिल ज्वाला के सदृश, अपने जटाजूट को अपने ही तेज से निकली हुई वायु से, हिलाते हुए ।

३१. तब उस वीर को, जो भृगुवश के प्रभु थे, जो जगत् के सृजन करने वाले ब्रह्मा के दूसरे अवतार थे और जो राम के बल को हँसी मे झकझोर कर जल फैला रहे थे, रोक कर राम क्रोध से भरे वचन बोले ।

३२. हे परशुराम ! दशरथ के पुत्र इस राम को अन्य महीपति राजाओ की तरह युद्ध मे जीतने का प्रयास न करो । नदी के किनारे को ढहाने मे चतुर साँड पहाड को गिराने मे समर्थ नही होता ।

३३ *क्षत्रिय राजाओ के शत्रु, आपके विक्रम की परम्परा रघु के वशज के प्रति निरर्थक होगी।* एक पक्षी जिसमे केवल मछली के निगलने की शक्ति होती है वह सर्पराज के सामने नगण्य है ।

३४ तुम्हे धनुर्विद्या सिखलाने वाले शिव के धनुष पर जो यह विपत्ति आई है उसे मैंने जान बूझ कर किया है । लगता है यह बात तुम्हारे कान तक अवश्य ही नहीं पहुँची ।

३५ उनके (राम के) कहे हुए इस वाक्य को सुन कर, उस शिव के शिष्य ने राम से, जिनका यश धनुष के तोडने से बढ रहा था उसे वृथा करने की इच्छा से फिर यह कहा ।

नवेश्वर स्तब्धतरं धनुर्द्वयं विधाय बन्ध्येतरबाणपातनम् ।
विशामधीशे किल विश्वकर्मणा पुरन्दराख्याय पुरा व्यतीर्यत ॥३६॥

विसृज्य पूर्वं दनुजारये धनुस्तयोरथादायि रथाङ्गधारिणे ।
धनुस्तथैकं त्रिपुरं दिधिक्षते त्रिलोचनाय त्रिदशाधिपेन तत् ॥३७॥

विवित्सया तद्गतजन्यतेजसो व्यधत्त यत्नेन तथा मरुत्पतिः ।
यथाऽऽहवो हव्यवहोग्रतेजसोरजय्यशक्त्योरजयोरजायत ॥३८॥

चकार चक्रादि विहाय देवयोर्युगं महेष्वासयुगेन संयुगम् ।
दिशो दशापि प्रतिरुध्य पत्त्रिभिः समाः सहस्राणि समेतसाहसम् ॥३९॥

अथो विकृष्टं मृदुभूतमीश्वरः ससर्ज यच्चापमभेदि तत्त्वया ।
अगादृषीकाय वितीर्णमक्षतं क्रमेण हस्तं मम वैष्णवं धनुः ॥४०॥

गुणावुभावस्य तयोर्जगच्छ्रुतिं जहाति नैको दृढतेति विश्रुतः ।
असंशयं ज्येतिनिरूढिमागतः परो ममैव श्रवणान्तगोचरः ॥४१॥

३६. हे नये राजा (अर्थात् अभी नये नये राजा हुए हो। तुम यथा जानो यह भाव है) प्राचीन समय में विश्वकर्मा ने दो विशिष्ट धनुष, जिनसे निकले हुए बाण कभी विफल नहीं होते, बनाकर, देवताओं के स्वामी को जिनका नाम पुरन्दर है, प्रदान किया था।

३७. तब देवताओं के स्वामी ने प्रथम धनुष, दनु दानव के शत्रु, एवं सुदर्शन चक्र के धारण करने वाले विष्णु को दिया और दूसरा, त्रिनेत्र भगवान् शिव को जो तीन नगरों को जलाना चाहते थे, दिया।

विशेष—तीन नगरों से अभिप्राय मय दानव से बनाये हुए उन सोना, चाँदी और लोहे के नगरों से है जिन्हें शिव ने जलाया था।

३८. तब मरुतों के स्वामी, इन्द्र ने उसकी शक्ति को जानने की इच्छा से, यज्ञ में हव्य के अधिकारी, और उग्रतेज के धारण करने वाले, शिव, के जो दोनों अजेय और अजन्मा थे, बीच बड़े प्रयत्न से झगड़ा करा दिया।

३९. तब इन दोनों देवताओं ने चक्र और अन्य अस्त्रों का परित्याग कर, दोनों महान् शक्ति वाले धनुषों से बड़े साहस के साथ दसों दिशाओं को भी रोक कर सहस्र वर्ष तक युद्ध किया।

४०. तब शिव ने उस मुलायम धनुष का जिसे तुमने बहुत अधिक खींचने से तोड़ डाला है, परित्याग कर दिया और विष्णु का वह अक्षत धनुष जो ऋचीक को मिला था क्रमानुसार मेरे हाथों में आया।

४१. इस विष्णु के धनुष में दो गुण हैं। एक तो वह दृढ़ता के नाम से प्रसिद्ध है। वह जगत् की श्रुति (श्लेष, श्रुति=नाम=ख्याति) को नहीं छोड़ती और दूसरा इसकी विख्यात प्रत्यञ्चा जो निश्चय ही केवल हमारे ही कान के अन्त तक जाती है।

अपाङ्गभागावधि चापपूरण सुदुष्करं तिष्ठतु विष्णुगोचरम्।
गुण यदि प्रापयसीह जिह्मता वलोपपन्नेषु ततस्त्वमग्रणी. ॥४२॥

निधाय बाणं धनुषीह पूरिते वध. स्वहस्तेन तवैव सत्क्रिया।
इतीरयीत्वा तनयस्य भूपतेर्मुमोच हस्ते सशरं शरासनम्॥४३॥

तत. स शून्यामिव मुष्टिमानयन्नपाङ्गदेशं दशकण्ठसूदन।
बलादविज्ञातविकर्षणश्रमश्चकर्ष गुञ्जद्गुणवन्धन धनु.॥४४॥

स तेन मुक्त. किलसायकी दिव. पदं तपस्यद्वृषभस्य वाञ्छत.।
द्वितीयवर्णस्य निहन्तुरात्मनो विधाय नीशारमथ व्यतिष्ठत॥४५॥

रिपोरजय्यस्य जयेन मानवै. सभाज्यमानो बहुमानमत्रणै.।
मनोज्ञवासे पथि मैथिलीसख. सुखेन नित्वा कतिचिद्दिनानि स.॥४६॥

व्यपावृतद्वारमुखेन सन्तत वलेन भूम्ना विशता कृतध्वनिम्।
पुरीमुदन्वन्तमुदग्रनिस्वनं तनुं पिबन्तीमिव कुम्भजन्मन.॥४७॥

४२ इसको नेत्र के किनारे तक खीच लेना नितान्त दुष्कर है। उसे विष्णु ही कर सकते हैं। अगर तुम इसकी प्रत्यञ्चा ही को झुका दो तो वीर पुरुषो के तुम अग्रणी समझे जाओगे।

४३ इस धनुष पर बाण चढा कर जब तुम इसे पूरी तरह खीच लोगे, तब मेरे हाथो से तुम्हारा वध ही तुम्हारा सत्कार होगा। यह कह कर (परशुराम ने) बाण सहित धनुष को राजपुत्र (राम) के हाथ मे दे दिया।

४४ रावण के मारने वाले राम ने अपनी मुट्ठी से उसे आँख के कोने तक खीच कर, जैसे उनकी मुट्ठी खाली हो और धनुष के खीचने मे उन्हे कोई प्रयास न मालूम पडता हो, उस धनुष को, जिसकी प्रत्यञ्चा भनभना रही थी, जबर्दस्ती खीचा।

४५ तब राम से छोडा हुआ वह बाण, तपस्या करने वालो मे श्रेष्ठ, क्षत्रिय वर्ण राम के वध की चेष्टा करने वाले और स्वर्ग मे जाने के इच्छुक, परशुराम के सामने व्यवधान होकर खडा हो गया। (अर्थात् उनके स्वर्ग जाने का मार्ग रोक दिया)।

४६. सीता के साथ, अजेय शत्रु (परशुराम) को जीत कर, जनता के अनेक मानपत्रो से अभिनन्दित, राम ने उस मनोज्ञ मार्ग मे थोडे दिन रह कर।

विशेष—श्लोक ४६ से ५१ तक 'कुलक' है। ५१वें श्लोक मे 'ता (पुरीं) विवेश' के साथ प्रत्येक श्लोक का अन्वय होता है। इन छ श्लोकों में नगर प्रवेश का वर्णन है।

४७. उस नगरी मे जिसके खुले हुए फाटको के मार्ग से, कोलाहल करती हुई, बहुत बडी सेना, घुस रही थी और जो गरजते हुए समुद्र को पीने हुए अगस्त्य के शरीर के समान लगती थी।

नरेन्द्ररथ्योभयभागचारितप्रसारिकालागरुधूपवासिताम् ।
ततामनन्तैरुपरत्नतोरणं सपङ्कजाष्टापदकुम्भमण्डलैः ॥४८॥

परिक्वणत्काञ्चनकिङ्किणीगुणैः सुगन्धिना गन्धवहेन ताडितैः ।
भ्रमत्पताकानिकरैरुदर्चिषो वितन्वतीमुष्णघृणेः करच्छिदाम् ॥४९॥

मधुव्रतव्रातविरावकिङ्किणीरुतेन रम्यं मणितोरणस्रजाम् ।
चयं दधानामनिलस्य रंहसा धुतं पताकानुकृतानि बिभ्रतः ॥५०॥

विवेश तामञ्जलिबद्धसंपदा मुहुर्मुखेन्दोरुदयेन सर्वतः ।
नरेन्द्र सूनुर्मुकुलानि कल्पयन् जनस्य हस्तारुणपङ्कजानि सः ॥५१॥

गुरूनपृष्ट्वेव कुमारमीक्षितुं जवेन वातायनमीयुरङ्गनाः ।
न ता नसत्यो न च मूढवृत्तयस्तथाहि वंशस्य रघोर्विनीतता ॥५२॥

रराज वातायनसन्ततिर्वृता विलोलनेत्रैर्वनितामुखाम्बुजैः ।
तता विनीलोत्पलपत्रसम्पदा सरोजिनी तिर्यगिव व्यवस्थिता ॥५३॥

४८. जिसमें राजा की सवारी के दोनों ओर फैले हुए कालागरु धूप से सुवासित थी और जहाँ मणि के बने हुए तोरणों के समीप, कमलों से भरे हुए, अनन्त सुवर्ण कलशों के समूह पंक्ति के पंक्ति रखे थे ।

४९. (जो नगरी) सुगन्धित वायु के थपेड़े से लहराती हुई, और जिस सोने की घंटियों की लड़ियां खनखना रही थीं ऐसी पताकाओं से तपते हुए सूर्य की रश्मियों को काट रही थी ।

५०. जिस नगरी में मणि के बने तोरण, फूल की मालाओं के लटकने के कारण बड़े शोभायमान थे, जिन पर किङ्किणी के समान भृङ्गों के मँडराने से वे बड़े मनोहारी लगते थे और जो तेज वायु के थपेड़ों से लहराने के कारण, पताका की शोभा का अनुकरण करते थे ।

५१. तब राजपुत्र नगर के भीतर गये । और सब ओर जनता ने तत्क्षण अञ्जलिबद्ध हो कर उन्हें प्रणाम किया । ऐसा लगता था जैसे जनता के कमल के समान हाथ उनके मुखचन्द्र के उदय होने से मुकुलित हो गये हों ।

५२. राजकुमार को देखने के लिये स्त्रियां अपने गुरुजनों से बिना पूछे ही झरोखे पर दौड़ गई । ऐसी बात नहीं थी कि वे सती नहीं थी और न यही था कि वे फूहड़ थीं । रघुकुल की शालीनता ही ऐसी थी ।

५३. झरोखों की पंक्ति जो स्त्रियों के कमल के समान मुखों से भरी थी, और जिनकी आँखें इधर से उधर बराबर घूम रही थीं ऐसी शोभायमान हुई जैसे सरसी में कमलों की एक झाड़ी क्यारी हो जिसमें बहुत सी नीलवर्ण की पत्तियां हों ।

दधौ द्युतिं जालगवाक्षसङ्गिनी नितम्बिनीनां चलदृष्टिसन्ततिः ।
ततेव पङ्केरुहनालजालके परिस्फुरन्ती शफरीपरम्परा ॥५४॥

पदं पुरन्ध्र्यामविशुष्कयावकं समर्पयन्त्यामविलम्बिविक्रमम् ।
बभूव सोपानविमर्दसंभवः स्वराग एवाङ्घ्रितलस्य यावकः ॥५५॥

कयाचिदालोकपथं मुखाकुलं समेत्य घर्मस्रुतपत्रलेखया ।
सखीकपोलाहितगण्डभागया कृतस्तदीयेऽपि मुखे विशेषकः ॥५६॥

प्रसाधनव्यापृतयाऽपि रामया प्रदेशिनीपर्वविकृष्टकर्णया ।
उपाययेः वामकरस्थपत्रया रयेण वातायनजालमन्यया ॥५७॥

द्रुतप्रयाणश्लथकेशबन्धना सघर्मवारिस्रुति बिभ्रती मुखम् ।
श्रमातुरोरुद्वयमन्थराऽपरा ययौ सपत्न्याः परिशङ्कनीयताम् ॥५८॥

नितान्तमेकीकृतगण्डभागयोर्भृशाल्पवातायनयातमन्ययोः ।
सुभासुरं कुण्डलमेकमेव तद् मुखद्वयं मण्डयति स्म रामयोः ॥५९॥

५४ सुन्दर नितम्ब वाली स्त्रियों की, खिड़की की जाली से लगी हुई चञ्चल आँखों की पंक्ति ऐसी लगती थी जैसे कमल नाल के जाल के पास इधर से उधर फुर्ती से फिरती हुई मछलियों की पाँत हो ।

५५. एक स्त्री जिसके पैर का महावर अभी नहीं सूखा था, जब थोड़ी दूर दौड़ी तो उसके निज का रंग सीढ़ियों पर रगड़ खाने के कारण, उसके पैर के तलुओं में महावर के समान हो गया ।

५६. जब एक स्त्री देखने के रास्ते में झरोखे पर पहुँची तो वहाँ बहुत से राम का मुख देखने के लिये आकुल थे । तो इसके (घुसमुस कर) देखने के प्रयास में उसके गालों पर की गई चित्रकारी पसीने के कारण उसकी सखी के कपोल पर लग गई ।

५७ एक दूसरी स्त्री जो अपने को सँवारने में व्यस्त थी अपने को तर्जनी से खींच कर, बायें हाथ में पत्री लिये (जिससे वह अपने को सँवार रही थी) बड़ी तेजी से झरोखे की जाली की ओर भागी ।

५८ एक स्त्री को जिसके बाल का जूड़ा दौड़ कर चलने के कारण ढीला पड़ गया था मुख पर पसीना बहने लगा था और जो जाँघों के थक जाने से धीरे-धीरे चल रही थी, देख कर उसकी सौत शंका करने लगी ।

५९ एक छोटे से झरोखे से कपोलों को सटा कर देखने के कारण एक ही चमकते हुए कुण्डल ने दोनों स्त्रियों के मुखों को सजा दिया ।

विधाय काचित्प्रथमं तु लज्जया प्रियोपभुक्ताधरमर्धलक्षितम् ।
प्रयातिदूरं नृपतौ दिदृक्षया चकार वातायनवाह्यमाननम् ॥६०॥

अतिष्ठदेका कुचयुग्मसंपदा निरुध्य वातायनमुन्नतस्तनी ।
सखीजनो यत्कृशमध्यभागतः पताकिनीमन्तरमाप वीक्षितुम् ॥६१॥

निधाय काचित्तनयं तनूदरी प्रसह्य वातायनदेहलीतले ।
अकारयत्पङ्कजकोशकोमलं महीभुजे बालकमञ्जलिं बलात् ॥६२॥

नृपः सुमित्रातनयो वधूरिति प्रियाजने निर्दिशति स्वयं करैः ।
तलप्रभापाटलभागभागिनो नखांशुजाला अपि चेरुरम्बरे ॥६३॥

अशक्नुवन् वर्धयितुं नृपात्मजं वधूजनोऽधृष्टतया जयेन तम् ।
पदं विधत्स्वाविधवाजनोचिते पथीति पत्न्यै गिरिमाशिषं जगौ ॥६४॥

नरेन्द्रसेना विविशुः समुद्रगाः विवृद्धतोया इव यत्समन्ततः ।
महार्णवस्येव न तस्य तत्कृतौ बभूव पूरश्च न चातिरिक्तता ॥६५॥

६०. एक स्त्री पहिले तो अपने मुख को जिसके ओंठ को उसके प्रेमी ने काट लिया था लज्जा से आधा छिपाये थी, पर नृप को दूर जाते देख कर उसने अपने सम्पूर्ण मुख को झरोखे के बाहर कर दिया ।

६१. एक स्त्री अपने दोनों उठे हुए स्तनों से झरोखे को ढँक कर बैठी थी पर उसकी सखी ने उन दोनों स्तनों के बीच के पतले अन्तर से सेना देखने का मार्ग निकाल लिया ।

६२. एक पतले उदर वाली स्त्री ने अपने छोटे बच्चे को विशाल झरोखे की देहरी पर बिठा दिया और राजा को प्रणाम करने के लिये उसके कमल के गर्भ के समान कोमल हाथों की जबरदस्ती अँजुली बँधा दी ।

६३. 'ये राजा है, ये सुमित्रा के पुत्र हैं, यह वहू है,' जब प्रिय सखियां अपने हाथों से दिखा रही थीं तो उनके नखों से निकली हुई प्रभा, उनकी हथेलियों की लाल ज्योति से मिल कर आकाश में फिरने लगी ।

६४. विनयशीलता के कारण, राजकुमार की जयजयकार करने में असमर्थ, स्त्रियों ने उनकी पत्नी को यह कह कर आशीर्वाद दिया कि तुम सौभाग्यवती स्त्रियों के लिये (निर्दिष्ट) उचित मार्ग पर चलो ।

६५. राजा की सेना सब ओर से, नगर के भीतर घुसी, जैसे बाढ़ की नदियां समुद्र में जाती हैं । उससे समुद्र की भांति, वह नगर न तो भर गया और न वह उबल ही उठा ।

द्विधागत द्वारमुपेत्य तद्बल नृपाङ्गनस्योभयभागसश्रितम् ।
निवध्यमानाञ्जलि शासिता भुवो दृशानुगृह्णन् स विवेश मन्दिरम् ॥६६॥

देश सुधाजिति जित तनुजे तपोऽर्थी
विन्यस्य केकयपतिर्विपिन विविक्षु. ।
दूतेन तेन तनय दुहितुर्दिदृक्षु.
कालस्य कस्यचिदथेन्द्रसख ययाचे ॥ ६७ ॥

अथ स सुधाजिति स्वविषय सति नीतवति
प्रथितगुणे गुणप्रचयलाभरत भरतम् ।
इतरसुताहितप्रियशताहृतद्विरह–
प्रभवशुचोऽनयन्नयशुचिर्दिवसान् नृपति ॥ ६८ ॥

इति नवम. सर्ग. ।

६६ पृथ्वी के शासन करने वाले राजा तब राजमहल के प्राङ्गण के द्वार पर पहुँच कर, जहाँ पर दो भागो मे विभक्त सेना को जो उनके दोनो ओर करबद्ध खडी थी, अपनी दृष्टि से अनुगृहित करते हुए राजमहल मे घुसे ।

६७ केकय देश के अधिपति (अश्वपति) ने (बाहुबल से) जीते हुए देश को अपने पुत्र युधाजित को सौंप कर तप करने के लिये वन मे जाने की इच्छा प्रकट की और अपने पुत्र (युधाजित) को अपना दूत वना कर, इन्द्र के सखा (दशरथ) के पास अपने भाञ्जे को जिसे उन्होंने बहुत दिनो से नहीं देखा था, लिवा लाने के लिये भेजा ।

६८ जब यशस्वी युधाजित, सवगुण सम्पन्न, भरत को अपने देश ले गये तब, अकलुषित नीति वाले, राजा दशरथ के, भरत के विरह से जनित शोक को, उनके अन्य पुत्रो ने, उनकी प्रसन्नता के लिये, सैंकडो प्रिय वातें कर दूर कर दिया तव वे (दशरथ सुख पूर्वक) दिन व्यतीत करने लगे ।

नवाँ सर्ग समाप्त ।

दशमः सर्गः

ततो नयेन नयतो राज्यं राजीवचक्षुषः ।
तस्य शक्रसमानस्य समानामयुतं ययौ ॥ १ ॥

अथालक्ष्यत तद्देहे काठिन्यरहितत्वचि ।
पलितं विस्रसावल्लीपुष्पहास इव क्वचित् ॥ २ ॥

पलितच्छद्मना दोषा सर्वकालसमुन्नते ।
जरसा शिरसि स्पृष्टे न विषेहे महारथः ॥ ३ ॥

आरोप्यान्यतरेद्युः स्वमङ्कं नाथो भुवो बली ।
समासीनः समज्यायां ज्यायांसं सुतमब्रवीत् ॥ ४ ॥

मामियं प्राणनिर्याणवैजयन्ती पुरःसरी ।
रक्ताक्षवाहनादेशदूती संसेवते जरा ॥ ५ ॥

१. तब इन्द्र के समान, कमल नयन, उनको (महाराज दशरथ को) नीति कुशलता से राज्य करते, हजारों वर्ष बीत गये ।

विशेष—पृथिवीं शासतस्तस्य पाकशासन तेजसः ।
किञ्चिदूनमनूनर्द्धेः शरदामयुतं ययौ ।—रघुवंश, १०–१, कालिदास ।

२. तब (कालक्रमानुसार) उनके शरीर के ढीले चमड़े पर पुरानी लता के पुष्पहास के समान कहीं कहीं पर सफेद बाल दिखाई पड़ने लगे ।

३. वह महारथी जिसका सर सब काल में उन्नत रहता था, उसे, बुढ़ापा, सफेद बाल के बहाने छुए यह सह्य नहीं था ।

४. एक दिन जनसभा में, उस कर्तव्यनिष्ठ पृथ्वी के स्वामी ने अपने बड़े लड़के (राम) को अपनी गोद में बिठा कर कहा—

५. यह वृद्धावस्था, जो प्राण के ले जाने की पताका की अग्रगामी है और जो यमराज की, जिसके वाहन (भैंसे) की लाल-लाल आँखें हैं, उनकी आज्ञा का पालन करने की दूती है । मेरे पास आई है ।

जरसा तात नोऽङ्गानि स्पृहा कामेषु निर्विदा ।
शैथिल्यमुपनीतानि तुल्यमेव शनैः शनैः ॥ ६ ॥

कालेन शिरसि न्यस्तैः श्वेतकेशशिताङ्कुशैः ।
निवर्तन्ते हि कामेभ्यो भद्रा राघवदन्तिनः ॥ ७ ॥

उभे वक्षसि वंश्यानां तिष्ठतो रक्तकर्कशे ।
यौवने वनिता वल्कसन्ततिर्वार्धके च नः ॥ ८ ॥

न जिष्णुः कृतशस्त्रो यो यश्चाढ्यो यज्ञनिस्पृहः ।
कामी यश्च जरन्नेते क्षत्रवंशेषु कत्रयः ॥ ९ ॥

पादशेषेऽपि वैराग्यं न यस्य पुरुषायुषे ।
कीदृशी लक्ष्यते तस्य जनस्य हृदयालुता ॥१०॥

नातिविस्रसया भिन्ने देहे ना तप्यते तपः ।
इतरत्र चिरं जीर्णे तपस्याया हता गतिः ॥११॥

६ हे पुत्र ! वृद्धावस्था के कारण हमारे अङ्गों में, कामलिप्सा एवं उसके प्रति (आसक्त होने से) उदासीनता, दोनों ने मिल कर शिथिलता ला दी है।

७. समय आने पर रघुकुल के हाथी (राजे) सर पर सफेद बालों के तीक्ष्ण अंकुश (के आघात) से सासारिक सुख से मुँह मोड लेते हैं।

८ हमारे वंशजों के कडे वक्ष पर केवल दो ही चीजें रहती हैं। युवावस्था में पत्नी और बुढ़ापे में वल्कल के वस्त्रों की परम्परा।

९ अस्त्रों के रहते जिसे विजय करने की अभिलाषा न हो, लक्ष्मी सम्पन्न होते हुए जिसे यज्ञ करने की इच्छा न हो, वृद्धावस्था में जिसमें कामवासना हो, ये तीनों क्षत्रिय के लिये कुत्सित कहे गये हैं।

१० मनुष्य की पूरी आयु के चौथे भाग में जिसे वैराग्य नहीं होता उसमें किस प्रकार की हृदयालुता होती होगी।

११. मनुष्य तभी तक तपस्या कर सकता है जब तक उसका शरीर बहुत बुढ़ापे में जर्जर नहीं हो जाता। इसके प्रतिकूल शरीर के बहुत काल तक जीर्ण रहने से तपस्या का मार्ग बन्द हो जाता है।

मन्दशक्तीन्द्रियश्च्योतल्लालाविच्छुरिताधरः ।
अस्फुटस्मृतिचेष्टाभिर्बालव्रतमिवाचरन् ॥१२॥

मृणालवलयच्छेदतन्तुजालसमत्विषः ।
यौवनोदाहभस्मेव दधानः पलितच्छटाः ॥१३॥

जीविते जीर्णवयसः प्रत्याशा मे मुमूर्षतः ।
तिर्यग्विकम्पितैर्मूर्ध्नो नास्तीति प्रथयन्निव ॥१४॥

दन्तकुन्तशतैरुग्रैर्मृत्योः संकटमाननम् ।
प्रवेष्टुमिव बिभ्राणः कायसंकोचखर्वताम् ॥१५॥

बिभ्रदातङ्कनिर्मांसव्यक्तलक्ष्यसमुद्गमाः ।
वीचीरिव जरानद्याः पर्शुकास्थिपरम्पराः ॥१६॥

निर्दन्तत्वादसंस्कारं मोहन्मुष्टिन्धयो यथा ।
मिथोऽश्लिसितमस्पष्टं वदन्नस्वृक्कतं वचः ॥१७॥

१२. जिसकी इन्द्रियों की शक्ति मन्द पड़ गई है, जिसके अधर बहते हुए लार से लिप्त रहते हैं, जो क्षीण स्मृति-शक्ति के कारण बालकों की तरह आचरण करता है।

विशेष—श्लोक १२ से १९ तक 'कुलक' है। १९वें श्लोक के 'तपः कीदृक् चिघास्यति' के साथ प्रत्येक श्लोक का अन्वय होगा। इन आठ श्लोकों में बुढ़ापे का वर्णन है।
'कुलक' की व्याख्या—२—२।

१३. जिनके उलझे हुए कमल नाल के टुकड़ों की जाल की तरह चमकती हुई सफेद बालों की लटें,यौवन जल जाने पर (बची हुई) राख की तरह लगती हैं।

१४. "बुढ़ापे से जीर्ण हो जाने के कारण मेरे मरने का समय आ गया है, मेरे अधिक जीने की कोई आशा नहीं है" जो यह सब, इधर उधर सर हिलाने से जैसे घोषणा कर रहा हो।

१५. बरछी के समान सैकड़ों, बड़े-बड़े तीखे दांतों वाले यमराज के मुंह में, जैसे घुसने के लिये, जो शरीर झुक जाने के कारण नाटा हो गया है।

१६. जिसकी बीमारी से, मांस रहित शरीर हो जाने के, कारण उभरी हुई पसलियों की पंक्ति, वृद्धावस्था रूपी नदी की लहरियों के समान दिखाई पड़ती है।

१७. जो दांत न रह जाने के कारण, अशुद्ध, मोह से एक दूसरे में लिपटे हुए, अस्पष्ट और लार से युक्त, बिना कुछ पूछे हुए शब्द बोलता रहता है।

भिन्नभ्रुवमुदस्ताश्रां किञ्चित्कम्पितमस्तकाम् ।
नम्रो गद्गदितालापामनुनेतुं जरामिव ॥१८॥

वार्धक्ये धर्मतो मूढ. स्वदेहवहनेऽपि स. ।
विधित्सन्नप्यशक्तिग्रस्तप: कीदृग्विधास्यति ॥१९॥

यतो यातुस्तपस्यायामरण्ये वसतिं त्वया ।
मा जन्यश्रुप्रवर्षेण प्रत्यूहो मे विरागिण. ॥२०॥

अनुशिष्टि. प्रकृत्यैव भद्रे भवति कीदृशी ।
मनस. प्रीतये स्नेहकातरस्य निगद्यते ॥२१॥

औदासीन्यं यत . शत्रुरुदासीनश्च मित्रताम् ।
मित्र भक्तौ दृढत्वं च याति तद्वक्तुमर्हसि ॥२२॥

यो येन वाञ्छति ख्यातिं लोकसंग्रहकामिना ।
न तस्य निन्दनीयं तच्छत्रुतामप्यनिच्छता ॥२३॥

वृत्ति. शुभकरी साम्नो नये स्वपररञ्जनी ।
अय.शूलिकतेत्याहुर्नं ता निष्णातबुद्धय ॥२४॥

१८ जो भौहो को सकुचित कर, आंखो से पानी बहाता हुआ, थोडा कांपते हुए मस्तक से, नत हो कर जैसे वृद्धावस्था से अनुनय कर रहा हो ।

१९ वृद्धावस्था मे मनुष्य स्वभावत मूढ हो जाता है । अपना शरीर ही उठाना दूभर हो जाता है । इच्छा होते हुए भी, शक्ति न होने के कारण वह तप कैसे कर सकेगा ।

२० इसलिये तुम आंसू बहा कर, मुझ विरागी के, तपस्या करने के हेतु वन मे रहने के लिये जाने म बाधक न हो ।

२१ तुम्हारे ऐसे साधु प्रकृति व्यक्ति को हम क्या उपदेश दें ? केवल तुम्हारे स्नेह से कातर हो कर अपने मन की शान्ति के लिये कहते हैं ।

२२. जिससे शत्रु उदासीन एव तटस्थ हो जाता, उदासीन और तटस्थ मित्र हो जाता है और मित्र की भक्ति दृढ हो जाती है, उसे तो बतलाना उचित ही होगा ।

२३. जो मनुष्य सब लोगो को प्रसन्न करना चाहता है और उनको शत्रु नही बनाना चाहता, उसे चाहिये कि जिस से कोई मनुष्य ख्याति चाहता है उसकी निन्दा न करे ।

२४. राजनीत मे, अपने और दूसरे, दोनो को प्रसन्न करने वाले व्यवहार को जिसे साम कहते हैं, कल्याणकारी होता है । बुद्धिमान् नीतिज्ञ उसे लोहे के शूल की नीति नहीं कहते ।

जिघांसुभिरपि प्राज्ञैः प्रयोक्तुं साम साम्प्रतम् ।
रञ्जयन्ति मृगान् गीतैर्विभित्सन्तो मृगाविधः ॥२५॥

साम शाठ्यं जनो वेत्ति दानादत्यन्तवर्जितम् ।
तत् सामौशनसं साधु युक्तं दानस्य मात्रया ॥२६॥

मा दा रहितसम्मानं त्यक्त्वा सत्कारसामनी ।
वित्तं विश्राणितं नीतौ कृतिनो दूषितं विदुः ॥२७॥

शत्रुगृह्येण दुर्धर्षं शत्रुं नेता निहन्ति हि ।
घनेनेव स्फुलिङ्गार्चिःप्रावृतं पिण्डमायसम् ॥२८॥

उपजापहृतस्वामिस्नेहसीम्नि पराश्रयम् ।
मौले वाञ्छति मेदिन्याः पत्युः पातो न संशयः ॥२९॥

इतरोपायदुःसाध्ये चण्डदण्डो महीपतिः ।
अदुष्टायत्यसौ नीतेरश्नाति विपुलं फलम् ॥३०॥

२५. मारने की इच्छा रखते हुए भी, कुशल नीतिज्ञ साम का प्रयोग करता है। मृगों को मारने की इच्छा करने वाला शिकारी मृगों को गीत वाद्य से रिझा कर फँसाता है।

२६. लोगों को दान देकर शान्त करना अत्यन्त वर्जित एवं शठता पूर्ण कहा गया है। शुक्राचार्य का कहना है कि वह साम (शान्ति स्थापित करने की नीति) जिसमें थोड़ा सा दान दिया जाय, अच्छा है।

२७. असम्मान के साथ दान कभी न देना। राजनीति में नीतिज्ञों ने सत्कार एवं साम को छोड़ कर, दान देना बुरा कहा है।

२८. नेतृत्व करने वाला राजा, अपने शत्रु को, उसी के, ऊपर से मिले हुए, मित्रों के द्वारा मारता है। जैसे घन (भारी हथौड़ा) चिनगारियों से घिरे हुए, लोहे के टुकड़े को पीटता है।

२९. जब राजा के अत्यन्त स्नेहपात्र मंत्री के कानों में (विरुद्ध) बातें फूंक कर ऐसा कर देता है कि उसको उसका (शत्रु का) आश्रय लेना पड़े (अर्थात् उसे अपनी ओर मिला लेता है) तो राजा का पतन होता है, इसमें संशय नहीं है।

३०. जब सभी राजनीतिक साधन असफल हो जाते हैं तब राजा प्रचण्ड दण्डनीति का व्यवहार करता है और इस नीति का अनुसरण कर महान् फल का भागी होता है।

अव्याहतिं न शक्या गौर्विना दण्डेन रक्षितुम्।
इति प्रत्येति मुग्धोऽपि वल्लव. किमु राजकम् ॥३१॥

क्षोणीपति. पतत्याशु जराक्रान्त इव ध्रुवम्।
त्यक्तदण्ड. पद वाञ्छन्नगृहीतजगत्कर ॥३२॥

इत्थं युक्तिमुपायाना कुर्वाणस्य चतुष्टयीम्।
व्रजतीन्दुप्रभागौर परैरक्षय्यता यश. ॥३३॥

शूरं पुरुपसारज्ञं नीतौ पटुमलम्पटम्।
मम्यक् सरक्षिता. कोशैर्वर्द्धयन्ति नृप प्रजा ॥३४॥

नोच्चै. पद लम्भनीयो गुण्योऽप्यन्वयवर्जित. ।
रत्नाढ्यमपि कुर्वीतमूर्ध्निक पादमण्डनम् ॥३५॥

मूर्खो वर्ज्य कुलीनोऽपि मातङ्ग इव भूभुजा।
गुणै कैरप्यविख्यातो वशेनैव विभावित. ॥३६॥

३१ जब एक मूर्ख ग्वाला तक यह जानता है कि बिना डडे के गौओ की निर्बाध रक्षा नही हो सकती तब कितनी अधिक यह (दडनीति) राजाओं पर लागू होती है।

३२. वह पृथ्वीपति तो दण्डनीति का आश्रय नही लेता, (अर्थात् सेना को हटा देता है) और लोगो पर कर नही लगाता, वह अपने श्रेष्ठ पद की इच्छा रखते हुए भी, निश्चय ही, बुढापे से जर्जर मनुष्य की भांति तुरन्त गिर जाता है।

३३. जो राजा इस तरह से इन चारो प्रकार की नीतियों का व्यवहार करता है उसके चांदनी के समान उज्ज्वल यश का शत्रु नाश नही कर सकते।

३४. अच्छी तरह से रक्षित प्रजा, वीर पुरुष की शक्ति जानने वाले, राजनीति में चतुर और शुद्ध चरित्र राजा के कोश की अभिवृद्धि करती है।

३५. चाहे मनुष्य गुणी भी हो, पर यदि वह शुद्ध वश का नही है तो उसे कोई ऊँचा पद न देना चाहिये। कौन ऐसा (मूर्ख) होगा जो पैर के गहने को चाह वह रत्नो से भरा हुआ क्यों न हो, सर पर चढावेगा।

३६. ऐसे मूर्ख को, जिसमे और कोई गुण नही है, सिवाय इसके कि वह अपने वश से विख्यात है, कुलीन होते हुए भी राजा को चाहिए कि चाण्डाल की तरह उसका परित्याग कर दे।

तद्युक्तमुपधाशुद्धमन्वयेन गुणेन च ।
साचिव्यं लम्भयन् मौलं न प्रमाद्यति भूपतिः ॥३७॥

यस्मिन्कृत्यानुरोधेन सौहृदं वितनोति यः ।
स तं त्यजति कृत्यान्ते तीर्णतोय इव प्लवम् ॥३८॥

यौ तु निष्कारणामुक्तस्नेहपाशौ सुहृत्तरौ ।
मृत्युनैव तयोर्भेदो देहजीवितयोरिव ॥३९॥

दण्डद्रविणदुर्गैकसङ्गी रक्षति भूपतिः ।
आत्मानमेव सततं किमु रक्षत्यसौ जगत् ॥४०॥

इति प्रकृतिवर्गादिनिर्णयेषु नयाश्रयः ।
क्षपितान्तर्बहिः शत्रुःशाधि साधु वसुन्धराम् ॥४१॥

इत्थंवादनि राजेन्द्रे रामो मौनमधिश्रितः ।
ववर्ष हृदयं वाष्पैः शोकेन हृदयाविधा ॥४२॥

३७. शुद्ध वंश वाला, गुणों से युक्त, उपधा से परिशुद्ध (उपधा=ईमानदारी, राजभक्ति, निस्वार्थता, इन्द्रियनिग्रह, साहस) ऐसे श्रेष्ठ मंत्री को पाकर राजा अपने कर्त्तव्य में प्रमाद नहीं करता ।

३८. जो (राजा) किसी कार्य साधन करने के लिये किसी से मित्रता करता है और कार्य हो जाने पर उसे छोड़ देता है वह उस मनुष्य के समान है जो नदी पार कर लेने पर नौका छोड़ देता है ।

३९. परन्तु बिना किसी कारण के जिन्होंने मित्रता का बन्धन नहीं तोड़ा है, ऐसे दो श्रेष्ठ सुहृदों की मैत्री, शरीर और प्राण के समान केवल मृत्यु से छूटती है ।

४०. वह राजा जिसके पास सेना, धन और दुर्ग हैं वह निरन्तर अपनी (अर्थात् अपने राज्य की) रक्षा कर सकता है ।

४१. इस प्रकार अपनी प्रजा का वर्गीकरण का निश्चय कर, राजनीति का आश्रय लेकर अपने शरीर के भीतर और बाहर के शत्रुओं का दमन कर पृथ्वी का धर्मपूर्वक शासन करो ।

४२. जब राजाओं के अग्रणी (महाराज दशरथ) यह कह चुके तो राम ने, जो अब तक चुपचाप थे, तीव्र शोक से सन्तप्त अपने हृदय के उद्‌गार को आँसुओं से सींच कर व्यक्त किया ।

ततो वज्रासने भद्रं स निधाय निधि. श्रिय. ।
निर्भरीकृतसभार. प्राभिषिक्तो महीपति. ॥४३॥

रुरुधे पृष्ठसंविष्टग्रन्थिमन्थरयातया ।
स्मारयित्वा वरौ वीरं राज्य मन्थरया तया ॥४४॥

आदिदेश ततो वस्तु वनेषु वनजेक्षणम् ।
चतुर्दश दशग्रीवशत्रुमिन्द्रसम समा. ॥४५॥

अनिन्द्यजानिनाऽऽरूढो निर्जगाम रथ पुर ।
कृतप्रस्थानसौमित्रि स्फुरत्केतुरयो पुर. ॥४६॥

अश्रुभिर्हृदय सीता निजमेव न केवलम् ।
चकारार्द्रं जनस्यापि प्रेक्षितस्य वनाध्वनि ॥४७॥

जगन्नेत्राभिरामस्य रामस्य रहितागस. ।
शक्तस्य त्यागिन देव घृणयेवासवो जहु. ॥४८॥

४३ ४४ तब उस लक्ष्मी के भण्डार (महाराज दशरथ) ने बडे ठाट-बाट मे आयोजन कर राज्याभिषेक के लिये अपने सुन्दर पुत्र (राम) को सिंहासन पर बैठाया । उस समय, पीठ पर कूबड के कारण मथर गति से चलने वाली मथरा ने (कैकयी को दिये हुए) दो वरो का उस वीर को स्मरण दिला कर राज्यभिषेक को रोक दिया ।

४५ लाचार हो कर, इन्द्र के समान पराक्रमी (महाराज दशरथ) ने कमल के समान नेत्र वाले, रावण के शत्रु, अपने पुत्र को वन मे चौदह वर्ष रहने का आदेश दिया ।

४६. अपनी निष्कलुष पत्नी (सीता) के साथ, राम, फहराती हुई ध्वजा से युक्त रथ पर जिसमे सामने सुमित्रानन्दन (लक्ष्मण) बैठे थे, चढे और रथ सामने से आगे बढा ।

४७ सीता ने अश्रुओ से केवल अपना ही हृदय नही सीचा, बल्कि उन सब लोगो का भी जिन्होने उन्हे वन के मार्ग मे जाते हुए देखा ।

४८. ससार के नेत्रो को सुख देने वाले, मधुरभाषी, निरपराध, राम का त्याग करने वाले महाराज (दशरथ) को उनके प्राण वायु ने जैसे उन पर तरस खाकर छोड दिया ।

न्यवर्तत परित्यज्य क्षत्ताथ क्षत्रियत्रयम् ।
ऊढाश्रु वलितग्रीवं चिरं तेनैव वीक्षितः ॥४९॥

द्वित्राण्येव रथं त्यक्त्वा पदान्याधाय निस्सहा ।
येयमन्यत्कियद्दूरमिति पप्रच्छ मैथिली ॥५०॥

रामहस्तस्थशाखाग्रकल्पितातपवारणम् ।
प्रस्थानमभवत्तस्यास्तदग्रेसरलक्ष्मणम् ॥५१॥

इक्षुशाकटशालेयक्षेत्रानुत्तरकोशलान् ।
ययुर्भागीरथीतीरं पश्यन्तः सोत्पलाम्भसः ॥५२॥

अथानासाद्य कालिन्दीमुल्लङ्घ्य सरितं दिवः ।
भारद्वाजाश्रमं पुण्यं चित्रकूटस्य चाध्वनः ॥५४॥

चिह्नं नदनदीदेशैरुक्त्वा वृक्षक्ष्माधरैः ।
राजन्यभोगिने याते राघवोऽपि गुहे गृहम् ॥५४॥

सपत्न्यौ सरितां पत्युः सुमित्रात्मजधीवरैः ।
चित्रकूटमकूटज्ञः प्रीतः प्रोत्तारितो ययौ ॥५५॥

४९. तब सारथी ने उन तीनों क्षत्रियों को रथ पर से उतार दिया। वे तीनों आँसू बहाते हुए पीछे की ओर गर्दन कर (जाते हुए रथ को) देखते रहे और वह लौट गया।

५०. सीता रथ को छोड़ कर दो ही तीन पग चली थीं कि अशक्त होने के कारण उन्होंने पूछा कि अब और कितनी दूर चलना है?

५१. उसके (सीता के) आगे लक्ष्मण चल रहे थे। और उसे (सीता को) धूप से बचाने के लिये, शाखाओं की फुनगियों से बनाये हुए छाते को लगाये पीछे राम चल रहे थे। इस प्रकार सीता चलीं।

५२. तब वे कमलों से भरे तड़ाग से सुशोभित, ईख और शालि चावल के खेतों से युक्त उत्तर कोशल को देखते हुए भागीरथी के तट पर आये।

५३. बिना यमुना की ओर गये सुर सरिता (गङ्गा) को पार कर, पुनीत भारद्वाज आश्रम को देखते हुए, जब गुह उन्हें, नद और नदियों के प्रदेशों एवं वृक्षों और पहाड़ों के चिन्हों से चित्रकूट का मार्ग, राज्य भोगने के योग्य, राम को बता कर घर चला गया और जब मल्लाहों के सहित लक्ष्मण ने नदियों के पति (समुद्र) की दो पत्नियां (नदियों) को पार करा दिया तो गल्प के जानने वाले राम भी प्रसन्न हो कर चित्रकूट को चले।

विशेष—श्लोक ५३ से ५५ तक 'विशेषक' है। विशेषक='त्रिभिः श्लोकैर्विशेषकम्'

ततः सीतामुखाम्भोजभ्रमरत्वे कृतस्पृहम् ।
नष्टैकदृष्टिमस्त्रेण बलिपुष्ठ चकार स. ॥५६॥

तत. प्रतीक संघाटो वीर' केकयवंश्यज. ।
विभ्रच्छोकद्विगुणित श्रम रामाश्रमं ययौ ॥५७॥

राजघो निर्घृण. कश्चित् सप्राप्त इति साधवे ।
कथ्यतामिति तद्वाक्यं द्वारि शुश्राव राघव. ॥५८॥

अनुज्ञातोऽनुजस्तेन पर्णशालामथाविशत् ।
द्वारबन्धातिरिक्तेन किञ्चित्तिर्यक्कृतोरसा ॥५९॥

भरत. शोकसन्तप्तो राममादाय पादयो. ।
आर्येत्युक्त्वा सकृद्दीन. पुनर्नोवाच किञ्चन ॥६०॥

तत' श्रुत्वा गुरोरन्त स दु खेन हृदिस्पृशा ।
साभिषेकमिवाश्रेण चक्रे कर्मौर्ध्वदेहिकम् ॥६१॥

५६ *तब उन्होने (राम ने) सीता के कमल के समान मुख पर भ्रमर के समान लुब्ध कौए* की आँख बाण से फोड डाली ।

५७ तब ब्रह्मर्षियो और मन्त्रियो को साथ लेकर केकय वंश के वीर (भरत) जिनका श्रम, शोक के कारण दुगना हो गया था, राम के आश्रम मे आये ।

५८ तब राम ने किसी के कहे गये ये वाक्य सुने "जाकर उन साधु (राम) से सूचित कर दो कि राजा का मारने वाला एक नृशंस व्यक्ति आपके दरवाज पर आया है ।"

५९. तब उनसे अनुमति पाकर राम के छोटे भाई (भरत) अपना वक्ष दरवाजे से अधिक चौडा होने के कारण, तनिक तिरछे होकर कुटी मे घुसे ।

६० शोक से व्यथित भरत ने, राम के चरणो को पकड कर केवल एक बार 'आर्य' कहा और कातर होने के कारण और कुछ न बोल सके ।

विशेष—दु खाभितप्तो भरतो राजपुत्रो महाबल. ।
उक्त्वार्येति सकृद्दीन पुनर्नोवाच किञ्चन ॥
—अयोध्याकाण्ड, ९९—३९, वाल्मीकि ।

६१ तब पिता की मृत्यु का समाचार सुन कर राम ने हृदय विदारक शोक से आंसू बहा कर जैसे उनकी अन्त्येष्टि क्रिया कर दी हो ।

शपमानामथ स्वस्मै कैकेयीं भूतिनिस्पृहाम् ।
गर्हन्तं भरतं वक्तुं रामस्तत्र प्रचक्रमे ॥६२॥

न स्मरामि गुरोराज्ञां ज्ञात्वा जातु विलङ्घिताम् ।
न सदृक्षं हि नो हन्तुं तातस्य समयं यतः ॥६३॥

समयस्य गुरोरिन्द्रलोकस्थस्य विलङ्घने ।
बुद्धिश्च निर्विशङ्कैवं पुनर्मा जनि तावकी ॥६४॥

पूजनीया च ते देवी पत्युः सत्यानुपालिनी ।
दूषयिष्यति पूज्येषु पूजावैमुख्यमायतिम् ॥६५॥

स्वयं कृतेन दोषेण येन यो लज्जते गुरुः ।
तेन तत्सन्निधौ तद्वानन्योऽपि न च निन्द्यताम् ॥६६॥

इति व्याहृत्य नम्राय ददौ दीनाय पादुके ।
धर्मे मर्माविधि मरौ वारि वारीष्यते यथा ॥६७॥

६२. (निराश होने कारण) अपने अभ्युदय के प्रति कोई इच्छा न होने से जो स्वयं अपने को कोस रही थी, ऐसी कैकेयी को भला-बुरा कहते हुए भरत से राम ने कहना आरम्भ किया—

६३. मुझे याद नहीं पड़ता कि मैंने कभी पिता की आज्ञा जान-बूझ कर उसका उल्लंघन किया हो। यह किसी प्रकार उचित नहीं है कि पिता के दिये हुए वचन की अवहेलना की जाय।

६४. इन्द्रलोक में रहने (अर्थात् मरे हुए) पिता के दिये हुये वचन को निःशंक हो कर तोड़ने का ख्याल अब कदापि न करना चाहिए।

विशेष—पिता तो मर गये, अब उनके वचन को तोड़ने में कोई हानि नहीं है ऐसा न सोचना चाहिए, यह भाव है।

६५. अपने पति के सत्य का पालन करने वाली (कैकेयी) तुम्हारी श्रद्धा का पात्र है। जो पूजनीय है उसकी पूजा से मुंह फेरने में अमङ्गल होगा।

विशेष—'प्रतिबध्नाति हि श्रेयः पूज्य पूज्य व्यतिक्रमः'—रघुवंश—१—७९, कालिदास।

६६. जब स्वयं किसी गुरुजन को अपने किये हुए काम से लज्जा होती है तो उसके सामने वैसा ही दोषयुक्त काम करने वाले किसी अन्य पुरुष की भी निन्दा न करनी चाहिये।

६७. इतना कह कर उन्होंने सामने कातर नतमस्तक भाई को अपनी दोनों खड़ाऊँ देदी जैसे मरुभूमि की मर्मभेदी धूप में पानी माँगने वाले को कोई पानी दे दे।

द्विधाकारमिव ज्यायान् भरत हृदय चिरम् ।
दर्शयन्त परिष्वङ्गप्राप्तसान्त्वं व्यसर्जयत् ॥६८॥

ततस्तं त्यज्यता शैल विराधो रावणारिणा ।
दृष्टस्तनूनपादर्चिर्वभ्रु पञ्चवटीपथे ॥६९॥

हरन्तमथ वैदेही विनिहत्य निशाचरम् ।
भविष्यदिव सक्षिप्य कथाया वस्त्वदर्शयत् ॥७०॥

पञ्चवट्याश्रमे रम्ये रङ्गत्सारङ्गशावके ।
वृतेऽथ ववृते तस्य वासो वासववर्चस. ॥७१॥

अथ राम वृषस्यन्ती प्रपेदे नैकसीसुता ।
इव चिन्ता दरिद्रस्य स्थूललक्ष नरेश्वरम् ॥७२॥

चकर्त नासिका क्रुद्ध. सीताविद्रवणादथ ।
लक्ष्मणस्तन्मुखाम्भोज कर्णिका कृपया समम् ॥७३॥

भ्रातृद्वये तदाहूते क्षुरप्रप्रकर बलम् ।
शस्त्रैर्वर्षयति क्षिप्रमपावरिष्ट राघवौ ॥७४॥

६८ तब बड़े भाई (राम) ने, भरत को आलिङ्गन कर उनके बड़ी देर से द्विधा म पड़े हुए मन को शान्ति देते हुए उन्हें विदा कर दिया ।

६९ जब वे (राम) उस पर्वत (प्रस्रवण) को छोड कर आगे बढे तो रावण के शत्रु (राम) ने पञ्चवटी के रास्ते मे अग्नि की ज्वाला के समान शरीरधारी विराध नामक (राक्षस) को देखा ।

७० तब उन्होने उस निशाचर को जो वैदेही को लिये जा रहा था, मार कर, आगे होने वाली घटना को सक्षेप मे दिखला दिया ।

७१ तब वे (राम) जो इन्द्र के समान पराक्रमी थे पञ्चवटी के एक रमणीक आश्रम म रहने लगे, जो चीतल के द्रुतगामी बच्चो से भरा था ।

७२ जिस प्रकार एक दरिद्र की चिन्ता (अर्थचिन्ता) दानी राजा के पास जाती है उसी प्रकार काम की भूखी, नैकसी की पुत्री, (सूर्पणखा) राम के पास गई ।

७३. (उसे देख कर) सीता के भयभीत हो जाने से, उस पर तरस खाकर लक्ष्मण ने उसकी नाक को जो उसके कमल के समान मुख पर ठिलके के समान थी, काट डाला ।

७४ उसके (सूर्पणखा के) गोहार पर आये हुए उसके दोनो भाई (खर और दूषण) ने छुरे के समान तीक्ष्ण बाणो की उन पर वर्षा की और उनकी सेना ने राम और लक्ष्मण को तुरन्त घेर लिया ।

अदीवपत गृध्राणां आत्मैकधनुर्धरः ।
सत्यव्रतोऽसृजो धारां खरदूषणयोर्युधि ॥७५॥

दम्भाजीवकमुत्तुङ्गजटामण्डितमस्तकम् ।
कश्चिन्मस्करिणं सीता ददर्शाश्रममागतम् ॥७६॥

मृगव्याहृतराजन्यो वर्णलिङ्गी निशाचरः ।
उग्ररूपो निजं घोरं रूपं प्रादुरवीभवत् ॥७७॥

दशानामस्य शिरसा मुग्रतेजस्कमाश्रयम् ।
पश्यन्ती मैथिली भीत्या रूपवेयमकम्पत ॥७८॥

प्रदीपमिव तं द्रष्टुं नात्यासन्नं शशाक सा ।
असोढमरुतं तेजः परिष्कृतदशाननम् ॥७९॥

रामारत्नमसौ रामनामाक्रन्ददिदं वचः ।
जगाद जगदीशस्य क्षेपदुष्टं क्षपाचरः ॥८०॥

७५. तब अपने व्रत के पक्के, धनुर्धरों में श्रेष्ठ, राम ने खर और दूषण की रुधिर धारा को गिद्धों को पिलाया, अर्थात् उन्हें मार डाला और उनके रुधिर को गिद्धों ने खूब छक कर पिया।

७६. तब सीता ने एक भिक्षुक को, जिसका मस्तक लम्बी जटा से परिवेष्टित, और दम्भ ही जिसके जीविका का साधन था, आश्रम में आया हुआ देखा।

७७. उस निशाचर ने, जिसने द्विज का रूप बना रखा था, और जिसने अपनी कपट चाल से राम को मृग के पीछे अन्यत्र भेज दिया था, अपने भयङ्कर रूप को धारण किया।

७८. मैथिली उसके भयङ्कर तेज युक्त रूप को जिसमें दस सिर थे, देख कर भय से थर-थर कांपने लगी।

७९. उसके (रावण के) बहुत निकट आ जाने से, एवं उसके दसों सिरों के चारों ओर भयङ्कर प्रकाश होने से, उन देवताओं को न सह सकने वाले (रावण) को प्रदीप के समान न देख सकी।

विशेष—'असोढ मारुतं'; रावण के पक्ष में=जो देवताओं को सहन नहीं कर सकता था। प्रदीप के सम्बन्ध में=जो पवन को नहीं सहन कर सकता था (२) 'तेजः परिष्कृत दशाननं'; रावण के सम्बन्ध में=जिसके दसों सिर तेज से व्याप्त थे। प्रदीप के सम्बन्ध में=जिसकी बत्ती की शिखा प्रकाश से परिवेष्टित थी।

८०. वह निशाचर, राम का नाम लेकर कलपती हुई, स्त्रियों में रत्न सीता से, संसार के स्वामी (राम) के प्रति बुरे शब्द कहते हुए यह वचन बोला।

सारङ्गाक्षि शरस्तस्य केवल तु खरे खर. ।
दूषणे दूषणो भद्रे न त्रिलोक्या विभो रणे ॥८१॥

लब्धामया वलनिरीक्षण दोहदेन
द्वारे स्थिता निजपुरप्रवरस्य सिद्धा ।

दृष्टा मया सुरपुरं व्रजता कटाक्षै-
रैरावणद्विपगतेन सहासगर्वम् ॥८२॥

अन्यायितोऽहमहमप्यनुवृत्य सेवा
निर्जीविको मम हृत भवन पिशाचै. ।

इत्युब्रदन् सुरगण. सह लोकपालै.
राजाङ्गने भ्रमति मत्प्रतिहारमेत्य ॥८३॥

स्पष्टोत्पिष्टवृहन्निविष्टपवल वाहु बहुक्षोभित-
क्ष्मापातालतल तलेन दलितश्वेताचलेन्द्र मम ।
नो वाञ्छत्युपधानभूतमवले धन्या सुरस्त्रीपु का
तल्पेऽनल्पविकल्पजल्पमधुरक्रीडारसे सेवितुम् ॥८४॥

८१ हे मृगनयनी ! उसके (राम के) वाण युद्ध मे केवल खर (राक्षस) के लिये खर अर्थात् तीक्ष्ण है और दूपण (राक्षस) के लिये दूपण अर्थात् मारने वाले हैं । परन्तु मुझ त्रैलोक्य के स्वामी के लिये वे ऐसे नही हैं ।

८२. भयभीत सिद्ध लोग, मेरे वल का निरीक्षण करने की प्रवल इच्छा से अपने अपने घरो के द्वार पर आड में खडे थे, तव मैंने, इन्द्र के हाथी ऐरावत पर चढ कर सुरपुर मे जाते समय बडे गर्व से उनकी ओर घृणा भरी तिरछी चितवन से देखा था ।

८३ 'मेरे साथ अन्याय किया गया है, मुझसे वेगार सेवा ली जाती है अत मेरी जीविका का कोई साधन नही रह गया, मेरे मकान को पिचाशो ने लूट लिया है। इस प्रकार का रोना रोते हुए, देवता लोग, लोकपालो के साथ, मेरे फाटक पर आकर महल के प्रागण मे घूमते फिरते हैं ।

८४ हे अवले ! (सीते) स्वर्ग की अप्सराओ म कौन ऐसी भाग्यवती है जो मेरे ऐसे व्यक्ति की जिसने देवताओ की सेना को अच्छी तरह से चूर-चूर कर डाला है जिसने पृथिवी एव पाताल के तल को झकझोर दिया है और जिसने हिमगिरि (कैलाश) को चीर डाला है, ऐसे मेरे पलग पर जहा क्रीडा के समय निर्बाध गति से प्रेमालाप होना रहता है, मेरे बाहुओ की तकिया लगाने की इच्छुक न रहती हो, अर्थात् सभी इच्छुक रहती है ।

उर्वश्या परिवीजनेषु मधुरं नृत्यं यथा लीलया
तन्वन्त्या जितशारदेन्दुकिरणच्छायोल्लसच्चामरम् ।
आसज्य स्वयमङ्गदस्य शिखरे निर्मोकयन्त्या पुनः
स्नेहस्विन्नविवेपमानकरया सोऽयं भुजः स्पृश्यते ॥८५॥

एकस्मिञ्छयने मया मयसुतामालिङ्ग्य निद्रालया-
मुन्निद्रं शयितेन मच्चरणयोः संवाहनव्यापृता ।
पादाग्रेण तिलोत्तमा स्तनतटे सस्नेहमापिडिता
हर्षावेशसमर्पितानि पुलकान्यद्यापि नो मुञ्चति ॥८६॥

अक्षान् दीव्यति दानवेन्द्र सुतया सार्धं स्मरार्त्ते मयि-
क्रीडायत्नपरिश्रमः पण इति श्रुत्वा गता सह्यताम् ।
मत्तो मन्मथवस्तुसंहितविधौ वृद्धौ विवृद्धस्पृहा
द्यूतं कारयति प्रयोगचतुरा रम्भोरु रम्भाह्वया ॥८७॥

सर्वस्वर्गवराङ्गनाधृतिहृति प्रेमप्रधानं मयि-
त्रैलोक्याधिपतौ निधाय हृदयं याया जगत्पूज्यताम् ।
नारीमाश्रय संपदेव नयति श्रेयस्करीमुन्नति
मान्या मानिनि कस्य धूर्जटिजटाजुष्टा न जह्नोः सुता ॥८८॥

८५. उर्वशी, जिसने अपने बाजूबंद पहिले हाथ के ऊपर रख लिये थे, और बाद में उतार कर रख दिया था, ऐसा पंखा लेकर, जो शरद् ऋतु के चन्द्र किरणों की छाया से अधिक चमचमाता था, बड़े हावभाव से, नाचती-सी पंखे को झलती हुई कामोद्वेग से पसीजे और काँपते हुए हाथ से मेरे बाहु को छू देती है ।

८६. तिलोत्तमा, जो मेरे चरणों को उस समय दबाने में व्यस्त थी, जब एक पलंग पर मैं निद्रा में निमग्न, मय दानव की पुत्री (मन्दोदरी) के आलिङ्गन पाश में जकड़ा हुआ पड़ा था और अपने चरण के अग्रभाग से उसके (तिलोत्तमा के) स्तन के किनारे पर कुरेद रहा था । आनन्दातिरेक से जनित उसका यह पुलक अब तक उसे नहीं छोड़ता ।

८७. हे कदली के समान जांघ वाली सीते ! (एक दिन) जब मैं मन्दोदरी के साथ जुआ खेल रहा था तो इस बाजी को सुन कर कि (जीतने वाले को) सम्भोग का श्रम उठाना पड़ेगा रम्भा को सहन न हो सका । वह मुझ पर बहुत कामासक्त थी और कामकेलि के साधनों में बड़ी चतुर एवं जुआ खेलने में दक्ष थी, उसने मेरे साथ जुआ खेला ।

८८. मेरे में, जिसने स्वर्ग की सभी सुन्दर शरीर वाली स्त्रियों का धैर्य हर लिया है, और जो तीनों लोक का स्वामी है, अपने प्रेम-प्रधान हृदय को लगा कर, सम्पूर्ण जगत् की वन्दनीया बनो । स्त्रियों की मङ्गलकारिणी समुन्नति उसके आश्रयदाता के उत्कर्ष पर निर्भर रहती है । हे मानिनि ! कौन ऐसा है जो शङ्कर के जटाजूट का आश्रय लेने वाली, जह्नु की पुत्री (गङ्गा) का मान नहीं करता ?

हस्तौ पल्लवकोमलौ करयुगेनादाय वास. शनै-
रन्येन व्यपनीय पाणियुगलेनामृश्य काञ्च्यास्पदम्।
मय्यालिङ्गति बाहुभि. सुबहुभि शेषैर्विलक्षस्मित-
ज्योत्स्नासेकमनोहराधरपुट वक्त्रं स्वयं दास्यसि ॥८९॥

इत्युक्त्वाऽऽदाय रक्ष पतिरवनिसुतामुत्प्लुतो मीनजालै-
श्चित्र व्योमाम्बुराशि घनपवनरयास्फालगुञ्जद्घनोर्मिम्।
पोतेनेव प्रकम्पध्वनिनिवहमसौ विभ्रता पुष्पकेण
स्फूर्जत्सीतेन यात्रामनुपहतजवव्यापिनीमाललम्बे ॥९०॥

इति दशम. सर्ग.।

८९. जब तुम्हारे नव पल्लव के समान सुकोमल हाथो को अपने दो हाथो से पकड कर और दूसरे दो हाथो से तुम्हारे वस्त्र धीरे धीरे उतार कर, अपने और सब हाथो से तुम्हारे कटि प्रदेश को छुऊँगा और तुम्हे आलिङ्गन करूँगा तो तुम स्वय अपना मुख, जिसमे मुस्कराने की आभा के बिखर जाने से मनोहर, अधर पुट हैं, (चुम्बन के लिये) मुझे दे दोगी।

९०. इतना कह कर, राक्षसो का स्वामी (रावण), पृथिवी की पुत्री (सीता) को उठा कर, मछलियों की जाल की तरह चित्रित, समुद्र रूपी आकाश मे उड गया जहाँ तेज वायु के थपेडों से लहरों के समान बादल की पक्ति, गरज रही थी। और उसे (सीता को) जहाज के समान, पुष्पक विमान मे बिठा कर, जिसमे कपती हुई ध्वनि की हिलोरें झलझला रही थी, बडी तेज और अबाधगति से यात्रा करने लगा।

दसवाँ सर्ग समाप्त।

एकादशः सर्गः

अथ विकम्पितपक्षसमीरणप्रसभनर्तितदीधितिमालिना ।
विदिततद्गमनेन जटायुना सरभसं समराय समुत्प्लुतम् ॥१॥

जनकराजसुतामपकर्षतः सुररिपोः पथि गृध्रसमागमः ।
अवनिमित्तमवेकयदस्य तं नृपवधूहरणप्रभवं वधम् ॥२॥

पतगपक्षपराहतनर्त्तितस्वभवनोदरमध्यपरिच्युतः ।
उभयभित्तिविताड़ितमस्तक श्चिरमकम्पत विश्रवसः सुतः ॥३॥

विहगनाथवितीर्णपराभव प्रभवकोपविकम्पितचेतसा ।
सपदि पङ्क्तिमुखेन समाददे शरवितानकृतावरणो रणः ॥४॥

क्षणमतिष्ठदुपाहितमण्डलस्थितिमनोहरविग्रहबन्धुरः ।
विपुलपक्षपुटद्वयकल्पितप्रहरणावरणः स विहङ्गमः ॥५॥

१. जब सीता के अपहरण का हाल पता चला तो जटायु, जिसके फड़फड़ाते हुए पंखों की हवा से उसकी शारीरिक शक्ति सहसा (उसके चारो ओर) नाचती हुई मालाकार हो गई थी, युद्ध के लिए उछल पड़ा ।

२. राजा जनक की पुत्री के अपहरण करने वाले, देवताओं के शत्रु (रावण) के मार्ग में, गृध्रराज (जटायु) के आगमन ने, (जैसे) राजवधू (सीता) के हरण करने से जनित, उसके वध की अमङ्गल-सूचक घोषणा की ।

३. विश्रवा का पुत्र (रावण) जटायु के आक्रमण से भौंड़िया कर अपने रथ के मध्य भाग में गिर पड़ा और (अपने) मस्तक के दोनों ओर आघात से, देर तक कांपता रहा ।

४. विहङ्गों के स्वामी, (जटायु) से पराभूत होने से, जिसका हृदय मारे गुस्से के कांप रहा था, ऐसे रावण ने, फुर्ती से, अपने शरीर को बाणों के वितान से ढँक कर, अपने मुखों की पंक्ति से युद्ध किया ।

५. क्षण भर के लिये, वह जटायु, जिसका शरीर, मण्डल के बीच में स्थित होने से मनोरम एवं सुन्दर लगता था, दोनों भारी पंखों के सम्पुट रूप शस्त्र से अपने को ढँक कर खड़ा रहा ।

पथि विहङ्गनिशाचरशासिनो. प्रववृते धृतिसंहरणो रण' ।
विधुतपक्षधनुर्गुणसहति ध्वनिनिनादितभूधरकन्दर' ॥६॥

अथ खगेश्वरपक्षसमीरणप्रबलवेगनिर्वर्त्तितपातितै ।
अपि निजैरतिवेगिभिरायुधैर्द्दृढमहन्यत सयति रावण. ॥७॥

प्रतिदिगन्तरदृष्टतनु. समं दशमुख परित' स विहङ्गम. ।
नभसि मण्डलयन्नतिरंहसा स्ववपुषा परिवेषमिवादधे ॥८॥

गगनसागरभोगधराङ्गना विसलता हरिपादसरोरुह. ।
पतगपक्षसमीरणरंहसा सुरसरिद् विससर्प दिशो दश ॥९॥

खगपतिर्निजपक्षसमूहितो पहितवारिदरुद्धदृशो मुहु. ।
शिरसि चञ्चुमदृष्टसमागमो दशमुखस्य सवेगमपातयत् ॥१०॥

शिरसि त प्रणिहत्य स मुष्टिना भुवि निपातयति स्म निशाचर. ।
द्विजपति' पुनरेव स वेगवानुपरि कन्दुकवद् ददृशे रिपो. ॥११॥

९ मार्ग मे विहङ्गराज (जटायु) और राक्षसराज (रावण) के बीच, धैर्य वाला युद्ध हुआ ।(जटायु के) पख और (रावण के) धनुष की प्रत्यञ्चा से निकले हुए सम्मिलित निर्घोष से पर्वत की गुफायें प्रतिध्वनित हो गईं ।

७. तब रावण ने अपने ही द्रुतगामी बाणों से, जिन्हे जटायु के पख से, वेग से निकले हुए वायु ने लौटा कर गिरा दिया था, युद्ध मे बडी दृढता से आघात किया ।

८. जटायु ने, जिसका शरीर, समान रूप से दिशाओ के अन्त तक, दिखलाई नही पडता था, रावण के चारो ओर, आकाश मे बडे वेग से, चक्कर काटते हुए, अपने शरीर का घेरा डाल दिया ।

९ आकाशरूपी सागर का उपभोग करने वाली स्त्री, जो शङ्कर के चरण कमल की नाल थी, ऐसी सुर-नदी, जटायु के पखो से निकली हुई हवा से दशो दिशाओ मे सरक गईं ।

१०. तब जटायु अपने पखो के सिकोडने से बादलो को समेट कर अदृश्य हो गया । और इस प्रकार अदृष्ट होने से पास आकर, रावण के सिर पर, बार बार चोच से, बडे वेग से आघात करने लगा ।

११ तब निशाचर (रावण) ने उसे (जटायु को) घूंसा मार कर पृथ्वी पर गिरा दिया । परन्तु वह फुर्तीला पक्षिराज, फिर शत्रु के सिर पर गेंद की तरह दिखलाई पडा ।

नख शिखाशितकुन्तनिपातनस्फुटितरत्नपिशङ्गितदिङ्मुखम् ।
रिपुशिरश्चरणेन रणे रणन्मुकुटकोटि जघान विहङ्गमः ॥१२॥

अथ स कुन्तमुखेन शकुन्तपं तमभयः समरे समदारयत् ।
द्विजवरोऽपि ततो नखरैः खरैरपघनं घनमस्य जघान सः ॥१३॥

हृदि समर्पितकुन्तमुखं मुहुर्विततपक्षनिरुद्धनभस्तलम् ।
खगपतेः समरोचत तद्वपुर्निहितदण्डमिवातपवारणम् ॥१४॥

युधि रयादपहाय तदायुधं चपलतुण्डविखण्डितसण्डनम् ।
विबुधशत्रुशिरस्तरसा रसन्नभिनिपत्य जघान पतत्पतिः ॥१५॥

नखशिखाङ्कुशकोटिषु मस्तके निपतितासु दशाननदिग्गजः ।
अभिननाद भृशं दशभिर्मुखैः प्रबलनादनिनादितदिङ्मुखः ॥१६॥

नखमुखोपहितायुधकर्म्मणस्तनुतनुच्छदसन्ततिवर्म्मणः ।
रणमवेक्ष्य विहङ्गपतेर्जगुः सपदि साधुवचः सुरकिन्नराः ॥१७॥

१२. भाले के समान पैने नख और शिखा की चोट से दिशायें, फूटे माणिक्य की तरह पिशङ्ग हो गई । उस युद्ध में नाद करते हुए पक्षिराज ने, शत्रु के सिर पर, किरीट के किनारे आघात किया ।

१३. उसने (रावण ने) युद्ध में भाले की नोक से उस पक्षिराज को छेद दिया । तब पक्षियों में श्रेष्ठ (जटायु) ने भी उसके (रावण के) दृढ़ शरीर पर, मेघों को विदीर्ण करते हुए, अपने नखों से गहरा आघात किया ।

१४. पक्षिराज (जटायु) के हृदय में भाले की नोक के बार-बार घुस जाने से, उसका शरीर, जिसके फैले हुए पंख आकाश को घेरे थे, ऐसा शोभायमान हुआ जैसे दंड लगा हुआ छाता हो ।

१५. युद्ध में बड़े वेग से उसके शस्त्र को छीन कर, पक्षियों के स्वामी (जटायु) ने (अपनी) चोंच से, उसके (रावण के) शृङ्गार को तहस-नहस कर दिया । और नाद करते हुए, फुर्ती से उस देवताओं के शत्रु (रावण) के सिर पर टूट कर, आघात किया ।

१६. अंकुश के समान, नख और शिखा की नोक, सिर पर पड़ने से, उस दिग्गज रावण ने (अपने) दसों मुखों से ऐसा भयङ्कर नाद किया कि उस घोर नाद से दिशायें गूंज उठीं ।

१७. नख और चोंच से ही, शस्त्र का कार्य करते हुए, शरीर ढंकने वाले पंखों से ही, कवचों की क़तार बनाये, पक्षिराज (जटायु) को युद्ध करते देख, देवता और किन्नर तुरन्त साधुवाद करने लगे ।

टिप्पणी—साधु साध्विति भूतानि गृध्रराजमपूजयन् । अरण्यकाण्ड, ५१-२१, वाल्मीकि ।

अथ विदर्शितपूर्वपुरन्दरद्विरदकुम्भविपाटनपाटवम् ।
असिमसावसितोत्पलसप्रभं सुररिपुः समराय समाददे ॥१८॥

सपदि मातुमिवास्य दिगन्तरं विततपक्षयुगस्य पतत्रिणः ।
पृथुवितानमिवामरवर्त्मनो विपुलमसपुटं निजघान स ॥१९॥

द्विजवरस्य तनुः कृतवेदिनः सुरवधूनयनोदकसन्ततिः ।
कुसुमवृष्टिरिति त्रितयं ततः समपतत्सममेव नभस्तलात् ॥२०॥

विधिवशेन वशी समुपस्थितो निजगदे शिथिलीभवदुष्मणा ।
रघुपतिः प्रभुणाथ पतत्रिणा दशमुखेन कलत्रमपोहितम् ॥२१॥

समरशक्तिरियं ममतावती दशमुखो हरति स्म वधूमिति ।
दशरथाय यथा गदितुं स्वयं द्विजवरोऽधिरुरोह सुरालयम् ॥२२॥

नृपसुतः पवनात्मजलोभितः फलितवृक्षवनं वनजेक्षणः ।
अगमदृष्यपदादिमगोत्तमं सपदि मूकममूकविहङ्गमम् ॥२३॥

१८. जो पहिले ही इन्द्र के गज के कपोलो के विदारण मे पटुता प्रदर्शित कर चुकी थी, उस नील कमल के समान प्रभा वाली तलवार को उस देवताओं के शत्रु (रावण) ने युद्ध के लिये ग्रहण किया।

१९. तब उसने (रावण ने) जटायु के फैले हुए दोनो पखो पर, जो ऐसे लगते थे मानो दिशाओं के अन्तर (अथवा अन्तरिक्ष) को नाप रहे हो, जो देवताओ के मार्ग मे विस्तृत वितान के सदृश थे और जो लम्बे-चौड़े और खुले हुए थे, फुर्ती से आघात किया।

२०. तब कृतज्ञ पक्षिश्रेष्ठ का शरीर, देवताओं की स्त्रियो के नयनाश्रु की धारा और देवताओं के द्वारा की गई पुष्पवृष्टि—ये तीनों ही साथ-साथ आकाश से गिरे।

२१. भाग्य से, इन्द्रियजित राम के उपस्थित होने पर, पक्षिराज (जटायु) ने जिसकी उष्णता शिथिल हो रही थी, रावण के द्वारा जानकी के हरण का वृत्तान्त कहा।

२२. "मेरी इस युद्ध करने की शक्ति को और वहू (सीता) को रावण ने हर लिया", जैसे दशरथ से यह कहने के लिये वह पक्षिश्रेष्ठ स्वर्ग मे चला गया।

२३. तब कमल के समान नेत्र वाले राम, पवन के पुत्र हनुमान की लालच से, फले हुए वृक्षो से भरे, जहाँ चिड़ियाँ चहचहा रही थीं, ऐसे सुन्दर ऋष्यमूक पर्वत पर तुरन्त गये।

कपिरजर्य्यमचिन्तितलम्भितं तदनुभूय विरोचनसम्भवः ।
रिपुमयाचत कौशिकवैरिणां निहतये न न दुन्दुभिविद्विपः ॥२४॥

उपकपीश्वरवास गुहामुखं समधिगम्य रघूद्वहचोदितः ।
प्रतिनिनादवतो जगतीधरान् गुरु जगर्ज्ज हरिः परिकम्पयन् ॥२५॥

अभिपपात रुपारुणिताननः कपिपतिः कपिलद्युतिमण्डनः ।
नव विरोचनमण्डलमुद्वहन् गिरिवरः शिरसेव हिरण्मयः ॥२६॥

अथ रणो ववृते धरणीभृतां शिखरखण्डमहीरुहमण्डलैः ।
हरिहरिद्वयनन्दननर्दितप्रतिनिनादितभीमदरीमुखः ॥२७॥

पतितभूरुहभूरिभरस्फुटत्कठिनविग्रहविग्रहतेजितौ ।
अचरतामचिरेण परस्परच्छलनिरूपणविक्षणवीक्षणौ ॥२८॥

शिरसि पातितभिन्नगिरिद्रुमक्षणनिरासलवक्रुतहस्तयोः ।
अधरदंशपरिस्रुतशोणितं वलितमुष्टि जवादुपसर्प्पतोः ॥२९॥

२४. अप्रत्याशित रूप से प्राप्त मैत्री का अनुभव कर, सूर्यपुत्र, कपि सुग्रीव ने, विश्वामित्र के शत्रुओं के रिपु (राम) से दुन्दुभी नामक असुर के शत्रु (वालि) के वध के लिये, याचना न की हो—ऐसा नहीं, अर्थात् याचना की ।

२५. उस गुफ़ा के द्वार के पास, जहाँ वानरों के स्वामी रहते थे, पहुँचे हुए राम से उत्साहित सुग्रीव, पर्वतों को कम्पायमान और प्रतिध्वनित करते हुए, बड़े ज़ोर से गरजे ।

२६. (तब) क्रोध से जिनका मुख लाल हो गया था, जो कपिलवर्ण कान्ति से शोभित थे, जिनके चारों ओर नवोदित सूर्य के मण्डल के समान प्रभा थी, जो अपने शिरोभाग से सुवर्णमय पर्वत के समान लगते थे, ऐसे वानरों के स्वामी (सुग्रीव) युद्ध के लिये उद्यत हो गये ।

२७. सूर्य और इन्द्र के पुत्र, सुग्रीव और वालि ने अपने गर्जन से कन्दराओं के द्वार को प्रतिध्वनित कर, शिखर-खण्डों और वृक्षों के समूह से युद्ध किया ।

२८. अपने ऊपर पड़ते पर्वतों के अतिशय भार से, कठिन शरीर के फटने के कारण, युद्ध को तीव्र कर देने वाले, उन दोनों ने शीघ्र ही माया के प्रयोग से क्षणिक दर्शन का आश्रय लिया ।

२९. सिर पर फेंके गये, छिन्न-भिन्न होते, वृक्षों और पर्वतों को क्षण भर रोकने के लिये, हाथ टेढ़ा किये हुए, अपने अधर काट कर रक्त बहाते हुए, मुट्ठी बांध, वेग से दौड़ते (उन दोनों का) युद्ध हुआ ।

सरभसं रिपुवक्षसि वक्षसा समभिहत्य सहूकृति वल्गतो. ।
ललितमुक्तपटान्तमनोहर प्रचलपुच्छगुणद्वयशोभिनो. ॥३०॥

रविपुरन्दरनन्दनमल्लयोरथ बभूव भुजै. सुमहाहव. ।
करणबन्धनबद्धसमुच्छ्वसज्जठरमुक्तमुखागतशोणित ॥३१॥

नभसि किं क्षिपत कुलपर्व्वतानुत भुजेन विवर्त्तयतो महीम् ।
इति विवेश वितर्कमथैतयोर्नृपसुत क्षिपतोरितरेतरम् ॥३२॥

वलपरीक्षण तत्क्षणकर्षणप्रसभतानितहुङ्कृतिगर्ज्जित ।
हरिगुरु हरिदश्वसुतो मुहुर्विनमयन् निजनाम समाददे ॥३३॥

अथ निर्वर्त्तितनिश्वसितातुर ग्रहणनिर्गतनिश्चललोचनम् ।
भुजभुजङ्गमवन्धनबन्धुरं स्रवदसृग्रसरञ्जितकन्धरम् ॥३४॥

*भ्रमितपादयुगाहतपातितद्रुमशतं द्रुतमुक्तरवं रवे ।
सुतवर वरविक्रममम्बरे भ्रमयति स्म सुराधिपसम्भव. ॥३५॥

३०. शत्रु के वक्ष पर प्रचण्ड आघात करते हुए और हुकार से शरीर को हिलाते हुए, सुन्दर, लहराते वस्त्राञ्चल की भ ति हिलती पूंछों से (उन दोनो का युद्ध हुआ।)

३१ रविनन्दन (सुग्रीव) और पुरन्दर नन्दन (बालि), दोनो पहलवानो मे भुजाओ से भय ङ्कर युद्ध हुआ। दांव बांध कर कर कसने के कारण उदर से रुधिर निकल कर मुख मे आ गया।

३२ एक दूसरे को पटकते हुए देख कर, राजपुत्र (राम) ने यह तर्क किया कि क्या आकाश मे 'कुलाचल' फेंका जा रहा है अथवा भुजाओ से पृथ्वी हिलाई जा रही है।

विशेष—कुलाचल प्रसिद्ध सात पर्वतो मे से कोई—महेन्द्र, मलय, सह्य, शुक्ति, ऋक्ष, विन्ध्य और पारियात्र।

३३ तत्क्षण बल की परीक्षा करते हुए, जोर से खीच कर गरजते हुए हरिदश्व पुत्र (सुग्रीव) ने हरिगुरु (बालि) को बार-बार भुका कर अपना नाम बताया।

३४ जो उलटी सांस चलने के कारण व्यथित था, जिसकी आंखे पथरा कर बाहर निकल पडी थीं, जो सर्प के समान भुजाओं की जकड से अकड गया था और जिसकी गरदन बहते हुए रुधिर के रस से लाल हो गई थी,

३५. इन्द्र के पुत्र (बालि) ने सूर्य के बली पुत्र (सुग्रीव) को, जो घूमते हुए दोनो पैरों से सैकडो वृक्षो को उखाड कर गिरा रहा था, जो तेजी से गर्जन कर रहा था, आकाश मे नचाया।

इति पपात वितन्वति पौरुषं रिपुदृढाङ्गविदालिनि वालिनि ।
परुषवह्निशिखोद्गमनिष्ठुरः क्षितिपनन्दनवाणमहाशनिः ॥३६॥

अकृतवाणनिकृत्ततनुः कृती चिरविनिन्दितराघवलाघवः ।
पदमधिक्षयमक्षयसम्पदः सुरपुरस्य पुरन्दरनन्दनः ॥३७॥

सदनुजे दनुजेशरिपौ नगे स्थितवतीतवतीन्द्रसुते दिवम् ।
स्तुतनये तनयेऽशिशिरद्युतेर्निपतितां पतितां पुनरास्थिते ॥३८॥

ऋतुरतारतभास्वदिरम्मदारुचिपिशङ्गितवारिदमण्डलः ।
प्रचलवातविधूतपरिभ्रमत्सितविहङ्गमदन्तुरदिङ्मुखः ॥३९॥

उदितसारवसारवदम्बुदः पथिकरोदकरोदकशीकरः ।
उपययौ वनयौवनसम्पदः प्रजनकोमलकोमलकन्दलः ॥४०॥

जलधरः पवनेन वितानितः क्षितिपनन्दनविक्रमदन्तिनः ।
मुखपटः समराय गमिष्यतस्तपनमण्डलकेशरिपञ्जरः ॥४१॥

३६. उसी समय अपने पौरुष का विस्तार करने वाले और शत्रु (सुग्रीव) के दृढ़ अङ्ग को विदीर्ण करने वाले, वालि पर, प्रचण्ड अग्नि की लपलपाती ज्वाला के सदृश कठोर, महाशनि के समान, पृथ्वीपति (राम) का बाण गिरा।

३७. उस भाग्यवान, इन्द्र के पुत्र (वालि) ने, जिसका शरीर बाण से काट डाला गया था, और जिसके कारण राम के हल्केपन की बहुत दिनों तक निन्दा हुई, अक्षय सम्पत्तिवान, स्वर्ग में, अमर-पद को प्राप्त किया।

३८. अपने श्रेष्ठ, छोटे भाई (लक्ष्मण) के सहित पर्वत पर आसीन होने पर, और इन्द्र के पुत्र (वालि) के मरणोपरान्त स्वर्ग में चले जाने पर, और राजनीति के लिये प्रशंसित, सूर्य के पुत्र (सुग्रीव) के गिरे हुए स्वामित्व के पुनः प्राप्त कर लेने पर,

३९. ऋतु के समाप्त होने पर, चमकती विद्युत की प्रभा से पिशङ्गवर्ण बादलों के समूह युक्त, दिग्प्रान्त, में बहती हुई हवा के झकोरे से मँडराते हुए श्वेत पक्षियों से लहरियादार हो गया।

४०. मनोहर और मृदु अंकुरों का जनक, पथिक जनों को रुलाने वाले जलबिन्दुओं से युक्त उमड़ा हुआ, गरजता हुआ, जल से भरा बादल, वन की यौवन-सम्पत्ति को प्राप्त हुआ।

४१. पवन से फैलाया हुआ बादल, सूर्य मण्डल रूपी, सिंह के पिंजड़े जैसा, समर के लिये जाने, राजहर्षकारी जय गज का मुखपट सा प्रतीत हुआ।

मलय-मन्दर-विन्ध्य-महीभृता शिखरयष्टिसमर्पितमायतम्।
प्रततशीकरशुक्तिजमण्डन जगति मेघवितानमरोचत ॥४२॥

भुवनतापनघर्म्मजयोत्सव. समुदित परिनृत्यत बर्हिण.।
इति जघान यथा समयस्तडित्कनकदण्डशतैर्घनदुन्दुभिम् ॥४३॥

प्रथममश्रुमुखीमपहाय ता पथिक! सम्प्रति किं परितप्यसे।
इति यथा विजहास वनस्थली प्रविकसद्दलकन्दलशोभिनी ॥४४॥

अतनुना तनुना घनदारुभि स्मरहित रहित प्रदिघक्षुणा।
रुचिरभा चिरभासितवर्त्मना प्रखचिता खचितानन्दीपिता ॥४५॥

जलदकालविवर्द्धिततेजस शुशुभिरे कुलिशायुधगोपका.।
मनसिजस्य शरव्यथितात्मना विरहिणामिव शोणितबिन्दव ॥४६॥

४२ ससार के ऊपर, मेघा का बडा-सा छत्र, जिसमे मलय, मन्दर, एव विन्ध्य पर्वतो के डडे लगे थे और जो मोती के समान विस्तृत जलकणो स अलकृत था, बडा शोभायमान् लगता था।

४३ आह्लाद से नाचते हुये मयूरो ने, अवसर आने पर बादल रूपी नगाडे को, बिजली रूपी सैकडो सोने के डडो मे पीटा। जैसे ससार म ग्रीष्म ऋतु की तपन पर विजय पाने का उत्सव मनाया जा रहा हो।

४४. 'हे पथिक! पहिले तो तुमने रोती हुई प्रेयसी को छोड दिया और अब उसका परिताप करते हो।' यह कह कर निकले हुए पत्तियो और कोपलो से वनस्थली जैसे हँसी।

४५ प्रबल कामदेव ने, काम रहित जनो को कामाग्नि से दग्ध करने की इच्छा से, लपलपाती बिजली की अग्नि से, घन रूपी काष्ठ समूह से रचित आकाश रूपी चिता को न प्रज्ज्वलित किया हो, ऐसा नही है। अर्थात् अवश्य ही प्रज्ज्वलित किया।

टिप्पणी—रूपक कुछ इस प्रकार है —

वर्षा ऋतु है। आकाश मे बादल छाये हैं। उनके बीच मे बिजली लपलपा उठती है और वे बादल जल से उठने हैं। ऐसा लगता है कि मानो बादल रूपी काष्ठसमूह से सँजोई हुई आकाश रूपी चिता को कामदेव, बिजली रूपी अग्नि से प्रज्ज्वलित कर देता है और इस प्रकार साधारणत काम-रहित जनों के भी हृदय मे कामोद्दीपन करता है।

४६ वर्षा ऋतु के कारण जिनका तेज बढ गया है, ऐसे विद्युत को धारण करने वाले (बादल) ऐसे शोभायमान् हुए जैसे कामदेव के बाणो से पीडित हृदय विरही जनो के रुधिर की बूँद हो।

घनपरिस्रवणा गिरयो बभुः सतड़िदम्बुदसन्ततिसंवृताः।
कनकचित्रकुथावृतमूर्त्तयः स्रुतमदाइव दानवदन्तिनः ॥४७॥

मुरजनादगभीरमनोहरैः प्रमुदितेन पयोधरनिस्स्वनैः।
उपरिवृष्टिभयादिव तानितः प्रचलपिच्छचयो विशदभ्रुवा ॥४८॥

मुहुरुदग्रपयोदमतङ्गजश्रवणचामरभावमुपेतया।
गगन सागरशङ्खवपुःश्रिया प्रचरितं प्रमदेन बलाकया ॥४९॥

कमलिनी मलिनीकृतकन्ततिः सकलहं कलहंसगणं जहौ।
अविकलं विकलङ्कतनुच्छदं समदनम्मदनम्रतनुश्रियम् ॥५०॥

दिशि बभौ नववारिदसञ्चयस्त्रिदशनाथशरासनरञ्जितः।
जलनिधिर्बहुवर्णमणिद्युतिप्रकरवानिव तिर्य्यगवस्थितः ॥५१॥

जलधरस्य तटे तड़ितो बभुर्ग्रहगणग्रसनानि वितन्वतः।
उदरमाशु विभिद्य विनिर्गता रविकरा इव काञ्चनरोचिषः ॥५२॥

४७. विद्युत से युक्त बादलों की परम्परा से घिरे हुए घनघोर जल के बहने से पवित्र, उन राक्षसों के हाथियों के समान लगते थे, जिनके शरीर पर सुवर्ण-चित्रित झूल पड़ी थी और जिनसे मत बह रहा था।

४८. बादलों के, मृदङ्ग के समान, हृदय को हरने वाले, गम्भीर नाद से आह्लादित, चमकीली भौं वाले मयूरों ने, वृष्टि के भय से, अपने ऊपर हिलती हुई पूंछ के समूह का चँदोवा कर लिया।

४९. प्रमत्त बगुलों की पंक्ति, जो सागर रूपी आकाश के शंख के समान शुभ्रवदना थी और जो बार-बार उमड़ते हुए, हाथी के समान, बादलों के कान रूपी चँवर के सदृश लगती थी, घूमने लगी।

५०. मलिन पत्तों वाली कमलिनी ने उन कलहंसों को छोड़ दिया जो आपस में कलह करते थे, जिनके पंख पूर्ण रूप से कलङ्क-रहित थे और जिन मतवालों के शरीर की शोभा मद से नम्र हो गई थी।

५१. दिशा में देवराज इन्द्र के धनुष से रञ्जित मेघ समूह उठ आये जैसे विविध मणियों के कान्ति-समूह से युक्त जलनिधि आकाश में उठ आया हो।

५२. बादल के किनारे पर सुवर्ण के समान चमकती हुई बिजली, तारागणों को निगलती हुई, सूर्य के किरणों के समप्रभ, उदर को चीर कर निकलती हुई, बड़ी शोभायमान लगती थी।

विमलवारि निपीय नदीशतं सलिलभारनिरन्तरितोदर ।
क्रममिवाभिवहन्नतिपानज गिरितटे निपसाद पयोधर ॥५३॥

विरहिणीभिरलक्ष्यत मन्युना सलिलविच्युततैलसमप्रभम् ।
प्रतिनवोदितमस्फुटमम्बुदे विबुधनाथशरासनखण्डकम् ॥५४॥

न न चकार सतारततारका भरितसर्वनदा वनदावली ।
मदमयूरवर स्वरहसा प्रमदसारमित रमितं गिरौ ॥५५॥

वनदमण्डलदन्तपदश्चिर समभिहत्य रयेण हृतेऽग्रत ।
जलधरे पवनेन हरिद्व्रज. क्वचिदतिष्ठदुपागतसम्भ्रम ॥५६॥

पिहितविष्णुपथस्य पयोमुच पटलरन्ध्रविभावितमण्डल. ।
दिनकर क्वचिदन्वगमद्रुचा जलनिधौ वडवानलसहतिम् ॥५७॥

जलधिवारि निपीतवतो भृश वनमुचो रुधिरस्रवलोहिता. ।
अतिभरस्फुटितोदरनिर्गता बभुरिवान्त्रलता दिवि विद्युत. ॥५८॥

५३ बहुत सी नदिया के स्वच्छ जल को पीकर और अपने उदर म जल के भार को रख कर, अधिक पानी पी जाने के कारण, थकावट से (वह) बादल गिरि के किनारे विश्राम करने लगा ।

विशेष—समुद्वहन्त सलिलातिभार, बलाकिनो वारिधरा नदन्त ।
महत्सु शृगेषु महीधराणा, विश्रम्य विश्रम्य पुन प्रयान्ति ॥ —किष्किन्धा काण्ड, २८–२२ वाल्मीकि ।

५४ विरहिणी स्त्रिया ने बादल मे, नवोदित अस्पष्ट इन्द्रधनुष के खड को, जो जल में गिरे हुए तेल के समान चमक रहा था, क्रोध मे देखा ।

५५ जिसमे विस्तृत तारिकाएँ ढकी हुई थी, जिसने सारे नदों को भर दिया था ऐसी जलदावली ने मतवाले मयूरो को अपने भयङ्कर गर्जन से अत्यधिक मत्त कर मुदित न किया हो, ऐसा नहीं ।

५६ जलद मण्डल (नायक) के दन्तक्षत से युक्त दिशा (नायिका) का समूह पवन द्वारा आघात करके वेग से बादलो के उडा देने पर कहीं-कही देर तक सम्भ्रमित रहा ।

५७ बादलों से आकाश के घिर जाने पर, सूर्य जिसका मण्डल (बीच-बीच मे) रन्ध्र राशि से विभासित था, अपनी किरणो के सहित, समुद्र के बाडवाग्नि मे वही पर समा गया ।

५८ समुद्र का जल अत्यधिक पी जाने के कारण, बोझ से पेट फट जाने से, बाहर निकल पडी हुई बहते रुधिर के समान, लाल अँतडियो के सदृश, बिजलियाँ आकाश मे फैल गईं ।

रविकरानुपरुध्य कृतं मया भुवनदृष्टिनिरोधि तमस्तड़ित् ।
विलसितेन निहन्ति मुहुर्मुहुर्घन इतीव रराम रुषा घनः ॥५६॥

दिशि निवेशितताम्रविलोचना नवघनानिलकम्पितकुन्तलाः ।
नयनवारि चिरं पथिकाङ्गना विससृजुः सह वारिदशीकरैः ॥६०॥

विततपावनके वनकेतकीसुरभिगन्धवहे धव ! हे ! पथि ।
इति रवैरुदिता रुदिताः स्त्रियः शिखिगिरं सहसे सहसेरितम् ॥६१॥

नभसि नूतनकन्धरजृम्भितस्थगिततिग्मकरद्युतिसम्पदि ।
व्यपगतेन पदं शुचितेजसा हृदि वियोगवतामिव सन्दधे ॥६२॥

शिशिरशीकरवाहिनि मारुते चरति शीतभयादिव सत्वरः ।
मनसिजः प्रविवेश वियोगिनीहृदयमाहितशोकहुताशनम् ॥६३॥

प्रथमपीतजलाहितमेचकप्रभमनङ्गकृपाणमिवाम्बुदम् ।
विमलधारमुदीक्ष्य समुद्गतं विरहिणीहृदयं न न विव्यथे ॥६४॥

५६. सूर्य के किरणों को रोक कर, संसार की दृष्टि को विफल करने वाला अन्धकार तो मैंने किया पर यह बिजली बार-बार चमक कर अन्धकार को नष्ट कर देती है, यह विचार कर क्रोध से बादल जोर से गरजा ।

६०. पथिकों की स्त्रियां, जिनके केश नयी और घनी वायु से हिल रहे थे, बादलों की बूंदों के साथ-साथ, अपने ताम्र वर्ण नेत्रों से दिशाओं को निहारती हुई, आंसू बहाती थीं ।

६१. 'हे प्रिय ! जल से भरे वन केवड़े से सुरभित वायु से युक्त मार्ग पर तुम, सहसा उच्चरित मयूर की बोली को कैसे सहन करते हो ?' यह कहते हुए स्त्रियां रो-रो पड़ती हैं ।

६२. आकाश में, सूर्य, जिसकी प्रखर किरणों की आभा, नये बादलों के गर्जन से रुद्ध हो गई थी, अपने विशुद्ध तेज से च्युत होने के कारण, विरागियों के पद को धारण करने लगा ।

६३. जब शीतल जल-कण वहन करने वाली वायु बहने लगी तो, ठंड के भय से, कामदेव, विरहिणी स्त्रियों के हृदय में, जहां शोकाग्नि जल रही थी, घुस गया ।

विशेष--शीतार्तं वन्दक्रुपेयुषेव नीरैरासेकाच्छिशिरसमीरकम्पितेन ।
रामाणामभिनवयौवनोष्मभाजोराश्लेषिस्तनतटयोर्नवांशुकेन ॥ —माघ ८-३२ ।

६४. पहिले पिये हुए जल से, जिसमें काली प्रभा छा गई थी, और जो कामदेव की तलवार के समान था, ऐसे बादल की विमल धारा को निकलते हुए देख कर, क्या विरहिणी के हृदय में व्यथा नहीं हुई ?

विततमेघतमिस्रवृता दिश. समवलोक्य निशागमशङ्कया ।
विरहभीतिमहन्यपि निर्विशन् मृदु रराव रथाङ्गसमाह्वय. ॥६५॥

पथिकमानसमानसमुन्नतिस्थितिबर्हिष्कृतबर्हिकलापिनि ।
जगति वाशितरासितवारिदप्रसृतकन्धृतिकन्धृतिराश्रिता ॥६६॥

नवपयोधरकुञ्जरमस्तके तडिदसौ पतिते परितश्च्युत ।
स्फटिकभङ्गरुचो जलबिन्दवो विससृपु. प्रकरा इव मौक्तिका. ॥६७॥

जलधरेण कृता रवितारका नभसि देवनगोलकवृत्तय ।
बलनिपूदनजालविदा यथा ग्रसननिर्वमणक्षयन्त्रिता. ॥६८॥

अधिरयेण समीरगवाहिता विबुधवर्त्मनि वारिददन्तिन ।
अविरलं मुमुचुर्जलशीकराञ्छ्रमकृतानिव घर्म्मपय कणान् ॥६९॥

जलदशाखिनि लोलतडिल्लताक्रकचपत्रनिपातविदारिते ।
प्रविततता इव चूर्णचया बभु. पवनवेगधुता जलरेणव. ॥७०॥

६५ फैले हुए मेघो से जनित अन्धकार से दिशाओ को व्याप्त देखकर, रात के आगमन की शका से, दिन मे भी (चकई के) विरह के डर से, चक्रवाक ने धीरे से चक्रवाकी को बुलाने का शब्द किया।

६६ वर्षा काल के कारण पथिक वनिताओ के मन म मान-वृत्ति इतनी ऊँची उठी कि उसने मयूरो की (नृत्य काल मे) ऊपर उठी पूँछ की ऊँचाई को मात कर दिया और गरजते एव बरसते बादलो की गर्दन का सहारा लिया ।

६७ नये बादल के समान, हाथी के मस्तक पर, बिजली के गिरने से फूटे हुए स्फटिक के समान चमकीले जलबिन्दु के समूह के सदृश, मोती चारो ओर गिर कर बहने लगे।

६८ आकाश मे मेघो के कारण सूर्य बिम्ब क्रीडा कन्दुक के समान दिखने लगा। मानो उसे इन्द्र की माया को जानने वाले कृष्ण ने गोवर्धन धारण करने के समय उसे निग लने और उगलने के क्षण मे नियन्त्रित कर दिया हो ।

६९ हाथी के समान बादल, तेजी से चलती हुई वायु मे मिले हुए जलकणो से देवताओं के मार्ग को निरन्तर सीच रहे थे। ऐसा लगता था जैसे वे (जलकण) परिश्रम के कारण निकली हुई, पसीने की बूंदें हो।

७० आरे की धार के समान लपलपाती, बिजली के आघात से रेती हुई, बादल की शाखाओ से गिरी हुई, जल की फुहार बादल के चूर के समान, वायु के वेग से फैल गई।

महिषधूसरितस्सरितस्तटः परिगतो विपदा विपदाचितः ।
धुतमहाककुभः ककुभः पतत्त्रकृत भीमरुता मरुताकुलाः ॥७१॥

रविकराहिततेजसि भूतले हविषि वृष्टिमये बलशत्रुणा ।
उपहिते समरोचत लाङ्गली समुदितेव कृशानुशिखावली ॥७२॥

नवविबोधमनोहरकेतकीकुसुमगर्भगतः सह कान्तया ।
अविदितानिलवृष्टिभयागमः सुखमशेत चिराय शिलीमुखः ॥७३॥

अभिविसृज्य वनानि कृनावना मनुजलोकसमीपनिषेविणः ।
तड़िदलातशतैरभिताड़िता वनगजा इव सस्वनुरम्बुदः ॥७४॥

समयवृष्टिहतेऽपि दवानले भ्रमरधूमभृता नवलाङ्गलीः ।
समभिवीक्ष्य कृशानुसमप्रभा मुमुचेरेव भयं न मृगाङ्गनाः ॥७५॥

कमलवामहतो महतोऽनिशं विविधहंससहितः सहितः खगैः ।
प्रविदधौ कमलं कमलं रुजन्निपतितः सरसस्सरसस्तटः ॥७६॥

७१. भैंसे से धूसरित, एवं पक्षियों से भरे, गिरते हुए नदी के तट ने (इस प्रकार) विपत्ति से घिर कर, बड़े-बड़े पर्वत शृंगों को कम्पायमान करते हुए, वायु से आकुल दिशाओं को भयङ्कर ध्वनि से भर दिया।

७२. सूर्य की किरणों से सन्तप्त पृथ्वी पर, इन्द्र से डाले हुए, जलमय हवि से, नारियल के वृक्ष ऐसे लगते थे जैसे अग्नि-ज्वाला की परम्परा हो।

टिप्पणी—हवन कुंड में हवि डालने से जैसे अग्नि की शिखा उठती है उसी प्रकार सन्तप्त भूमि पर वृष्टि होने से नारियल के वृक्ष अग्नि-शिखा के समान लगते थे। उत्प्रेक्षालंकार।

७३. नव-विकसित केतकी के सुन्दर फूल के भीतर घुसा हुआ और वृष्टि के आगमन के भय से अनभिज्ञ, भ्रमर, अपनी पत्नी (भ्रमरी) के साथ, बहुत देर तक सुख से सोता रहा।

७४. वन को छोड़ कर, आदमियों की बस्ती के निकट रहने वाले बनैले हाथी के समान बादल, बिजली की जलती हुई सैकड़ों लुआठियों से जैसे ताड़ित होकर गरजने लगे।

७५. उपयुक्त समय से वृष्टि हो जाने से, यद्यपि जङ्गल की आग बुझ गई थी, फिर भी अग्नि के समान चमकने वाले और धुंएं के समान भौरों से घिरे हुए, नये नारियल के वृक्षों को देखकर, हरिणियों ने भय का त्याग नहीं किया, अर्थात् डर रही थीं।

७६. पक्षियों के सहित, विशाल एवं सुन्दर, गिरते हुए सरोवर के तट ने, जिसमें कमलों का सौंदर्य नष्ट हो गया था, जहां नाना-प्रकार के हंस रहते थे, लगातार कमल को टुकड़े-टुकड़े करता हुआ, जल की मलिनता को धारण किया। अर्थात् वहां का जल गदला हो गया।

प्रवितता नु पुरन्दरगोपका विविधवर्णरसेन विधातरि।
रचयतीन्द्रधनुश्चलतूलिका गलितधातु जलस्य नु बिन्दव. ॥७७॥

रजत रज्जुशताकृतिरायता पतति वृष्टिरियं नु निरन्तरम्।
जलधरस्य पतद्भुवि मण्डल स्फटिकदण्डशतैर्नु विधारितम् ॥७८॥

रचयत. समयस्य सुरायुध करशत नु सधातुरसारुणम्।
विगलित नु तत. शकल तडिल्लसितशस्त्रनिपातनतक्षितात् ॥७९॥

समुदयो नु विकाशकृतद्युतेर्विततवह्नि शिखाकुसुमश्रिय ।
इति नृणामभवज्जलदोदये ग्रथितभूरिवितर्कपर मन ॥८०॥

अथ सुबाहुरिपु सुबहु स्पृशन् स्मरधनञ्जयजय्यतनु. शुचम्।
हरिशरासन लक्ष्मणि वारिदे निहितदृष्टिरवोचत लक्ष्मणम् ॥८१॥

विधुतनीपवनै· पवनैस्तत मदनविभ्रमद भ्रमदम्बुदम्।
जलविकासमय समय भवान् धृतिगुणे सहते सहते कथम् ॥८२॥

७७ क्या ये (वृष्टि जल की बूंद) वीरबहूटियाँ तो फैली हुई नही हैं। अथवा विविध प्रकार के रगो से, इन्द्रधनुष के बनाने के समय, ब्रह्मा की कूँची के हिल जाने से गिरी हुई उन धातुओ के जल की बूंदें तो नही हैं !

७८ सैकडो चाँदी की लम्बी रस्सियो की आकृति की यह निरन्तर गिरती हुई वृष्टि ऐसी लगती थी जैसे पृथ्वी पर गिरते हुए मेघ मण्डल को सैकडो, स्फटिकमणि के डडो से वह धारण किये हो अर्थात् सम्हाले हो।

७९ क्या धातुओ के रस से अरुणित इन्द्रधनुष के बनाने के समय ये उसके सैकडो हाथ (नोक) तो नही हैं। अथवा (बनाने के समय) विद्युत् से प्रवाहित लोहे के हथौडे की चोट से टूक-टूक हुए उसके (इन्द्र-धनुष के) टुकडे तो नही गिर रहे हैं।

८०. क्या अग्नि शिखा के समान, प्रकाश करने वाले सूर्य की प्रभा की कुसुम-सम्पत्ति का उदय तो नही हो रहा है। ऐसे उठे हुए बादल को देख कर, लोगो के मन म वितर्क की भारी गुत्थी पड गई।

८१ तब सुबाहु राक्षस के शत्रु (राम) जिन्हे कामाग्नि नही जीत सकी थी, बहुत शोकाकुल होकर, इन्द्र धनुष मे सुशोभित बादल की ओर देखते हुए लक्ष्मण से बोले।

८२. झकोरा खाते हुए साल वन के पवन से व्याप्त, कामोद्दीपन करने वाले मँडराते हुए वारि-धरो से युक्त, चारो ओर जल के विस्तार से भरे हुए, समय को, आप धैर्यवान् होते हुए भी, कैसे सहते हैं ?

गिरितटे लुठनेन पयोमुचि प्रणिहिता इव धातुरजश्चयाः ।
त्रिदशनायशरासनकान्तयः प्रवितरन्ति परं नयनोत्सवम् ॥८३॥

वनकृशानुशिखा निहता वपुस्त्वयि तदीयमिदं प्रतिपाद्यते ।
जलमितीव विमुञ्चति लाङ्गलीकुसुमहस्ततले जलदोदयः ॥८४॥

दिशि लसन्ति खरानिलरंहसि क्षिपतिमेवमहीधरसंहतिम् ।
ततपरस्परघातसमुद्भवज्वलितवह्निशिखा इव विद्युतः ॥८५॥

तरुतले विपमारुतमारुतक्षततनुर्नलतावति तावति ।
विरतिरब्जरसं प्रति सम्प्रति स्वमलिसंहतिरक्षति रक्षति ॥८६॥

धावन्नकाण्डविहितध्वनिरम्बरस्य त्यागं विधाय निकटे विलसज्जनस्य ।
निघ्नञ्छिलाभिरुदकेन जगन्निपिञ्चन्नुन्मत्तवद्भ्रमति वायुवशः पयोदः ॥८७॥

वारिप्रवाहपरिलङ्घितभूमिपृष्ठं धारान्धकारहृतदिक्प्रविभागभित्ति ।
मेघप्रतानपिहिताद्रि घनागमेन ग्रस्तं समस्तमिव भाति जगत् समन्तात् ॥८८॥

८३. पर्वत के किनारे मँडराते हुए बादलों से मानो फैलाया हुआ, इन्द्र-धनुष के समान कान्तिमान, धातुओं के कणों का समूह नेत्रों को बड़ा आनन्दित करता है।

८४. 'दावानल से झुलसा हुआ तुम्हारा शरीर है, उसके लिये उसी का जल मैं तुम्हें समर्पण करता हूँ' इस प्रकार उमड़ा हुआ बादल, नारियल के फूल के करतल पर जल छोड़ता है।

८५. प्रचण्ड वायु से फेंके हुए, पर्वताकार बादलों के समूह के परस्पर संघर्ष से उत्पन्न, जलती हुई अग्नि की ज्वाला के समान, बिजली दिशा में लपलपा रही है।

८६. नरकुल के वृक्ष की छाया में भयङ्कर ध्वनि करती हुई हवा के झपेटे से घायल हो जाने वाला भ्रमर-समूह अब वर्षा-काल में कमल के प्रति विरक्ति के कारण अपनी सकुशल रक्षा कर लेता है।

८७. आकाश में निरर्थक गड़गड़ा कर दौड़ते हुए, विलासीजनों के पास से हट कर, शिलाओं पर जल से आघात करते और पृथ्वी को जल से सींचते, वायु के वश में होकर, बादल, उन्मत्त की भाँति (इधर-उधर) घूमते थे।

८८. जल के प्रवाह से जो पृथ्वी के तल को लांघ गया है, जिसने अपनी धारजनित अन्धकार से दिशाओं की सीमाओं को मिटा दिया है, जिसने मेघों के प्रतान से पहाड़ों को छिपा दिया है, ऐसा लगता है जैसे मेघ के आगमन ने सम्पूर्ण जगत को समूचा निगल लिया हो।

एतानि भान्ति हरिगोपकमण्डलानि प्रावृच्छ्रियो जगति सम्प्रति सञ्चरन्त्या.।
भूमौ पदानि रचितानि यथोदबिन्दुस्पर्शद्रुतोपहितयावकमण्डनानि ॥८९॥

स्वादूनि सिन्धुसलिलानि निपीय काम
गर्जन्नसौ गिरितटे विहितोपवेश ।
अत्यन्तभूरिजलभारगुरूदरत्वा-
दुद्गारनादमिव मुञ्चति वारिवाह ॥९०॥

निरस्तगृहसङ्गति भ्रमत एव तन्व्यास्तव
स्तनद्वयमियद्वपु पथिक। जातमुद्यौवनम्।
इतीव वदति स्फुटत्कुसुमहस्तमुद्यम्य सा
भ्रमद्भ्रमरमण्डलक्वणितपेशला लाङ्गली ॥९१॥

प्रणाशो मित्रस्य प्रसभरचितज्येष्ठविरह
प्रवृत्त. शोकादित्यधिकतरतारं निनदत.।
निराशस्योत्कस्य स्फुटति नवमेघस्य हृदये
रयादुद्यद्धारा असृजइव निर्भान्ति तडित. ॥९२॥

८९. बीर बहूटियो के मण्डल ऐसे शोभायमान हो रहे हैं जैसे ससार मे घूमती हुई वर्षा ऋतु रूपी सुन्दरी नायिका के पद चिह्न, जल बिन्दु के स्पर्श से तुरन्त लगे हुए महावर से मण्डित भूमि पर रच गये हो।

टिप्पणी—हरिगोपक=बीरबहूटी

९० नदियो के स्वादिष्ट जल को मनमाना पी कर, गरजते हुए, पर्वत के किनारे विश्राम कर, वह बादल, जिसका पेट, अत्यधिक जल पी जाने के बोझ से भारी हो गया था, जैसे डकार रहा है।

९१. "हे पथिक ! तुम घर मे उसका साहचर्य छोड कर (मारे-मारे) घूम रहे हो। उस सुकुमाराङ्गी के स्तन यौवन से भर कर बडे हो गये हैं," इस प्रकार वह नारियल (का वृक्ष), जो उस पर भनभनाते हुए भ्रमरो के समूह के मँडराने से बडा सुन्दर लगता है, अपने नव परफुटित पुष्पो से भरे हुए हाथ को उठा कर कहता है।

टिप्पणी—लाङ्गली='नारिकेलस्तु लाङ्गली'—इत्यमर ।

९२. सूर्य का विनाश हो गया। बरजोरी ज्येष्ठ मास से विरह हो गया (अर्थात् ज्येष्ठ मास समाप्त हो गया) बिखरे हुए, निराश एव अनमने, नये मेघो के वक्ष पर तेजी से अपनी धार उठाये हुए, बिजली, रुधिर के समान लगती है।

नभोवारीरुद्धं सुरपतिधनुर्धातुनिकरैः
कृताभिज्ञानं यन्नवजलदवन्यद्विपकुलम्।
नदत्युच्चैरेतत्कृतवनपरित्यागचपलं
स्फुरद्विद्युच्चक्रग्रहणविधिपाशे निपतति ॥६३॥

अम्भोभिः सह पद्मरागसरणिर्ग्रासीकृता वारिधे-
रुद्वान्ता पुनरिन्द्रगोपककुलव्याजेन मेघैरिह।
तेनैषामुदरेषु रत्नविततिर्वान्तावशिष्टानव-
प्रोद्यद्भासुरवृत्रसूदनधनुर्व्याजेन संलक्ष्यते ॥६४॥

अनुत्तारं भूम्ना तिमिरचितमक्षय्यसलिलं
निशीथं कालेऽस्मिन्नहि मकर सञ्चारविभवम्।
तरेयं सिन्धूनां पतिमिव यदि व्यायततरं
लभेयाहं देव्याः कुचकलससङ्घाटमुडुपम् ॥६५॥

६३. वायु मण्डल रूपी साँकल से अवरुद्ध इन्द्रधनुष के धातुओं के समूह से जो पहिचाना जाता था, ऐसा, बनैले हाथियों के झुंड के समान नया बादल, जोर से गड़गड़ाता हुआ और जो जल के निकल जाने के कारण हलका हो जाने से चपल हो गया था, लपलपाती हुई बिजली के चक्र की पकड़ में फँस गया।

विशेष—वारी='वारीतु गजबन्धनी'—इत्यमरः=हाथी बाँधने की रस्सी या साकल।
'कृत वन परित्याग', श्लेष। वन=जंगल=जल—"पयः कीलालममृतं जीवनं भुवनं वनम्'—इत्यमरः।
इस श्लेष में रूपक और श्लेष दोनों ही है।

४६ यहाँ गिरकर क्षुब्ध और थर्राती हुई तिमिङ्गि की पक्ति ने समुद्र म सेतु बाँधने के लिये फेंके हुए, निश्चल और तिमि के समान भारी भरकम पहाड को तिमि की शङ्का से निगल कर बाद मे उगल दिया ।

टिप्पणी—तिमि=भीमकाय मत्स्य। तिमिंगल=तिमि से अधिक भीमकाय मत्स्य जो 'तिमि को भी निगल जाता है ।

४७. प्रचण्ड आंधी के कारण जिसमे क्षुब्ध एव लहराती हुई उत्ताल तरङ्गें उठ रही हों, ऐसे समुद्र के हाथियो को प्रिय पर्वतों की पक्ति एव शरभो की कोई गणना न रह गई । अर्थात उनसे भी अधिक वे ऊँची और भयङ्कर थीं ।

४८. (राम ने कहा) बाणों से पीडित समुद्र के उस तट पर तिमिङ्गिल के समान भीमकाय पर्वतो से बँधे हुए सेतु के द्वारा इस समस्त सेना को ले जाया जाय ।

४९ घडियाल और हाथी का रूप धर कर, सर्पों की सेना के सहित, विद्रुम के वृक्षो के वन को दाँत से तोडते हुए वानरो के स्वामी (हनुमान) समुद्र के पार जाँय ।

मदितरोऽदितरोषधरैरणक्षमकरैर्मकरैर्गजसन्निभैः ।
तरति को रतिकोपवृतासुरं ध्रुवदकं वद कम्पतिमाकुलम् ॥५०॥

इति गिरा चलितो दृढकीलनध्वनितकम्पितदिग्विदिशो नलः ।
मलयकुञ्जदरीषु महीभृतः पृथुरुतः प्रथमं समवेशयत् ॥५१॥

हरिवरः क्रमशो गिरिसंक्रमं दृढसमर्पितमूलनिबन्धनम् ।
सपदि बद्धुमभेदनमम्बुधौ शिखरिणां निकरैरुपचक्रमे ॥५२॥

तटसमर्पितमूलनिबन्धनः पृथुधराधरसेतुरकम्पनः ।
जलनिधौ मलयस्य महीभृतः प्रसरदंकुरवद् ववृधे शनैः ॥५३॥

अभिहतो गिरिणा रवभैरवः पतिरपामनिमेषविलोचनः ।
समुदितोदकसंहतिबाहुना हृदि जघान रुषेव महाकपिम् ॥५४॥

५०. भयङ्कर क्रोधी एवं प्रहार करने में शक्त, हाथी के समान दुर्धर्ष घड़ियालों से कम्पित और क्षुभित समुद्र को, एवं काम-जनित क्रोध से भरे रावण को मेरे सिवाय और कौन जीत सकता है ?

विशेष—काम के सफल न होने से क्रोध होता है। 'कामात् क्रोधोऽभिजायते' —गीता।

५१. इस प्रकार (राम के) वचन से प्रेरित होकर, नल, जिसने ध्वनि करती हुई, कम्पायमान दिशाओं के कोनों को दृढ़ता से गाड़ दिया था, भयङ्कर गर्जन करता हुआ मलय पर्वत की कुञ्ज रूपी गुफाओं में पहिले (सेना को) प्रविष्ट कर दिया।
५२. वानरों से श्रेष्ठ (नील) ने तुरन्त दृढ़ नींव रख कर क्रमशः पर्वतों के समूह से समुद्र पर अभेद्य, पर्वत का पुल बांधना आरम्भ कर दिया।
५३. तट पर जिसकी नींव का बन्धन रख दिया गया था, ऐसा विशाल, पर्वत का सेतु, समुद्र में मलय गिरि से अंकुर के समान प्रसार करता हुआ बढ़ने लगा।

विशेष—सेतुबन्धन पर गोवर्धनाचार्य का चमत्कार देखिये :

"गुरुरपिलघूपनीतो न निमज्जति नियतमाशये महतः।
वानर करोपनीतः शैलो मकरालयस्येव॥—गोवर्धन सप्तशती

(यदि कोई छोटा आदमी सारगर्भित बात भी कहता है तो वह महान् पुरुषों के हृदय में नहीं धँसती। यही कारण है कि जब वानरों ने भारी-भारी पर्वत उठाकर समुद्र में छोड़ा तो वे नहीं डूबे अर्थात् तैरने लगे (और सेतु बँध गया।)

५४. पर्वत से आहत होकर, भयङ्कर गर्जन करते हुए समुद्र ने, बिना आंख झपकाये, बड़े क्रोध से, लहरों के समूह रूपी भुजा से नील के हृदय पर आघात किया।

शमितरेणुकरेणुकटद्रवलुलितवासितवासितकन्दरैः ।
प्रविदधौ ततधौततटं नगैः कपिरशङ्कमशङ्कमभिक्षिपन् ॥५५॥

अधिपयोधि नलेन निपातितः सलिलनादनिनादितदिङ्मुखः ।
धुततिमिङ्गिलपुच्छहतः पुनर्गगनमुत्पतितो जगतीधरः ॥५६॥

दधति कूर्म्मपतिर्वपुरायतं कठिनपृष्ठतटे पतितं नगम् ।
कृतरवैर्गुरुविस्मयमीक्षितो भ्रमयति स्म चिरं हरिसैनिकैः ॥५७॥

मलयशैलमुखाहितबन्धनः कपिभिरर्द्धकृतो गिरिसंक्रमः ।
जलनिधौ निहितो जलवाञ्छया भुज इवास महासुरदन्तिनः ॥५८॥

अपहसन्निव फेनरुचा चिरं गिरिहतोदितकन्तातिबाहुना ।
अभिजघान पयोनिधिरुद्धतः कुसुमभाजि सुवेलशिरस्तटे ॥५९॥

परिसरस्थसरस्थपुटाचलक्षतविमानविमानमहोरगम् ।
विततरागतरागमणिप्रभाजनितरङ्गतरङ्गकृतध्वनिम् ॥६०॥

५५ निःशंक होकर फेंकते हुए कपि ने धूलि को शान्त कर देने वाले, हाथियो के कपोलों से बहती मद से काला हो उठे और सुगन्धित कन्दराओ वाले पर्वतो के द्वारा विस्तृत, धुले तट को निर्भय कर दिया ।

५६ समुद्र मे नल से फेंका गया पहाड, जल के गर्जन से दिशाओ को ध्वनित करता तिमिङ्गिल की पूंछ से आहत होकर पुनः आकाश मे उड कर गिरा ।

५७ विशाल शरीर धारण करने वाला, कछुओ का स्वामी, अपनी कडी पीठ के तट पर पर्वत के गिरने से चक्कर खा गया । उसे किलकारी मारते हुए वानर सैनिक बडे विस्मय से देख रहे थे ।

५८ मलय पर्वत के मुख पर बन्धन निहित करने वाला कपियो द्वारा (समुद्र मे) आधा ढकेला पर्वत ऐसे लगा जैसे समुद्र मे जल की इच्छा से डाली गयी ऐरावत की सूंड हो ।

५९. उद्धत समुद्र ने, पर्वत के गिरने से उठी हुई, बाहु के समान लहरो से, मानो फेन की कान्ति से हँसते हुए, पुष्पो से भरे हुए सुवेल पर्वत के मस्तक के तट पर, आघात किया ।

६० समीप मे स्थित, सरकते और विषम रूप से उठे पर्वतो द्वारा विमानो को ध्वस्त करते हुए तथा महासर्पों को मानरहित करते हुए, लाली फैलाती लाल मणियो की कान्ति से रँग उठी तरगो की ध्वनि करते हुए ।

विततधातुरसं धरणीधरक्षतकृतव्रणचक्रमिवाम्बुधेः ।
अभिचकर्त्त नलोऽनलभासुरः सलिलपृष्ठतटं गिरिसेतुना ॥६१॥

अवसितो नगसेतुरलक्ष्यत क्षिपति विष्णुवराहरदे भुवि ।
विषमकृष्टतया जलपृष्ठतः समुदितः क्षितिपार्श्वइवैकतः ॥६२॥

उदधिसेतुरगद्वयसङ्गतः सरलपुच्छविदारितदन्तिनः ।
वपुरुवाह परं ग्रसितुं गजं प्रसरतोऽजगरस्य गरीयसः ॥६३॥

द्विरदयुद्धविधौ गिरिसंक्रमे जलधिखातकृतान्तरसङ्गिनि ।
मलयतुङ्गसुवेलसुरद्विपद्वयबृहद्भुजबन्धइवावभौ ॥६४॥

मलयकुञ्जसुवेलतटाश्रयः स्थिरतरो नु धराधरसंक्रमः ।
उभयकोटिगतौ धरणीधरौ तुलयितुं नु तुला परिनिर्म्मिता ॥६५॥

अपरसेतुपथस्य विधित्सया कठिनकोटियुगे विनिवेशितौ ।
अजनि काचवरो नु वनौकसा गिरिवरावपनेतुमितोऽन्यतः ॥६६॥

६१. अग्नि के समान देदीप्यमान नल ने, पहाड़ों से बनाये हुए सेतु से, जल से संलग्न समुद्र के तट को काट डाला, जहां गैरिकादिक धातुओं का जल फैला था और जो पर्वत के आघात से जनित, घाव के चक्र के समान लगता था ।

६२. एक ओर से, पूर्णरूप से निर्मित, पर्वत सेतु, ऐसा लगता था जैसे जल के पृष्ठ से, कठिनता से खींच कर, विष्णु-वराह के दांत पर रखी हुई पृथ्वी उदित हुई हो ।

६३. समुद्र (के ऊपर बंधा हुआ) सेतु, जो दोनों पर्वतों (मलय और सुवेल) से जुड़ा हुआ था, उस अजगर के शरीर के समान लगता था जो हाथी के निगलने के लिये बढ़ रहा हो और जिसमें हाथियों को विदीर्ण करने की क्षमता हो ।

६४. समुद्र के गर्त्तों के भीतर परस्पर मिल जाने वाले उस गिरियों के संक्रमण में ऊँचे मलय और पर्वतराज सुवेल दोनों का परस्पर टकराना गजयुद्ध में दो हाथियों की विशाल सूँड़ों के फँसने सा हो गया ।

६५. मलय पर्वत के कुञ्ज और सुवेल पर्वत के तट से बंधा हुआ वह पर्वतों से बना हुआ सेतु जो दोनों किनारों तक गया था, क्या तौलने के लिये तराजू बनाया गया था ?

विशेष—मलयगिरि समुद्र के इधर और सुवेल उधर है। बीच में समुद्र है। समुद्र के ऊपर दोनों पर्वतों से बंधा सेतु है। इस प्रकार उसकी आकृति तराजू के समान हुई यह भाव है।

६६. यहां से अन्यत्र हटाये जाते दोनों पर्वत वनवासियों द्वारा एक दूसरे पुल मार्ग बनाने की इच्छा से दो मजबूत नोकों पर टिकाये गये कांच की भांति लगे ।

जलमुदस्य तिमिङ्गिलसम्पदः प्रसभमुद्धरणाय पयोनिधेः।
पृथुदुरुद्धरमन्तकधीवरप्रविहितं नु दृढं वृतिबन्धनम् ॥६७॥

उत भुवः कुलिशायुधविद्विषो विषयचक्रनितम्बसमाश्रयम्।
घटनसन्धिवलीततिमध्यम बलितमङ्गमगस्तनसम्पदः ॥६८॥

अथ निवारयितुं दृढमन्तरा प्रथमपश्चिमसागर विग्रहम्।
विपुलमद्रियुगेन महीयसा विरचितं नु भुजद्वयबन्धनम् ॥६९॥

अतिनिमग्नमदीयमहाशरव्रणरुजाकृतकार्श्यविभावितम्।
लवणसागरदानवदन्तिनः प्रकटमस्थि नु वंशसमुद्भवम् ॥७०॥

प्रथिमणि प्रथिते कृतकौतुकैरुदधिमापनदण्ड उपाहितः।
इति चकार मनो मनुवंशजश्चिरविचारपरम्परमादृतः ॥७१॥

समधिरूढसमीरणसम्भवप्रणयदत्तकरो रघुनन्दनः।
अधिरुरोह धराधरसंक्रमं भुवि निपण्णमिवासुरदन्तिनम् ॥७२॥

६७. जल को हटा कर, समुद्र की तिमिङ्गिल सम्पत्ति को जबदस्ती बाहर निकालने के लिये, क्या यह यम रूपी मल्लाह का बनाया हुआ अपनी जगह से न हटने वाला दृढ महाजाल है।

६८. अथवा यह वज्रायुध इन्द्र के शत्रु अगस्त्य के चक्र की धार पर टिका मध्य मे जोड (मधिस्थल) की रेखा के विस्तार से युक्त मुडा हुआ अग है ?

६९ या फिर पूर्व और पश्चिम सागर के अन्तर को दूर करने की इच्छा से दोनो महान् पर्वतो द्वारा दृढ रूप से अपनी बाँहें फँसा ली गयी हैं।

७० क्या यह सेतु खारे समुद्र मे रहने वाले हाथी के समान राक्षसो की हड्डी है जो, शरीर के भीतर बहुत गहरे घुसे हुए हमारे बाणो से किये हुए घाव की वेदना को प्रकट करता है।

७१ कुतूहल से प्रेरित होकर, वानरो ने, इस विख्यात और मणियो से भरे समुद्र पर उसके नापने का दण्ड रख दिया है, ऐसा मनु के वंशज एव आदृत राम ने (सेतु के सम्बन्ध मे) विचार किया।

विशेष—समुद्र के ऊपर ऐसा लगता था जैसे उसका मापदड हो, यह भाव है।

७२ पहिले पवन-सुत (हनुमान) के चढ जाने पर और प्रेम से बढाये हुए उनके हाथ को पकड कर, रघुनन्दन उस पर्वत से बने सेतु पर जो पृथ्वी पर बैठा हुआ असुर-दन्ती के समान लगता था, चढ गये।

शुभवयोधनयोधनयोर्ण्वं नृतिमिना दितनादितवीचिकम् ।
पिहितवेलसुवेलसुदभ्मसं सपदि वानरवानरमत्यगात् ॥७३॥

तटविशालकपोलतले चलत्तपनमण्डलकुण्डलमण्डनम् ।
विविधभूरुहषण्डविनिर्जितत्रिदशनन्दननन्दनचन्दनम् ॥७४॥

मदगजैरगजैरगनिर्झरध्वनितबृंहितबृंहितसूचितैः ।
सरसि तैरसितैरपि वारिदैः प्रविततं सततं सपयःकणैः ॥७५॥

निकषणेन युगस्य हिरण्मयज्वलितरूपधरस्य विघृष्टया ।
कटकभित्तिषु काञ्चनरेखया रविगतं प्रथयन्तमुदारया ॥७६॥

हरिसमानसमानमृगान्वितं सभवनोपवनोपवृतान्तरम् ।
तटगुहासु गुहासुसमैर्विभिः कृतरवं शरवंशरनावृतम् ॥७७॥

रचयति क्रमवन्धमिभद्विषि क्षणमवेत्य मृगं मृगलक्षणः ।
परिहृतं प्रसभं हिमकान्तिना नखरघातभयेन विदूरतः ॥७८॥

७३. सुन्दर वयःसम्पत्ति वाले तथा योद्धा (राम एवं हनुमान) के नर्तन से खंड-खंड होती, निनाद करती तरङ्गों वाले, सुवेल पर्वत से अवरुद्ध तट एवं जल वाले समुद्र को नर राम और वानर हनुमान शीघ्र ही पार कर गये।

७४. विविध प्रकार के वृक्षों को पराजित करने वाले तथा देवताओं को हर्षित करने वाले नन्दन कानन के चन्दन से युक्त, चंचल सूर्य मंडल की भांति कुंडल के आभूषण की शोभा विस्तृत कपोल तल पर हुई।

७५. जंगली, मतवाले, गज तथा पहाड़ी झरनों की बढ़ी हुई ध्वनि से सूचित होते, जलकण से युक्त बादल निरन्तर उस जलराशि पर फैल गये।

७६. तपाये स्वर्ण का रूप धरे दोनों के रगड़ने से कटकभित्ति (Mountain ridge) पर चमकती स्वर्ण रेखा को प्रकट करते, सूर्य तक पहुँचे (पर्वत पर राम चढ़े)।

७७. सिंह के समान मानी मृगों से युक्त, भवन सहित उपवनों से आच्छादित अन्तर वाले तटवर्ती गुफाओं में निनादयुक्त शर (Reeds) के वन से ढँके (पर्वत पर चढ़े)।

७८. मृगाङ्क चन्द्र के क्षण भर (उस पर्वत के) पास पहुँचने पर, (किन्तु पर्वतचारी) सिंह के पैंतरे बांधने पर अपने मृग की बात समझ कर ही नखों के आघात के भय से चन्द्र जहां से हट गया (उस पर्वत पर राम चढ़े)।

कृतदवारणवारणशोणितस्रवसदारुणदारुणलुब्धकम्।
मकरसारससारसनिम्नगा ततमवारितवारितदिग्गजम् ॥७९॥

ज्वलितरत्नचयेन नभस्पृशा गगनलग्नदवानलसशयान्।
अधिरुरोह सुवेलमग विभु. प्रतिजन जनयन्तमनारतम् ॥८०॥

तत्र स्थित्वा किरणनिकरन्यस्तरङ्गैस्तरङ्गै-
भस्वित्तोय वरुणनिलय वैद्रुमाणा द्रुमाणाम्।
पश्यन् रेमे सततसलिलभ्रसमुक्तं समुक्त
शक्रत्रस्तक्षितिधरशतस्थानदन्त नदन्तम् ॥८१॥

इति चतुर्दश सर्ग.।

७९. वन मे युद्ध करने वाले गज के शोणित प्रवाह लाल रहने वाले भयानक व्याध से युक्त, मकर, सारस और नदियो से युक्त होकर फैले, घेरे हुए दिग्गजो से भी अवारित (पर्वत पर राम चढे)।

८० चमचमाते हुए रत्नो के समूह से, आकाश म लगी हुई दावाग्नि का भ्रम उत्पन्न करने वाले, गगन-चुम्बी सुवेल पर्वत पर जितेन्द्रिय राम लोगों म शक्ति भरते हुए चढे।

८१ वहां (सुवेल पवत पर) बैठ कर राम ने, वरुण के निवास स्थान समुद्र को, जिसका जल, विद्रुम (मूंगा) के वृक्षो के किरण-समूह से रञ्जित होकर चमक रहा था, जहां जल के निरन्तर थपेडे से मोती टूट रहे थे, जहां इन्द्र से भयभीत सैकडो पर्वत के शृङ्ग ध्वनि कर रहे थे (ऐसे समुद्र को) देख कर रमण किया।

चौदहवां सर्ग समाप्त।

तद्वचास्यवितथानि विपाके कर्त्तुमिष्टफलवन्ति यतेथा. ।
वल्लभस्य नयविद्विषतो वा सूक्तमेव हृदयेऽभिनिधत्ते ॥६॥

निस्पृहोऽथ पर एव हितानि व्याहरत्यगणितप्रभुकोप. ।
निष्फलप्रियसुखो ननु भृत्य. पथ्यमाह पतिमानतवृत्ति. ॥७॥

स्वाभिमानपरिबोधनहेतोर्भावशून्यमभिधाय वचासि ।
स्वामिनं युधि नियुज्य विमर्दं द्रष्टुमप्युपसरन्ति न केचित् ॥८॥

दूर दृष्टरिपुकेतुशिखाग्रा वारितेऽपि कलहाय यतन्ते ।
न प्रयान्ति शरवृष्टिनिपाते ताड्यमानशिरसोऽपि पुरस्तात् ॥९॥

मुञ्च घातमभितो भव वीरेत्यन्ययोधमभिधाय जिघासुम् ।
लीलया युधि पुरोऽभिसरन्तो नापि सान्ति भुवि पञ्च पुमास ॥१०॥

यत्स्वय युवतिमित्रवतीषु व्याहृतं मधुमदेन सभासु ।
तत् स्मरन्ति रणमध्यमुपेता. केचिदेव शरजालकरालम् ॥११॥

६. अत तुम उसके वचन को सत्य, और परिणाम मे इष्ट फल देने वाला, सिद्ध करने का प्रयत्न करो। सुभाषित चाहे स्नेही मित्र का हो या नीति द्वेषी का हो, हृदय मे प्रभाव करता ही है।

७ कोई व्यक्ति, चाहे पराया क्यो न हो, यदि वह बलवान के क्रोध की परवाह न कर, हित की बात करता है, तो उस नम्रता का व्यवहार करने वाले भृत्य को, चाहे वह अपने स्वामी के सुख सम्पादन मे विफल ही हो, उसे कल्याणकारी कहते हैं।

८ कुछ लोग ऐसे होते है, जो अपना अभिमान जताने के हेतु, अभिप्राय से शून्य बात कर, अपने स्वामी को युद्ध मे फँसा देते हैं और उनके नाश के समय, उसे देखने तक के लिये पास नहीं फटकते।

९. दूर से शत्रु के झडे के अग्रभाग को देखते ही, रोके जाने पर भी लडने को गिरे पडते हैं, परन्तु जब बाण की वर्षा होने लगती है तो सिर पर मार पडने पर भी आगे नहीं आते।

१०. दुनिया में ऐसे पाँच भी पुरुष न मिलेंगे जो मारने की इच्छा करने वाले योद्धा से यह कहें कि 'वीर हो तो, मेरे दोनो ओर आओ' और (यह कहते हुए) युद्ध भूमि मे खेलते-खेलते आगे बढें।

११ युवतियो और मित्रो से भरी सभा मे, जो मदिरा के नशे मे चूर होकर शान बघारते थे, बाणवर्षा से भयङ्कर हो गयी रणभूमि मे उनमे से विरले ही उन वचनो को याद रखते हैं। अर्थात् युद्ध मे उनकी शेखी भूल जाती है।

के नयन्ति पुरुषस्य सहाया भोक्तुमिद्धविभवस्य समृद्धिम् ।
युद्धमध्यवधमिच्छति तस्मिन् दुर्लभाः सह कृतव्यवसायाः ॥१२॥

निर्व्यपेक्षमवधूय वचस्तत् सेवकैरभिहितं श्रुतिहारि ।
यन्नयेन न समेति विरोधं तद्विचारनिपुणेन विधेयम् ॥१३॥

गीयते द्विविधमागमविद्भिः कर्म्म यत् सुकृतदुष्कृतभेदात् ।
सिद्धिदेयगुणदोषवशात्तद्भेदमेति पुनरेव चतुर्द्धा ॥१४॥

पक्षयुग्मगतसिद्धिविधेयं तद्विचिन्त्य गुणदोषविशेषम् ।
यः करोति करणीयमनिन्द्यं विद्धि नीतिफलमस्य करस्थम् ॥१५॥

दोष दुष्टफलनिन्द्यविरामं योऽर्थमर्थविपरीतमुदस्य ।
सेवते सदनुबन्ध विशुद्धं धाम तत्र न तनोति विपत्तिः ॥१६॥

दुर्ज्जयेन सह वैरमनर्थं स्त्रीपरस्य न हिताय परत्र ।
तत्कलत्रमपहाय सुखार्थं राघवस्य मृगयस्व सुहृत्त्वम् ॥१७॥

१२. सुख भोगने के लिये, धनी पुरुष के, कौन सहायक नहीं होते ? युद्धभूमि में जब उनका वध होने लगता है, तो साथ देने वाले दुर्लभ होते हैं ।

१३. इसलिये विचारशील पुरुष को उचित है कि वह सेवकों के प्रिय किन्तु निराधार बात की परवाह न करे, जो नीति-विरुद्ध न हो उसे करे ।

१४. शास्त्रकारों ने 'कर्म' के दो प्रकार कहे हैं, एक सुकर्म और दूसरा दुष्कर्म । परन्तु सिद्धि-काल के लिये गुणदायक और दोषदायक, ये दो और मिल कर वह कर्म चार प्रकार का हो जाता है ।

१५. जो कार्य दोनों पक्षों के विचारने के बाद सिद्धि-प्रद जान पड़ता है, ऐसे अनिन्द्य कार्य को जो मनुष्य उसके गुण और दोष पर खूब विचार कर एवं करने योग्य समझ कर, करता है, तो इस नीति का फल उसके करतल-गत रहता है ।

विशेष—सहसा विदधीत न क्रियामविवेकः परमापदाम्पदम् ।
वृणुते हि विमृश्यकारिणं गुणलुब्धाः स्वयमेव सम्पदः ॥
भारविः—२—३०.

१६. जिसका परिणाम, दोषयुक्त, बुरे फल के कारण, निन्दनीय है, और जो प्रयोजन के विरुद्ध पड़ता है, ऐसे आचरण को छोड़ कर जो निष्कलुष प्रयोजन में अनुराग रखता है उसे विपत्ति नहीं घेरती ।

१७. जो स्त्री में लीन है, उसका अजेय पुरुष से वैर हानिकारक होता और परलोक में उसका हित नहीं होता । अतः स्त्री (सीता) को छोड़कर राघव की मित्रता का अनुसन्धान करो ।

इन्द्रियाणि मतिमन्तमजय्य योजयन्ति विषयेषु विजित्य ।
तद्वशित्वमवधूय यशोभिर्य्यस्तनोति भुवनानि स वीर. ॥१८॥

यौवन चलमपायि शरीरं गत्वरं वसु विमृश्य विसृष्ट. ।
अन्यजन्मगततिक्तविपाकं दृष्टसौम्यमपि कर्म्म न धत्ते ॥१९॥

हेतुरन्यभवभोगविवृद्धेर्य्यद्यतश्च भवतीह विभुत्वम् ।
स्यास्नु यच्च वितनोति यशस्तत् साधनोयमितरत्तु न धीरै ॥२०॥

रूपवन्तमपि हन्ति जरात्ति. सङ्गमे महति चास्ति वियोग. ।
याति दार्घमपि विच्युतिमायु. पुण्यमेव निरपायि भजध्वम् ॥२१॥

तद्विहाय मुनितुल्यमहिम्नो दुर्जयस्य मनसापि युवत्या ।
लोकयुग्मगतशर्म्मविनाश स्पर्शमस्य सुखमेहि यशो वा ॥२२॥

१८ ये इन्द्रियाँ, बुद्धिमान् और अजय पुरुष को (भी) जीत कर, उन विषयो की ओर प्रवृत्त करती हैं। अत इनमे आसक्ति को मिटाकर, जो यश का त्रिभुवन मे विस्तार करता है वह वीर है।

१९ यौवन अस्थिर है। शरीर नाशवान् है । धन सम्पत्ति चलायमान है। यह सोच कर विरक्त पुरुष देखने मे अच्छा पर जन्मान्तर मे तीखे फलवाला कर्म नही करता।

२० धीर पुरुष, उस ऐश्वर्य की साधना करते हैं जो स्थायी यश का विस्तार करता है, जो इस जन्म और जन्मान्तर मे समृद्धि का कारण होता है। अन्यविध ऐश्वर्य की साधना वे नही करते।

२१ बुढाई का कलश, सौंदर्य का भी नाश कर देता है। महान् सम्मिलन मे भी विछोह होता है। दीर्घ आयु का भी अध पतन होता है। केवल पुण्य अनश्वर है। उसी का अवलम्बन करो।

२२ मुनियो के समान महान् और अजय राम की युवती भार्या का मन से भी स्पर्श दोनों लोक के आनन्द का नाश करने वाला है । अत उसे छोड कर यश के द्वारा सुख को प्राप्त करो।

विशेष—मद्रास की हस्तलिखित जानकीहरण की प्रति मे यह श्लोक इस प्रकार है

लोक युग्मगत शर्म विनाश स्पर्शमस्य मनसापि युवत्या।
दुर्जयस्य मुनि तुल्य महिम्न. तद्विहाय सुखमेहि यशोभि. ॥

सप्रियावितरणेन कृतज्ञः तोषितस्सफल हार्दविरोधः ।
स्वर्गिवर्गमवजित्य समस्तं भृत्यवत्तव पुरीह विधत्ते ॥२३॥

ये भवन्तमतिवश्यममात्याः नूतनं पतिमिहाभिलषन्ति ।
कारयन्ति यदि नीतिविरुद्धं मा तदीयमनुरोधि वचस्ते ॥२४॥

हेतुरस्ति नरवानरभावे नैव दर्पविरहस्य चिरज्ञा ।
यत्सुरेन्द्रकृतवीर्यसुताभ्यां ग्रस्तशक्तिमिह कश्चिदुशन्ति ॥२५॥

शासनं यदि शिरोभिरुदग्रं मौलिवन्नृपसुतस्य न धत्से ।
शैलशृङ्गगुरुमस्तकभारत्यागसौख्य तव गच्छ व्रतं ते ॥२६॥

शक्रलोकजयदत्तमजय्यं दिक्षु फुल्लमिव काशवनं तत् ।
रामधामभवपावकदीप्त्या दग्धमेव समवैहि यशस्त्वम् ॥२७॥

गर्वमस्य वचनानि वहन्ति श्रोतुमन्तविरसानि मृदूनि ।
न प्रपद्य वितताार विकारं क्रोधवद्धमिति राक्षसलोकः ॥२८॥

२३. वह (राम) प्रिया (सीता) के लौटा देने से कृतज्ञ एवं सन्तुष्ट हो जायेंगे और उनके हृदय का विरोध मिट जायगा। समस्त देव-वृन्द को जीत कर यहाँ वे तुम्हारे नौकर के समान रहने लगेंगे।

२४. ये जो आपके अत्यन्त आज्ञाकारी मंत्री हैं, नये स्वामी की इच्छा रखते हैं। यदि ये लोग भी आपसे कोई नीति-विरुद्ध बात करवाना चाहें तो उनकी बात आप न मानें।

२५. नर अथवा वानर होने में दर्पहीनता का लम्बा ज्ञान कारण नहीं है। जो इन्द्र कृतवीर्य पुत्रों द्वारा शक्तिहीन किये गये किसी की इच्छा करते हैं।

२६. यदि तुम राजपुत्र (राम) के उन्नत शासन को अपने सिर पर मुकुट के समान नहीं धारण करते तो जाओ पर्वत शिखर के समान बोझ हटाने का सुख प्राप्त करने वाले तुम्हारा वक्त जाये (तुम मर जाओ!)

२७. इन्द्रलोक को जीतने वाले अपने इस अजेय यश को, राम के तेज से उत्पन्न अग्नि की दीप्ति से, दिशाओं में फूले हुए काँसे के वन के समान जला हुआ समझो।

२८. 'इसके (अङ्गद के) वचन, गर्व से भरे हुए हैं और सुनने में मीठे पर भीतर से कड़वे हैं' यह समझ कर राक्षस-समूह ने क्रोध से भरे हुए अपने उद्वेग को व्यक्त नहीं किया।

अट्टहास निनदोऽतिगभीर क्रोधगर्भमतिकाय विमुक्त ।
निस्फुलिङ्ग निकरेण सदस्तं दीपयन्दशदिशोय ससर्प ॥२९॥

कम्पनोऽपि परिकम्पितमूर्धा दन्तकान्ति निचिताधरराग ।
उन्नतैकचपलभ्रुकटाक्षं पातयन्द्विपति तत्र विरेजे ॥३०॥

आहतान्यथ परस्परमेव क्रुध्यतस्त्रिशिरसोऽपि शिरासि ।
घातविस्फुटितमौलिमणित्विट् द्योतिताम्बर तलानि विरेजु. ॥३१॥

इन्द्रजित्पथमदानदशाया दिग्द्विपेन्द्र इव गण्डतटाभ्याम् ।
निर्मुमोच मदसेकमनोज्ञं घर्मवारिमदमन्थरनेत्र. ॥३२॥

मानगर्भमवकर्णित दूत व्याहृतो भुवि न मय्यमुखेन्दु. ।
भूमिभक्तिकुसुमेन निवेश मण्डलस्य विततान निकुम्भ. ॥३३॥

क्रोधवेगविकृतश्च तथासीच्छोणिताक्ष मुखतिग्ममरीचि. ।
यत्सदस्थकिरणाधिप रत्नस्तम्भवह्निरपि तेन विवव्रे ॥३४॥

२९. राक्षसो के भीमकाय से निकला हुआ, भयङ्कर क्रोध से युक्त, उनके अट्टहास का गर्जन, चिनगारियो के समूह से, उस सभा को दीप्तिमान् करता हुआ दशो दिशाओ मे फैल गया ।

३०. (दूसरो को) कँपाने मे शक्तिमान् होते हुए भी जिसका सिर (क्रोध मे) काँप रहा था और जिसके दाँतो की चमक ने उसके अधर-राग को ढँक लिया था, तरेरते हुए चञ्चल भ्रू कटाक्ष को शत्रु (अङ्गद) की ओर प्रेरित करता हुआ, वहाँ शोभायमान हुआ ।

३१. तदनन्तर क्रोध से भरे हुए, त्रिशिरस नामक राक्षस के भी चोट खाये हुए सिर परस्पर टकरा गये और जिनके मुकुट की मणियो के परस्पर सघर्ष से आकाश का तल आलोकित हो गया था, चमक उठे ।

३२. इन्द्रजित ने, कनपटी के किनारे से, पसीना रूपी मद के कारण जिसके नेत्र शिथिल पड गये थे, मद न बहाते हुए दिग्गज की भाँति, मद से सींचे हुए मार्ग का परित्याग कर दिया ।

३३. निकुम्भ राक्षस ने, धरती पर सर झुका कर, सभा मण्डप मे, दूत के अभिमान युक्त वचन सुन कर, भूमि पर बनी पुष्प रचना के आकार का विस्तार किया ।

३४ फिर भी क्रोध के वेग से जिसका चेहरा भयङ्कर हो गया था और जिसकी रुधिर के समान लाल लाल आँख और मुख की किरणें तिरछी हो गई थी, उसने सभा में स्थित, सूर्यकान्त मणि के खम्भों की अग्नि को प्रज्ज्वलित कर दिया ।

रक्तपद्मरुचिहारि कराग्र प्रस्थितालि कुलरोचिपि कुम्भः ।
न्यस्यति स्म भुजवर्तिनि मन्दं ज्याभिघातकिणवर्त्मनिचक्षुः ॥३५॥

सेन्द्रनीलमथ वक्षसि हारं चूर्णयत्सपदि पाणितलेन ।
बद्धकृष्णमृगचर्मवदासीतद्गजस्सुवितते‍पु करालम् ॥३६॥

न्यस्य वक्त्रमधिपाणि विसृष्टस्वेदविन्दुविकटोऽपि चिराय ।
विस्मयेन किल दूतमनन्यव्यावृत्तेन नयनेन ददर्श ॥३७॥

लोचनस्थघनरागशिखाभिर्लक्ष्यरोषवडवानलराशिः ।
व्यस्तहस्तचलवीचिकराल क्षुभ्यति स्म दशकण्ठसमुद्रः ॥३८॥

राक्षसेपु विकृतेषु न सद्यो माल्यवानिति विकारमियाय ।
युक्तियुक्तमपि वाक्यमनिष्टं स्वीकरोति न हि दुर्जनलोकः ॥३९॥

ईहितं हितमितीव विकारः वीक्ष्य वीतधृतिभर्तुधीरः ।
वन्धुमिन्द्रसुतवन्धुमथैनं क्रोधनस्समुदियाय सदस्तः ॥४०॥

३५. भुजाओं के सन्निकट स्थित, हथेली पर से उड़े हुए भ्रमर-समूह के समान चमकती हुई, घट्टे की लकीर को, जो (निरन्तर) प्रत्यञ्चा के खींचने से पड़ गई थी, कुम्भ राक्षस ने अपने लाल कमल को हराने वाले, नेत्रों से देखा ।

३६. उसने अपने वक्ष पर पड़े हुए, इन्द्रनील मणि के कराल हार को तुरन्त हथेली के आघात से चूर-चूर कर डाला । उसका चूर्ण फैलने से ऐसा लगता था जैसे उसने अपने वक्ष-स्थल पर कृष्ण-मृग चर्म लपेट लिया हो ।

३७. अपने मुख को हथेली पर रखकर और भयङ्कर होते हुए भी, पसीने-पसीने होकर, वह बहुत देर तक उस दूत को एक टक, विस्मय से देखता रहा ।

३८. दशकण्ठ रूपी समुद्र, जिसमें आँखों की गहरी ललाई की लपट से, बड़वानल के समान क्रोध झलक रहा था, और जिसमें विकल हाथों का सञ्चालन, भयङ्कर तरङ्गों की हिलोर के समान था, उत्तेजित हो उठा ।

३९. यद्यपि अन्य राक्षस लोग क्षुब्ध हो गये थे पर माल्यवान (सुकेतु राक्षस का पुत्र) और रावण के नाना को कोई घबराहट नहीं हुई। दुर्जन मनुष्य, अनिच्छित बात को युक्ति-सङ्गत होने पर भी नहीं स्वीकार करते ।

४०. विकार नाम के अधीर एवं क्रोधी राक्षस ने जब यह देखा कि उसके स्वामी (रावण) का धैर्य छूट गया और उसका हित इसी में है (अर्थात् अङ्गद के पकड़ लेने में) तो वह सभा से उठ खड़ा हुआ ।

आत्मपुच्छलतयैव स पश्चाद्वाहु संयमितमिच्छतिकर्तुम् ।
राक्षसे हतनिपातितशत्रुस्स्वं जगाम बलमम्बरवर्त्मा ॥४१॥

राक्षसेष्वथ विलक्षतमेपु प्रेक्ष्य नम्रवदनाम्बुजपुञ्जम् ।
रावणं स्म नयनिर्मलबुद्धिर्मातुरस्य गुरुराह वचांसि ॥४२॥

उक्तमत्र हितमेव विधातुं तत्क्षमस्व यदि वाक्यमहारि ।
औषधानि विरसानि तथापि द्वेष्यभावमुपयाति न वैद्य. ॥४३॥

अप्रियाणि रिपुराह गुरुर्वा नष्टशीलमयमत्र विभाग. ।
क्षेप्तुमेव कटु जल्पति पूर्व. प्रेमगर्भमपरस्तु हितैपी ॥४४॥

यत्वयाहमवकीर्णितपूर्वं व्याहृतोऽपि विरमामि न वक्तुम् ।
तत्र हेतुरितरैरसमानस्नेह एव न तु जीवित तृष्णा ॥४५॥

४१. जब उस राक्षस ने अङ्गद की ही पूंछ से उनके हाथ को बांधने की चेष्टा की तब वह अङ्गद जो अपनी मार से शत्रुओं को गिरा देते थे, आकाश-मार्ग से अपनी सेना मे चले गये ।

४२. राक्षस लोग इस व्यापार को भौचक्के होकर देख ही रहे थे, कि नीतिज्ञ माल्यवान (मातु गुरु=नाना) उसके (रावण के) नीचे किए हुए सिरों के पुञ्ज को देख कर बोले ।

विशेष—मातु गुरु=माता के पिता=नाना=माल्यवान ।
ततस्तु सुमहाप्राज्ञो माल्यवान नाम राक्षस ।
रावणस्य वच श्रुत्वा इति माता महोऽब्रवीत् ।
—वाल्मीकीय रामायण-२५-७।

४३. जो तुम्हारे हित के लिये मैं बात करता हूँ यदि वह कटु हो तो क्षमा करना। यद्यपि औषधि कडवी होती है फिर भी उसके प्रयोग करने मे वैद्य को कोई द्वेष-भाव नहीं होता ।

विशेष—मद्रास की हस्तलिखित प्रति मे श्लोक की दूसरी पक्ति में 'विरसानि' और 'द्वेष्यभाव' के बीच मे कुछ अक्षर नहीं हैं। मैंने उसकी पूर्ति 'तथापि' से करने का साहस किया है।

४४. भ्रष्टाचरण करने को अप्रिय उपदेश, चाहे शत्रु दे अथवा गुरु । उन दोनो मे अन्तर केवल इतना ही होता है कि शत्रु उस उपदेश के द्वारा निन्दा करता है और हितैषी के उपदेश के भीतर प्रेम रहता है ।

४५ यद्यपि तुम मेरा पहिले अपमान कर चुके हो, फिर भी मैं कहने मे न रुकूँगा। इसका कारण यह है कि दूसरो से कहीं अधिक मैं तुमसे प्रेम करता हूँ। उसका कारण जीने की तृष्णा नही है ।

यस्य वृद्धिमधिगम्य विवृद्धिर्जायते विपदि यस्य विपत्तिः ।
तं स एव हितमाह जनस्तु श्रोत्रहारिवचनैस्तुविदग्धः ॥४६॥

स्वार्थरागरतिशुद्धमतीनां सद्विवेक पटुदृष्टफलानि ।
यच्छृणोति वचनानि गुरूणां तन्न जातु विपदेति न यज्ञम् ॥४७॥

ऋश्यमूकमितवत्यरिवीरे त्वं तदैव घटनामकरिष्यः ।
यद्युपेत्य कुलिशायुधसूनुर्नाभविष्यदियमत्र विपत्तिः ॥४८॥

सम्पतन्ति कपयोऽस्य न यावत्तावदेनमभिगम्य सवेगम् ।
विग्रहीतुमपि युक्तमभूद्वस्तत्कृतन्न हृदयेषु मदेन ॥४९॥

आसनंतव रसातलमेत्य स्तोक काल मसुराधिपवन्धोः ।
युक्तमत्र परिणश्यति यावज्जीवनेन फलमप्रतिवन्ध्यम् ॥५०॥

४६. जो स्वामी के अभ्युदय में प्रसन्न होता है और उसकी विपत्ति में दुखी होता है वही उससे हित की बात कहने में समर्थ होता है। अन्य लोग जो कांइयां होते हैं वे तो केवल ठकुर-सोहाती कहते हैं।

४७. स्वार्थ, राग-द्वेष, एवं आसक्ति से रहित जिनकी बुद्धि शुद्ध है, ऐसे गुरुजनों के विवेक-पूर्ण अतएव सफल वचनों को जो नितिश सुनता है उसके पास विपत्ति नहीं आती।

विशेष—वृणुते हि विमृष्यकारिणं गुणलुब्धाः स्वयमेव सम्पदः —भारवि
हिताम्नयः संश्रृणुते सकिम्प्रभुः ।—भारवि

४८. जब ऋष्यमूक पर्वत पर राम गये थे तभी यदि तुम, शत्रुओं में वीर राम से सन्धि कर लेते तो यह विपत्ति तुम पर न आती।

विशेष—'न शत्रुनवमन्येत ज्यायान् कुर्वीत विग्रहम्।
तन्मह्यं रोचते सन्धिः सह रामेण रावण॥
—वाल्मीकि रामायण : युद्ध काण्ड, २५—१०।

४९. जब तक वानर लोग संघटित नहीं हुए थे तभी यदि तुमने आक्रमण कर दिया होता तो उचित होता। परन्तु तुमने अभिमान के कारण इसे अपने हृदय में स्थान नहीं दिया।

५०. असुरों के स्वामी (बलि) के मित्र होते हुए भी तुम्हारा आसन रसातल में जाकर थोड़े समय में नष्ट हो जायगा यह उचित ही है। (ऐसा कुछ विधान है कि) मनुष्य को जीवन ही में अपने कर्म का फल मिल जाता है।

विशेष—असुराधिपबन्धोः—बलि के मित्र। वाल्मीकीय रामायण में इस सम्बन्ध की एक कथा इस प्रकार है :

"एक बार रावण पाताल में गया। बलि से उसने कहा कि हम तुम्हें कैद से छोड़ाने आये हैं। बलि ने कहा कि तुम यदि हिरण्यकशिपु का कुण्डल छीन लाओ तो हम समझें कि तुममें शक्ति है। परन्तु बहुत प्रयत्न करने पर भी रावण ऐसा न कर सका।" रावण बलि की सहायता के लिये गया था, इसलिये कवि ने उसे 'असुराधिपबन्धु' कहा।

प्रेरणाय न दिवस्य न यज्ञैर्व्याहृतस्य भवतान विधातुम् ।
द्वैधमुग्ररिपुसैन्यसमुद्रग्रस्तसर्वविषयेन न शक्यम् ॥५१॥

सद्धनेन पणबन्ध भारतौ कल्पयन्ति वलभाजि न यज्ञा ।
त प्रियावितरणेन यदि स्यात्सिद्धिरत्र परमोऽयमुपाय ॥५२॥

त्वय्यलङ्घ्यनलकूबरशापक्रूरवक्त्रपतन न वेत्सि ।
केवलन्तु कुलहिंसनहेतो पासि विष्णुतुलितस्य कलत्रम् ॥५३॥

अस्ति काचिदिति नूनमनूना राघवेऽपि तव दुर्जयशङ्का ।
येन वणिवपुरेत्य कलत्र तस्य हर्तुमभवत्तव यत्न ॥५४॥

५१ तेजस्वी शत्रु के सेना रूपी समुद्र से आपका सम्पूर्ण देश ग्रस्त हो गया है। अब आप नीतिज्ञ स कहे गय द्वैध (भेद करा देना) का भी विधान नही कर सक्ते।

५२ नीतिज्ञ कहते हैं यदि शत्रु बली हो तो उसे कुछ ले दे कर सधि कर लेनी चाहिये। इसलिये उनकी प्रिया (सीता) को वापिस देकर यदि कार्य सिद्धि हो तो यही एक परम उपाय है।

५३ क्या तुम अजेय नलकूवर का अपने क्रूर सिर के पतन वाला शाप भूल गये हो ? हमे तो ऐसा लगता है कि तुम केवल अपने कुल के नाश के हेतु विष्णु के समान राम की पत्नी की रक्षा कर रहे हो।

विशेष—नलकूवर का शाप—कथा —एक समय रावण कैलास पर्वत पर गया। वहा वह रावश्रेष्ठ, पूण चन्द्रमुखी' रम्भा को देखकर अतीव कामासक्त हो गया, और रम्भा के हजार कहने पर कि मैं तो आपकी पुत्रवधू हूँ' उसने बलात् उससे सभोग किया। रावण कुवेर का भाई था। नलकूवर, कुवेर का पुत्र था। इस प्रकार रम्भा रावण की पुत्रवधू हुई। जब नलकूवर ने रम्भा से यह वृत्तान्त सुना तो उसने रावण को शाप दिया कि जब कभी तुम परस्त्री के साथ बलात् ऐसा करना चाहोगे तो तुम्हारे सर कट-कट जायेंगे।

काममोहाभिभूतात्मा नाश्रीयत्तिद्वचो मम।
याच्यमानो मया देव स्नुषातेऽहमिति प्रभो॥
यत्सर्वं पृष्ठत कृत्वा बलात्तेनास्मि धर्षिता।

जब रम्भा ने यह बतलाया तो, नलकूवर ने शाप दिया :

'तस्मात्स युवती भया ना कामामुपयास्यति।
यदा ह्यकामा कामार्तो धर्षयिष्यति योषितम्॥
मूर्धातु सप्तधातस्य शकली भविता तदा।

वा० रा० उ०— २६—५४—५६।

५४ अवश्य ही तुम्हे राम को जीतने मे बडी शङ्का भी रही है। तभी तो तुमने सन्यासी का वेष बना कर उनकी पत्नी को हर लाने का यत्न किया है।

तस्य दूतमपि वेत्सि चयेन पातितस्तव सुतोऽक्षकुमारः ।
इत्युदारमभिभाष्य स तूष्णीमास्त मौनमुचितं खलु मूर्ते ॥५५॥

इतीरितं मातृगुरोर्वचस्तत् प्रशंसतस्संसदि यातुधानात् ।
अङ्गारवर्षैरिव लोचनानां व्रातैः किरन्निन्द्ररिपुर्बभाषे ॥५६॥

पथ्यं पथोपत्यमयं व्यपेतं वशी विशङ्कं वदतु प्रसह्य ।
निन्दन्ति ये तद्व्युपदेशलाभात् तद्दन्तमद्यैव पिनष्टि मुष्टम् ॥५७॥

शङ्का कुतो मस्करिवेषलक्ष्म्या वयं न सञ्चस्करिमातमरूपम् ।
मा योषितन्नीनशदुग्रमग्रे दृष्टं वपुस्तामिति गोपितं नः ॥५८॥

विनोपभोगं भवने भवन्तु सीतादयो मे वशगस्य देव्याः ।
अनन्तकोशस्य नृपस्य रत्नं शिखान्तमारोहति किञ्चिदेव ॥५९॥

५५. तुम उसके दूत (हनुमान) को भी जानते हो जिसने तुम्हारे पुत्र को मारा है। इतनी सारगर्भित बात कह कर माल्यवान चुप हो गया । (ठीक ही है) जब सुनने वाला मूर्ति के समान बैठा रहे अर्थात् उस पर उपदेश का कोई असर न हो तो फिर चुप रह जाना ही उचित है ।

५६. माल्यवान के द्वारा कहे हुए उपदेश की सभा में प्रशंसा करते हुए राक्षसों को देखकर इन्द्र का रिपु रावण, उन राक्षसों की ओर आंखें तरेर कर, जैसे अङ्गार की वर्षा कर रहा हो, देख कर बोला ।

५७. ये मनस्वी माल्यवान निःशङ्क होकर जो खामख्वाह हमारे विरुद्ध पथ्य की बात कह रहे हैं, वे कहा करें। परन्तु अन्य लोग जो लाभ के बहाने हमारे आचरण की निन्दा करेंगे उनको यह हमारा घूंसा अभी ही पीस डालेगा।

५८. हमें क्या शङ्का है ? हमने तो भिखारी का रूप नहीं बनाया है । (भिखारी का रूप तो राम ने बनाया है, यह भाव है) उनकी पत्नी को ये उग्र राक्षस लोग जो सामने बैठे दिखाई पड़ रहे हैं, कहीं नष्ट न कर दें, इसलिए हमने उसे छिपा दिया है ।

५९. मैं तो देवी मन्दोदरी के वश में हूं। सीता ऐसी कितनी (नगण्य) स्त्रियां हमारे महल में पड़ी हैं। जिसके पास स्वयं रत्नों का अनन्त कोश है वह किसी खास ही रत्न को सिर पर चढ़ाता है।

दिग्दन्तिदन्तायुधभिन्नरत्नकेयूर बन्धज्वलितांसपीठ. ।
सोऽयं भुजो मे पणबन्धबुद्धिं युद्धैकलब्धो न ददाति कर्तुम् ॥६०॥

य शक्र. प्रतिपद्य खण्डितवृहद्धामानतो मानतो
विभ्रष्टैरुपवीज्यते प्रतिदिनं यश्चामरैश्चामरै. ।
कातर्यातुरचेतस प्रतिकथात्कामानवान्मानवात्
विष्णुस्तन्नजयेज्जितद्विरदराड्वैरावण रावणम् ॥६१॥

कर्तुंम शक्तोहमाजौ शरभ मुखगतन्यंकुमार कुमार
नो वै मन्ये तृणाय त्रिभुवनमखिल सहरन्त हरन्तम् ।
युद्धे वेदाम्बुनाथं प्रथमतरजितं पाशवन्तं वशन्त
कास्था जन्येषु भीत्या तरलतरदृशि स्यान्नरे वानरेवा ॥६२॥

भीमं संग्रामभूमौ रिपुकुलजयसंयोगदायागदाया
पक्षमैलेन सोढ्वाचलितगुरुधृति. कं प्रहारं प्रहारम् ।
लीलोदस्तैकहस्तक्षतदलितमुखच्छिन्न दन्तं न दन्तं
सोऽह नेतुं समर्थो भुजतरुघटनाबन्धनेश धनेशम् ॥६३॥

६०. दिग्गजो के दाँत रूपी आयुध से तोडे हुए रत्नों से जडे केयूरबन्ध से जिसके कधे अलकृत हैं ऐसी भारी भुजा इस युद्ध का अवसर पाकर किसी सन्धि की बात नही करती।

विशेष—उपर्युक्त श्लोको मे रावण ने माल्यवान को प्रत्येक शका का उत्तर दिया है।

६१ जिस रावण की सहायता प्राप्त कर इन्द्र की सेवा पति-परित्यक्ता कामिनियो का समूह करता है और जिस पर मान-भ्रष्ट देव-वृन्द प्रतिदिन चँवर डोलाते रहत हैं तो कामी मनुष्यो की कौन गिनती ? उस रावण को जिसने हस्तिराज को जीत लिया है विष्णु भी नही जीत सकते ।

६२. युद्ध मे मैं कार्तिकेय को एक छोटे बच्चे के समान पकड कर शरभ के मुख मे छोड सकता हूँ (जो उन्हें कच्चा चबा डाले) ! मैं सम्पूर्ण त्रिभुवन सहार करने वाले शिव को तिनके के समान भी नहीं मानता। पाश धारण करने वाले वरुण को, जिसे मैं पहिले ही जीत चुका हूँ, उसे तो मैं अपने वश मे ही जानता हूँ, तब फिर मनुष्यो एव वानरो की क्या हस्ती है जिनकी आँखें डर के मारे सदा आर्द्र रहती हैं।

६३. ऐल के द्वारा सग्रामस्थली मे शत्रुवर्ग पर जय का सयोग प्रदान करने वाली गदा के अचानक प्रहार को सह कर अविचलित महान् धैर्य वाला मैं अनायास ही एक हाथ से ही विक्षत किये गये और दलित मुख एव टूटे दाँत वाले चिल्लाते कुबेर को अपनी भुजा-रूपी तरु के बन्धन मे ले आ सकता हूँ ।

एवं नेतुं न शक्यो नयविदुशनसायं स मोहं समोहं
निर्दोषावस्समूह क्षितपतितनयं यानवन्तं नवन्तं।
तद्यातेति प्रतस्थे कुलिशहतिकृतव्यासमांसे समांसे
न्यस्य स्कन्धे पतन्तं त्रिदशजन वधूहासहारं सहारम् ॥६४॥

इति पञ्चदशः सर्गः ।

६४. तब वह रावण, उन लोगों से जो राम के प्रशंसक थे और जो राम के पास जाने के लिये उत्सुक थे, यह कह कर कि "मैं नीतिज्ञ उशानस (शुक्राचार्य) के समान हूँ, मुझे इस प्रकार घबड़वाया नहीं जा सकता; तुम लोग पृथ्वीपति (राम) के पास, जिनके साथ निर्दोष राजाओं का समूह है, चले जाओ," (ऐसा कह कर) अपने मांसल कन्धे पर जिसका मांस वज्राघात से कट गया था, अपने हार को जिसने सौंदर्य में देवाङ्गनाओं के हास को जीत लिया था, झटके से डालकर, वहाँ से चला गया।

पन्द्रहवाँ सर्ग समाप्त।

अथ षोडशः सर्गः

अथ दिवसविधेयमिन्द्रशत्रोर्निरवसितं प्रतिहारतो विदित्वा ।
अनुमतिमधिगम्य तस्य भानु गिरिमपरान्तमहार्णवस्थमीये ॥१॥

अरुण करदृढावकृष्टरश्मि प्रणमितकन्धरभुग्नचारुघोणा. ।
दिवसकरहया गिरीन्द्रभित्तेर्जघनपतद्रथनेमयो वतेरु. ॥२॥

सरभसनिपतद्घनान्धकार भ्रमरकुलैरवलुप्यमान मूर्ति ।
अपसरण विधानमीहमान. पयसि भयादिव मज्जतिस्म भानु. ॥३॥

अरुणितमथ सन्ध्यया मुहूर्तं तदनु तमोभिरुपात्त कोशरन्ध्रम् ।
कुमुदमलिगणो ददर्श दूरादरुणसितेतर वारिजाभिशङ्की ॥४॥

सरसिजमणिवेदिकासुभिन्नप्रचुरतरङ्गकणावकीर्णवाते ।
उपवनसरसीरुह दिनान्ते हृतमिव शीतरयेण सचुकोच ॥५॥

१. तब द्वारपाल स यह जान कर कि रावण का दिन भर का काम समाप्त हो गया, सूर्य उसकी अनुमति लेकर, पश्चिम महासागर म स्थित अस्ताचल पर चले गये ।

विशेष—यहाँ से बडा ही सुन्दर, सूर्यास्त, सन्ध्या एव रात्रि का वर्णन आरम्भ होता है।

२ (ढालपर) अरुण (सूर्य का साथी) ने बडी दृढता से, अपने हाथो से राम को खीचा, जिसके कारण घोडो के कधे झुक गये और उनके सुन्दर नयने तिरछे हो गये, इस प्रकार सूर्य के घोडे, पहाड की चोटी से नीचे उतरे और (उतरते समय) रथ के पहिये उनकी जाँघों से सट गये ।

३ सहसा घने अन्धकार मे परिवेष्टित हो जाने के कारण, जैसे भ्रमरो के समूह ने उसे घेर लिया हो, सूर्य, भागने की इच्छा से, डोल लगाकर पानी मे डूब गया ।

विशेष—जब मनुष्य को मधुमक्खियो का झुड घेर लेता है तो वह जान बचाने के लिये पानी मे डूब जाता है। तद्वत् ।

४ सन्ध्या के कारण जिसका गर्भ (भीतरी भाग) क्षण भर के लिये पहिले लाल हो गया था और फिर अन्धकार के कारण श्यामल हो गया, ऐसे कुमुद को देख कर भ्रमरो के झुड को शङ्का हुई कि यह लाल कमल है या नील कमल ।

५. सन्ध्या के समय, माणिक्य की वेदी पर, हवा के कारण, टकराने से सरोवर की बहुत सी लहरियो से सिञ्चित, उपवन का कमल, तीव्र शीत से जैसे पीडित होकर, सिकुड गया ।

द्रुतमपसरतैति भानुरस्तं सरसिरुहेषु दलार्गलाः पतन्ति ।
भ्रमरकुलमिति ब्रुवन्निवालिः क्वणितकलं विचचार दीर्घिकायाम् ॥६॥

सति दिवसपरिक्षयस्य योगे निपतितसद्वयसस्तमोऽभिभूताः ।
विनमितचलमस्तका बभूवुः समुपहृता जरसेव वृक्षगुल्माः ॥७॥

विगलितवति तिग्मभासि सन्ध्या परिगतलोहिततारकं नभस्तत् ।
त्रिदशशरशत व्रणावकीर्णं हृदयमनुव्रजति स्म रावणस्य ॥८॥

दिवसकरभयादिवोपलीनो जलधिजलान्तरितस्तुषाररश्मिः ।
रविरपचलितो नवेतिबोद्धुं नभसि करानिव चारयांबभूव ॥९॥

प्रथम गमितमन्थकारिभावं पुनरतिपिङ्गलतारकं विधाय ।
भुवनमथ कलात्मना समस्य त्रिनयनरूपमलम्भयत्प्रदोषः ॥१०॥

दिवसविगमलङ्घितस्य भानोरवनतिरुन्नतिरिन्दुमण्डलस्य ।
अविकलवपुपः समानकालं नभसि तुलामधिरूढयोरिवास्ताम् ॥११॥

६. "जल्दी से निकल भागो, सूर्यास्त हो गया, कमलों पर उनकी पँखुड़ी रूपी कुंडी बन्द हो रही है", भ्रमरों के समूह को यह चेतावनी देता, एक भृंग भनभनाता हुआ, सरसी पर इधर-उधर चक्कर लगाने लगा।

७. दिन के अवसान पर, वृक्षों के कुञ्जों ने, जैसे बुढ़ापे के कारण, अपने हिलते हुए मस्तकों को झुका दिया, और अन्धकार से आक्रान्त उसे छोड़ कर पक्षिगण (अपने-अपने स्थान पर बसेरा लेने) चले गये।

८. सन्ध्या के समय, सूर्य के ढल जाने पर, लाल-लाल तारों से व्याप्त आकाश, रावण के हृदय की भाँति लगता था, जिसमें देवताओं के बाणों से लगाये हुए अनन्त घाव हों।

९. सूर्य के डर से छिपा हुआ चन्द्रमा, जो समुद्र के जल के भीतर था अब (सन्ध्या हो जाने पर) यह जानने के लिये कि सूर्य चला गया या नहीं, अपने करों को (कर=हाथ=रश्मि) (बाहर निकाल कर) आकाश में चारों ओर फेर रहा है।

१०. सन्ध्या ने पहिले तो अन्धकार का भाव ग्रहण किया। फिर अतीव पिङ्गलवर्ण तारिकाओं का सृजन किया। तदनन्तर अपनी कलाओं के द्वारा (चन्द्रमा से) सम्पूर्ण भुवन का एकीकरण किया। इस प्रकार उसने त्रिनेत्र (शिव) का रूप धारण किया।

११. दिन के अन्त होने पर, एक ही समय में, सूर्य के अस्त होने और सम्पूर्ण कलाओं से चन्द्रमा के उदय होने से ऐसा लगता है जैसे वे आकाश में, तराजू पर एक-एक पलड़े पर बैठे हों।

उदयमरुणिमा परित्यजन्त प्रविसृजति स्म शशाङ्कमच्छबिम्बम् ।
चषकममलमिन्द्रदिङ्मुखेन स्फटिकमय मधुनीव पीयमाने ॥१२॥

शठमिवदयित दिश. प्रदोषं मुहुरधिगम्य रुषेव भिन्नवर्णा ।
स्थितिमुपरिपयोधरस्य सन्ध्याविलसितकुङ्कुममण्डनममार्जु ॥१३॥

क्षिपति निशि पयोधरे निशान्ते रहयति किं तिमिरोत्तरीयमाशा ।
इति रचितविपर्ययस्य साक्षिस्फुटमिव कौमुदमाततान हासम् ॥१४॥

परभृतरुचितासम हिमांशोरुदयगिरेरुदितस्य मण्डलेन ।
प्रतिपटु पटरा विपाट्य विश्व विवरगते विहित नु सहृत नु ॥१५॥

१२ उदय होने के समय की ललाई को छोडते हुए चन्द्रमा का स्वच्छ बिम्ब, ऐसा लगता है, जैसे पूव दिशा ने स्फटिक के शुभ्र चषक (मदिरा का प्याला) से मदिरा पी डाली हो।

१३ दिशाए बार-बार यह देखकर कि प्रदोष (सन्ध्या) तो बडा धोखेबाज प्रमी है जैसे मारे गुस्से के विवर्ण हो गई और अपने स्तनो (श्लेष=बादलों) पर विलास करते हुए चित्रण को उन्होने मिटा दिया।

विशेष—प्रदोष के समय दिशाओ का रग क्षण क्षण मे बदलता है और अत मे सब रग मिट जाते हैं, यह प्राकृतिक नियम है।

१४ यह दिशा (नायिका) अपनी अन्धकार रूपी चादर, सन्ध्या के समय अपने स्तनो पर ओढ लेती है और रात्रि के समाप्त होने पर वह क्यो उतार कर फेंक देती है। उसके इस उलटे व्यवहार को देखने वाला कुमुद जोर से हँसा।

विशेष—सन्ध्या समय दिशायें अन्धकार से ढँक जाती हैं और फिर प्रात काल स्वच्छ हो जाती हैं। यह प्राकृतिक नियम है। सन्ध्या हुई, कुमुद फूला। उसके फूलने को कवि कहता है कि वह हँसा। वह क्या हँसा? इसलिये कि उसने देखा कि दिशा रूपी नायिका को सन्ध्या के समय अँधेरे मे जब उसे अपने को ढकने की कोई आवश्यक्ता न थी तब तो वह अपने स्तनों को अन्धकार रूपी चादर से ढँक लेती है और प्रात काल जब उसे स्तनों को ढँक लेना चाहिये तब वह उस चादर को उतार कर फक देती है। ऐसी उलटी रीति को देख कर वह हँसा। यह भाव है।

१५ उदयाचल पर निकले हुए चन्द्रमा के मण्डल ने, कोयल की तरह काले विश्वभर के अति घने अन्धकार को छिन्न भिन्न करके, क्या गुफाओ की कन्दरा मे रख दिया है या उसे नष्ट ही कर डाला?

इह हरिणकलङ्ककान्तिलेशैः सहपतिता मृगलक्षणस्य कान्तिः ।
अलिभिरवततैर्न्यधत्त वापी कुमुदवनैरिति शङ्कितं जनेषु ॥१६॥

अचिरसमुदिताय हारगौरैः हिमशिशिरैरनुगृह्णते करोघैः ।
उदकलवपरम्पराभिरर्घ्यं शशिमणितोरणमिन्दवे ततान ॥१७॥

द्युतिभिरवजितो निशाचरीणामहमतुलस्य न केवलं मुखस्य ।
अयमपि हरिणो जितः कटाक्षैरिति जगतामिव दर्शयन् मृगाङ्कम् ॥१८॥

घृणिभिरधिपुरं पुरस्सुवेलक्षितिधरमस्तकजर्जरैः पतद्भिः ।
प्रमदमधिमनो नितम्बिनीनां अभिनवनिर्झरशङ्कया वितन्वन् ॥१९॥

मनसि मनसिजं मनस्विनीनामविरलमुन्नमयन्निजेन धाम्ना ।
द्विपदशनरुचिः पदं कलानामुदयगिरेरुदियाय दिक्प्रदीपः ॥२०॥

१६. 'यहाँ पर चन्द्रमा की कान्ति, उसके हरिण रूपी कलङ्क के टुकड़ों के साथ गिर पड़ी है'—इस प्रकार उस झील में फूले हुए कुमुद समूह को, जिन पर भृङ्ग मंडरा रहे थे, देखकर लोगों ने शङ्का की ।

१७. जैसे ही चन्द्रमा ने उदय होकर, चन्द्रकान्त मणि से बने हुए तोरणों को, अपने हिम के समान शीतल और हार के समान शुभ्र किरणों से अनुगृहीत किया (त्योंही उन पर चन्द्रकिरणें पड़ीं) तो उन्होंने (तोरणोंने) जल के कणों की धार से उसको अर्घ्य दिया ।

विशेष—चन्द्रमा की किरणों के पड़ने से चन्द्रकान्त मणि से पानी बहता है, ऐसा कहना है।

१८. "इन निशाचारियों के अनुपम मुखों की कान्ति से हमीं केवल नहीं हारे हैं। देखो यह मृग भी उनके कटाक्षों से हार गया है", ऐसा कहता हुआ वह (चन्द्रमा) जैसे दुनिया को अपने मृगाङ्क को दिखला रहा है ।

विशेष—कान्तानां कुवलयमप्यपास्तमक्ष्णोः शोनाभिन्नं मुखरुचाहमेकमेव ।
सहर्षा दलितविवर्त्तरितीव गायल्लोलोर्मौ पयसि महोत्पलं ननर्तः निभाय ।

१९. सामने सुवेल पर्वत के शिखर पर छिटक कर गिरती हुई किरणों के द्वारा, सुन्दर नितम्ब वाली स्त्रियों के हृदय में, एक नये निर्झर की शङ्का उत्पन्न कर उनमें काम का सञ्चार करता हुआ ।

विशेष—श्लोक १९ और २० 'विशेषक' है। २०वें श्लोक में 'उदयगिरेरुदियाय दिक् प्रदीपः' के साथ अन्वय होगा ।

२०. मनस्विनी स्त्रियों के मन में, अपनी प्रभा से, निरन्तर कामोद्दीपन करता हुआ, हाथी दाँत के समान शुभ्र, कलाओं का आश्रय स्थान, दिशाओं का प्रदीप, (चन्द्रमा) उदयाचल से उदय हुआ ।

गगनसरसि चन्द्ररूप्यकुम्भे व्यपसरति स्म निपातिते रजन्या ।
तदुपहित तरङ्ग धूतनीलीनिकरइवातिघनस्तम. प्रवाह ॥२१॥

सुरकरिणइवाहत. करेण प्रवितत सन्तमसाम्बुराशिरिन्दो. ।
अनुपहतगतिर्दिगन्तवेलावलयवनानि विलङ्घयन् प्रतस्थे ॥२२॥

प्रियविरहसमागमाश्रयाणा मुखकमलानि निशा नितम्बिनीनाम् ।
उदितवति मृगाङ्कचन्द्रबिम्बद्युतिभिरिवोडुपतावलञ्चकार ॥२३॥

पथिकयुवतिदृष्टयोऽनुजग्मु. सरसिजरागमणिश्रिय रुचैव ।
शशिनि समुदिते शशाङ्ककान्त किरणवृत क्रियया निदर्शयन्त्य ॥२४॥

अपिहितसलिलेन निष्प्रदेशं कुमुदवनेन कुमुद्वती विरेजे ।
घननिपतित भृङ्गचित्रभासा मृगरिपुचर्म कृतावकुण्ठनेव ॥२५॥

निशिपयसि पदानि कुर्वतीषु ग्रहनिकरप्रतिमासु मल्लिकाक्ष. ।
इतरमपि जलाशय निकूजन् समुपससार कुमुद्वतीति हृष्ट ॥२६॥

२१ जब रात्रि (नायिका) ने चन्द्ररूपी चाँदी के घडे को आकाश रूपी सरोवर मे गिराया तो उससे उठी हुई लहरों ने सेवार के समूह रूपी घने अन्धकार को दूर फेंक दिया ।

२२ चन्द्रमा की किरणो के पडने से अन्धकार का समुद्र उमड कर दिगन्त के किनारे पर कडे के समान स्थित वना मे चला गया जैसे देवताओ के हाथी ऐरावत के सदृश उन्हें वहाँ खदेड दिया हो ।

२३ रात्रि ने चन्द्रमा के उदित होने पर प्रिय विरह के बाद मिलन का आश्रय पाने वाली नितम्बिनियो के मुख कमलो को मृग से अंकित शशि की किरणो से मानो अलकृत किया ।

२४. पथिको की (विरहिणी) की आखें जो पहिले माणिक्य की प्रभा की तरह लाल थी, परन्तु जब चन्द्र उदय हुआ तो उसकी किरणो से घिर जाने के कारण वे चन्द्रकान्त-मणि के (स्वाभाविक) काम को दिखलाने लगीं ।

विशेष—पथिकों की (विरहिणी) स्त्रिया की आँखें पहिले वियोग के शोक से केवल लाल थीं, परन्तु चन्द्रमा के उदय होने से ये रोने लगीं । यह भाव है ।

२५ कुमुदिनी की लता, जिसने अपने पुष्पो के समूह से जल को ढँक लिया था और जो भृङ्गों के झुंड के उन पर बैठ जाने से रग बिरगी हो गई थी, ऐसी लगती थी जैसे उसने चीते की खाल को ओढ लिया हो ।

२६ रात्रि के समय तैरते हुए मल्लिकाक्ष (हस विशेष) ने एक दूसरे तालाब मे तारिकाओं के समूह की परछाँई पडते देख, यह समझ कर कि वह कुमुद्वती है, बडे हर्ष से कूदता हुआ वहाँ चला गया ।

इति तुहिनरुचौ विकीर्णधाम्नि प्रचुरतमोभिदुरस्वररश्मिजाले ।
मनसि मकरकेतनस्य यूनां विलसितमात्मनि विक्रिया विवव्रः ॥२७॥

स्वयमपि विरचय्य पत्रभङ्गीर्वदनहिमद्युतिलक्षणं कयाचित् ।
चिरयति हृदयेश्वरे रमण्या नयन जलेन फलच्युता निरासे ॥२८॥

न भवति दयितस्य सन्निकर्षे फलरहितो विरहेषु तस्य रागः ।
इति मनसि निधाय यावकेन व्यचरयदन्यतरा न दन्तवासः ॥२९॥

इतरयुवतिपादघातचिह्नं सरससमर्पित यावकं पदं यत् ।
उरसि न दयितस्य तद्विवेद स्फुटमणिकुण्डल रागरुद्धमन्या ॥३०॥

प्रियवचनविधायिनी न भर्तुः चलदलकच्युत चूर्णलेशमक्ष्णोः ।
मदनसमुचिताङ्गसङ्गिदृष्टेर्व्यपनयति स्म मुखानिलेन काचित् ॥३१॥

सुरपतिरिपवः प्रियानिरस्तश्रवणसरोरुह निर्वृतेऽपि दीपे ।
रतिषु ददृशुरेव काञ्चिरत्नद्युतिपरिभितमिस्रमूरुमूलम् ॥३२॥

२७. जब शीत रश्मि चन्द्रका ने चाँदनी छिटका कर अपने रश्मि जाल से घने अन्धकार को मिटा दिया, तो कामदेव ने युवा पुरुषों के हृदय में अपने विलास का विस्तार किया।

२८. एक रमणी ने, जिसने अपने चन्द्रमा के समान मुख को स्वयं अपने हाथों से चित्रित किया था, जब देखा कि उसके हृदय के स्वामी के आने में बहुत देर हो गई है, तो उसने उस चित्रण को, निरर्थक समझ कर, अपने आँसुओं से धो डाला।

२९. 'जब प्रेमी पास रहता है तो यह यावक लगा नहीं रहता। और जब वह (प्रेमी) पास नहीं रहता तो उसकी कोई आवश्यकता नहीं रहती।' ऐसा अपने मन में सोच कर एक दूसरी स्त्री ने अपने ओठों पर यावक नहीं लगाया।

विशेष—जब प्रेमी पास रहता है तो ओंठों पर यावक रहने नहीं पाता। चुम्बनों से वह उसे मेट देता है। यह भाव है।

३०. अपने प्रियतम के वक्ष पर, किसी दूसरी रमणी का लगाया हुआ गीले यावक का पद-चिह्न, उस स्त्री के (माणिक्य) मणि के बने हुए कुण्डल की प्रभा में छिप गया। (अर्थात् कुण्डल की प्रभा के कारण उसने नहीं देख पाया, यह भाव है।)

३१. एक आज्ञाकारिणी स्त्री ने अपने लहराते हुए बालों से पति की आँखों में गिरे हुए 'पाउडर' (सुगंधित बुकनी) को मुँह से फूँक कर नहीं हटाया। क्योंकि उस समय, उसकी आँखें उसके कामासक्त करने वाले अङ्गों को देख रही थीं।

३२. यद्यपि प्रेयसी ने अपने कान में लगे हुए कमल को फेंक कर दीपक को बुझा दिया था पर देवताओं के शत्रु, राक्षसों ने, रति के समय मेखला की मणियों से निकली हुई प्रभा से उसके उरु भागों को देख लिया।

विवसनविहितोतगूहनानां घनजघनस्तनकुम्भकुङ्कुमेषु ।
अपि परिगलितेषु कामिनीनां न विगलितानि तनूदराश्रयाणि ॥३३॥

चरणतल सरोरुहेण यत्वां प्रहृतवती शिरसि प्रियातिकोपे ।
स किलपरमनुग्रह प्रसादे हृदिरचिते तव कीदृशो नु लाभ ॥३४॥

अधरपुटमिदं मदार्तरामारभससमर्पितदन्त खण्डितं ते ।
अयि शठ परिशान्तये रुजायाः नयन जलेन निषिञ्चसि प्रसक्तम् ॥३५॥

करकिसलयगोपित मुखं त्वं किमिह विधाय वदस्यय ममाग्रे ।
तिरयसि दशनक्षतं प्रियायाः वयमुत गौरवभाजन किमेवम् ॥३६॥

इति वचसि रुषा परिस्खलन्त्यः प्रणयिषु राक्षसयोषितो विपक्षैः ।
परिमिलितविसर्जितेषु रूक्षा नयनजलग्रथित वचो वितेनुः ॥३७॥

अपि तव दयिते समीपभाजि श्वसितरयग्लपिताधरस्य कान्तिः ।
चरणनिपतिते निपातितस्ते न च करुणा परिमन्थरः कटाक्षः ॥३८॥

३३ कामिनियो के वस्त्रो के उतार डालने पर, आलिङ्गन से उनकी उभरी हुई जाँघों और स्तनों का कुकुम तो पुंछ गया पर उनके पतले कटि प्रदेश का कुकुम नही पुंछा ।

३४ कुपित होने के कारण अपने चरण कमल से जो उसने (प्रिया ने) तुम्हारे सर पर आघात किया है और फिर तुम पर हृदय से प्रसन्न हो गई है, तो इससे अधिक तुम्हारा क्या लाभ हो सकता है ।

३५ अरे धूर्त ! काम-पीडित होकर उस ललना ने जो तुम्हारे ओठा को जोर से काट लिया है तो उसके घाव को शान्त करने के लिये तू उसे अपने आँसुओ से सींचता है । (कितना बडा वचक है तू ! यह भाव है ।)

३६ मेरे सामने तुम अपने किसलय के समान हाँथ से मुख को छिपा कर बोलते हो । इसका कारण यह है कि तुम्हारी प्रिया ने जो तुम्हारे ओठों को दाँत से काट लिया है उसे छिपाना चाहते हो या हमारा आदर किया चाहते हो ।

विशेष—कहीं-कहीं यह प्रथा है कि गुरुजनो से बोलने के समय, लोग आदर के लिये, मुंह के सामने हाँथ कर लेते हैं।

३७. जब उनके प्रेमियो को सौतो ने अपने गाढ आलिङ्गन से मुक्त किया तो राक्षस पत्नियाँ अपनी आँखो के जल से रुंधे हुए, क्रोध के कारण अटक-अटक कर, इस प्रकार कठोर वचन बोलीं ।

३८. "जब तुम्हारा प्रेमी (सौत को छोड कर) तुम्हारे पास आ गया तो क्या दीर्घ निश्वास तुम्हारे अधरो की कान्ति पर नहीं छा गये ? क्या तुम्हारे नयनो के कटाक्ष, करुणा से ढीले नहीं पड गये जब वह तुम्हारे चरणो पर गिर पड़ा ?"

स्तनतटनिहितः करोऽवधूतः परिगदिते समधिश्रितं च मौनम् ।
विहसितमपि सान्त्वने सरोषं प्रणयिजने युवतेरयं हि दण्डः ॥३९॥

सखि जहिहि रुषं हिनस्ति पश्चात्तव तरलं हृदयं पुरानुतापः ।
इति निपुणसखी गिरा निरासे मनसि निशाचरयोषितोऽभिमानः ॥४०॥

यदि चिरयति दूति वल्लभो मे भृशमजनि त्वयि किं रुषोवकाशः ।
निजमतिरभसं यतो विदश्य क्षतिभिरिमं समयूयुजस्त्वमोष्ठम् ॥४१॥

मधुकुसुमविलेपनादि भागग्रहण विदर्शितसौहृदय्यवृत्त्या ।
अयमपि च सखि स्वयं वृतस्ते प्रियपरिभोग सुखस्य संविभागः ॥४२॥

दशन पदमतिस्फुटं विभाति स्फुरति तनुः श्रमवारिसिक्तमास्यम् ।
अवितथमभिधत्स्व कामिनीं त्वां कुटिलगतिर्ननु दष्टवान् भुजङ्गः ॥४३॥

अवितथमिदमात्मनिर्विशेषा सखि भवसीति वचः पुरा यदुक्तम् ।
अभिदयितमनुष्ठितं त्वया हि स्वयमखिलं मम यत्नतो विधेयम् ॥४४॥

३९. जब उसने अपने हाथ को तुम्हारे स्तन-तट पर रखा तो तुमने (उस हाथ को) हटा दिया, (उसके) बोलने पर तुमने चुप्पी साध ली, और उसके अनुनय विनय करने पर तुम (बनावटी) गुस्से से हँस दीं, अपने प्रेमी के प्रति युवतियों का यही दण्ड होता है।

४०. 'हे सखी ! क्रोध मत करो। बाद में (अर्थात् गुस्सा उतर जाने पर) तुम्हारा पश्चाताप तुम्हारे कोमल हृदय को सालेगा।' इस प्रकार एक चतुर सखी के कहने पर उन राक्षस पत्नियों के मन से अभिमान निकल गया।

विशेष—"जहिहि कोपं दयितोऽनुगम्यतां पुरानुशेते तव चञ्चलं मनः।
इति प्रियं काञ्चिदुपैतु मिच्छतीं पुरोऽनुनिन्ये निपुणः सखीजनः।
—किरातार्जुनीयम् ८, भारवि

४१. यदि हमारा प्रियतम (तुम्हारे पास) आने में देर करता है तो तुम क्यों इतना अधिक क्रोध दिखला कर अपना ओंठ काट डालती हो ?

४२. मैंने जब इतने मित्र भाव से मदिरा, पुष्प, विलेपन आदि तुम्हारे साथ बांट कर लिया है तो हे सखि ! इससे तुम्हारा भी तो प्रियतम के साथ संभोग का सुख बढ़ गया होगा।

४३. उसके दांत काटने का घाव स्पष्ट देख पड़ रहा है, शरीर कांप रहा है, श्रम के कारण मुँह पसीने-पसीने हो रहा है, सच-सच बताओ कि तुम्हारी कामासक्त अवस्था में इस कुटिल सर्प ने तुमको डसा है कि नहीं।

४४. हे सखि ! किसी समय तुमने कहा था कि तुम और हम बिलकुल एक समान हैं। यह बिलकुल सच निकला, क्योंकि जो कुछ तुमने मेरे प्रेमी के साथ किया वह स्वयं मुझे यत्न से करना चाहिये था।

इति रचितरुष सहासगर्वं श्रमजलबिन्दुचितं मुखं दधत्या ।
श्रवणकटुनिशाचरस्य वध्वाश्चलित धृतेरुपदूति वाग्जजृम्भे ॥४५॥

श्वसित हृतरुचिर्वराधरोष्ठ. करतलसक्रमितश्च पत्रलेख ।
निजगदतुरुपागते चिरेण प्रणयिनि राक्षसयोपित. प्रचिन्ताम् ॥४६॥

विफलपरिकरा विधायदूतीस्तदनु समेत्य च पृष्ठतो निलीनै. ।
युवतिनिगदितं सरोप गर्वं परिहृपितैरुपशुश्रुवे तदीशै. ॥४७॥

क्षितिरियमधरस्य यत्सुरासु स्रुतसहकार रसाहिता तदस्तु ।
अतरल हृदयस्य गण्डबिम्बे तव कतरोद्य नखक्षतस्य हेतु. ॥४८॥

युवतिनयनचुम्बनेपु पक्ष्मप्रविरचिता पटुरञ्जनस्य राजि. ।
तव चपलनिरूपिता नवोद्यत्प्रविरलरोम्णि कथञ्चिदुत्तरोष्ठे ॥४९॥

युवति मुखगतेन लोचनेन स्फुटमपि मे न शृणोपि जल्पितानि ।
मुखमधुर भुजङ्ग येन सत्यं कुटिलगते नयनश्रवोऽपि जात ॥५०॥

४५ इस प्रकार सुनने मे कड़वे और क्रोध एव ताने से भरे हुए वचन उस राक्षसी के जो अधीर हो उठी थी और श्रम के कारण पसीने से भरे मुख से, दूती के प्रति वचन निकले ।

४६. जब उस राक्षस की पत्नी का प्रेमी देर से आया तो उसके (राक्षस की पत्नी के) निश्वास से अधरो की चमक निकल जाने से, और उसके पर के चित्रण (चिन्ता से बार-बार रगडने से) हथेली पर उतर आने से उसकी चिन्ता का पता चलता था ।

विशेष—'श्वसित चलित पल्लवाधरोष्ठे ।' किरातार्जुनीयम् १०—३४, भारवि ।

४७. जब दूतियाँ प्रेमियो को बुला लाने मे असफल हो गई तो वे (प्रेमी लोग) वहाँ चुपके से आकर पीछे छिप गये और वहाँ से उन युवतियो के क्रोध और गर्व भरे वचनो को बड़े हर्ष के साथ सुना ।

४८. यह हो सकता है कि तुम्हारे अधरो पर जो छाला पड गया है वह मदिरा मे आम का रस गिर जाने से हुआ हो । पर हे *कठोर हृदय वाली ! यह तो बताओ कि तुम्हारे* गालो पर यह नखक्षत कैसे हुआ ?

४९. हे उतावले ! (उस) युवती की आखो का चुम्बन लेने से जो तुम्हारी भींजती हुई बीडर मसो मे उसकी बरौनी का कज्जल लग गया है, वह स्पष्ट दिखाई पड रहा है ।

५० (उस) युवती के मुख की ओर तुम्हारी आँखें लगी होने के कारण मेरी स्पष्ट बातो को तुम सुन नहीं रहे हो । हे चिकनी-चुपडी बात करने वाले (भुजालम्ब) तुम सचमुच कुटिल हो और (सर्प की भांति) तुम केवल आँख से सुनते हो ।

इति मनसिजचञ्चलं युवानं रजनिचरप्रमदा निरूपयन्ती ।
अनिमिषनयना सहासवर्गं प्रणयरुषः प्रथनं वचोबभाषे ॥५१॥

स्वतनु वितरणेन तं प्रलोभ्य द्विपमिव वन्यमिहोपनेतुकामा ।
सखि गजगणिकेव चेष्टितासि स्मरति हि सज्जन एव मित्रकृत्यम् ॥५२॥

अकरुणमधिगम्य तं मदर्थे विशसनमेवमसह्यमास्थितायाः ।
क्षतमिदमधरस्य केवलं ते मम हृदयस्य सखि व्यथातुतीव्रा ॥५३॥

इति सखि हसितां कृतव्यलीकामरुणितलोचनरम्यवक्त्रबिम्बा ।
सुररिपु वनिताऽपदिश्य दूतीमकृतगिरः परुषा रुषापरीतः ॥५४॥

सरसिज मणि कुन्तलोपमुक्तं मधु पपुरङ्गजमन्थरा युवत्यः ।
कथमपि परिनिस्सृतस्तदीयो रस इति मुग्धतया विशङ्कमानाः ॥५५॥

५१. इस प्रकार, उस कामासक्त होने के कारण चञ्चल युवा को दरसाती हुई, उस निशाचरी ने, उसको हिकारत भरी हँसी से, आँखें तरेर कर देखती हुई, प्रेम के कारण उत्पन्न क्रोध से कटु वचन बोली।

५२. हे सखि ! तुमने अपने शरीर के समर्पण से लुभा कर उसे यहाँ बुलाने की चेष्टा की है वह उस हथनी की भाँति है जो बनैले हाथी को लुभा-फँसा लेती है। सज्जन पुरुष मित्र के किये हुये काम को याद रखते हैं (भला मैं कैसे इस उपकार को भूल सकती हूँ) यह भाव है।

५३. हे सखि ! तुमने उस कठोर पुरुष के पास जाकर मेरे लिये क्लेश उठाया है। तुम्हारे अधर पर केवल घाव लगा है। परन्तु मेरे हृदय में उसकी बड़ी तीव्र पीड़ा हो रही है।

विशेष—सत्यमेव कथितं त्वया प्रभो
जीव एक इति यत्पुरावयोः
अन्य दारनिहिताः नखव्रणाः—
स्तावके वपुषि पीडयन्ति माम् ।

५४. इस प्रकार वह तरुणी राक्षसी, जिसका मुख, क्रोध से लाल आँखों के कारण बड़ा सुन्दर लगता था, क्रोध से भरे, कटु शब्द, उस दूती से बोली, जो इतनी छलिया निकली, और जिसे और सखियाँ हँस रही थीं।

५५. लाल कमल के समान मणि अर्थात् माणिक्य के प्याले से ढाली गई मदिरा को पीकर, मदोन्मत्त होने के कारण अलसाई हुई मुग्धा युवतियों को शङ्का हुई कि यह मदिरा किसी न किसी प्रकार स्वयं (चषक से निकल रही है।)

हृदयवदनलोचनेषु तासा मधु मदगन्धवपु श्रिय निधाय ।
श्रमसलिलकणच्छलेन शुभ्र बहिरभवच्छर पाण्डुगण्डबिम्बात् ॥५६॥

मुकुलयति सितेतर सरोज शशिनि समग्रकलास्पदे तदीय ।
असितकुवलयद्युति कुरङ्गप्रतिनिधिरत्र ततान सीधुपात्रे ॥५७॥

प्रियगुणशतजर्जरैव पूर्वं मधुपु चिर परिभोगवत्सुलज्जा ।
न युवति हृदये पद विधातु मदमदनास्थिति सङ्कटे विषेहे ॥५८॥

अभिनवरविबिम्ब लोहिनीभिर्द्युतिभिरभिन्नतया मनोहराभि ।
सरसिजमणिशुक्तिषु प्रणष्ट युवति जनैर्मधु गौरवेण जज्ञे ॥५६॥

स्वयमथ पवनेन सोधपृष्ठे हृतरजसि प्रतिहारचोदितेन ।
किरणमनुपहत्य शीतभास क्षणमधिगम्य पयोधरै निषिक्ते ॥६०॥

सुरयुवतिकदम्बकस्य गीतैरनुगत तुम्बुरुवल्लकी निनादे ।
सपदि परिवृतस्समन्मथेन त्रिदशरिपु प्रमदाजनेन रेमे ॥६१॥

५६ वह मदिरा उनके हृदय, मुख और नेत्र मे, नशा, सुगध और रग को (क्रमानुसार) रख कर उनके नरकुल मे समान पाडु गालो के बिम्ब पर पसीने के कणो के रूप मे स्वच्छ होकर बाहर निकल आई।

५७ जब चन्द्रमा ने अपनी सम्पूर्ण कलाओ से नील कमल को बन्द कर दिया तो उसके (चन्द्रमा के) प्रतिनिधि, कुरङ्ग ने नील कमल के सदृश परछाईं का मदिरा के प्याले मे फैला दिया।

५८. प्रियतम के अनगिनती गुणों के कारण तो उसकी लज्जा पहिले ही चूर-चूर हा चुकी थी, परन्तु जब उसने बहुत देर तक मदिरा पी ता उस तरुणी के हृदय मे मद और काम के भर जाने से उसे (लज्जा को) पैर रखने तक की जगह न मिल सकी।

५६ *माणिक्य का प्याला और मदिरा दानो ही एक समान मनोहर थे और नवोदित सूर्य के* बिम्ब के सदृश लाल थे, इसलिये युवतियाँ प्याले की गुरुता ही से समझ पाती थीं कि (उसमे की) मदिरा समाप्त हा गई।

६० जब द्वारपाल की आज्ञा से स्वय पवन देव ने राजमहल को झाड-पोछ कर धूल रहित कर दिया और बादलो ने क्षण भर मे, बिना चन्द्रमा की किरणो को रोके छिडकाव कर दिया।

विशेष—श्लोक ६० और ६१ 'विशेषक' है। ६१ वें श्लोक के 'प्रमदा जनेन रेमे' के साथ अन्वय होगा।

६१ जब देवताओ की स्त्रियाँ गा रही थीं और तुम्बुर की वीणा उनका साथ कर रही थी तब महसा कामासक्त होकर उस देवताओ के शत्रु (रावण) ने युवती स्त्रियो के साथ रमण किया।

मधुविनमित्तशातकुम्भकुम्भ स्रुतमखिलाननसक्तहेमशुक्तिः ।
